ISSN :- 0974 - 8946

अनुसन्धान-प्रकाशन-विभागीया

त्रैमासिकी शोध-पत्रिका

शोध-प्रभा

(A REFEREED QUARTERLY RESEARCH JOURNAL)

४१ वर्षे चतुर्थोऽङ्कः (अक्टूबरमासाङ्कः) २०१६ ई०

अभिनवगुप्तविशेषाङ्कः

प्रधानसम्पादकः

प्रो० रमेशकुमारपाण्डेयः

कुलपतिः

सम्पादकः

डॉ० शिवशङ्करमिश्रः

सहसम्पादकः

डॉ० ज्ञानधरपाठकः

प्रकाशन-स्थलम्

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्

(मानितविश्वविद्यालयः)

नवदेहली-११००१६

ISSN :- 0974 - 8946

अनुसन्धान-प्रकाशन-विभागीया

त्रैमासिकी शोध-पत्रिका

शोध-प्रभा

(A REFEREED QUARTERLY RESEARCH JOURNAL)

४१ वर्षे चतुर्थोऽङ्कः (अक्टूबरमासाङ्कः) २०१६ ई०

अभिनवगुप्तविशेषाङ्कः

प्रधानसम्पादकः

प्रो० रमेशकुमारपाण्डेयः

कुलपतिः

सम्पादकः

डॉ० शिवशङ्करमिश्रः

सहसम्पादकः

डॉ० ज्ञानधरपाठकः

प्रकाशन-स्थलम्

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्

(मानितविश्वविद्यालयः)

नवदेहली-११००१६

प्रकाशक:
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
(मानित-विश्वविद्यालय:)
कुतुब इन्स्टीट्यूशनल एरिया, नवदेहली-११००१६

ISSN :- 0974 - 8946

४१ वर्षे चतुर्थोऽङ्क: (अक्टूबरमासाङ्क:) २०१६ ई०

मुद्रक: - **अमरप्रिंटिंगप्रैस:**, दिल्ली

प्रधानसम्पादकः

प्रो० रमेशकुमारपाण्डेयः

कुलपतिः

सम्पादकः

डॉ० शिवशङ्करमिश्रः

सम्पादकमण्डलम्

प्रो० जयकान्तसिंहशर्मा

प्रो० हरेरामत्रिपाठी

प्रो० भागीरथिनन्दः

सहसम्पादकः

डॉ० ज्ञानधरपाठकः

शोध-प्रभा

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठस्य
अनुसन्धान-प्रकाशन-विभागीया पत्रिका

१. एषा त्रैमासिकी शोध-पत्रिका।

२. अस्याः प्रकाशनं प्रतिवर्षं जनवरी-अप्रैल-जुलाई-अक्टूबरमासेषु भवति।

३. अस्याः प्रधानमुद्देश्यं संस्कृतज्ञेषु स्वोपज्ञानुसन्धान-प्रवृत्तेरुद्बोधनं प्रोत्साहनं विविधदृष्ट्याऽनुसन्धेयविषयाणां प्रकाशनं च विद्यते।

४. अस्यां श्रीलालबहादुरशास्त्री-राष्ट्रियसंस्कृतविद्यापीठस्थानामन्येषां च विदुषां स्वोपज्ञविचारपूर्णा अनुसन्धानप्रधाननिबन्धाः प्रकाश्यन्ते।

५. अप्रकाशितानां दुर्लभानां प्राचीनाचार्यरचितानां लघुग्रन्थानां सम्पादनभावानुवादटीकाटिप्पण्यादिपुरस्सरं प्रकाशनमप्यस्यां क्रियते।

६. प्रकाशित-निबन्धः पत्रिकायाः एक प्रतिः लेखकाय निःशुल्कं दीयते, यस्मिंस्तदीयो निबन्धः प्रकाशितो भवति।

७. अस्यां पत्रिकायां विशिष्टानां संस्कृत-हिन्द्याङ्ग्ल-ग्रन्थानां समालोचना अपि प्रकाश्यन्ते। आलोच्यग्रन्थस्यालोचना यस्मिन्नङ्के प्रकाशिता भवति सोऽङ्को ग्रन्थकर्त्रे निःशुल्कं दीयते किञ्च समालोचनापत्राण्यपि यथासौविध्यं दीयन्ते।

८. अस्याः वार्षिकसदस्यताराशिः १५०.०० रु० (पञ्चाशदुत्तरैकशतं रूप्यकाणि) सदस्यताराशिः **कुलसचिव, श्रीलालबहादुरशास्त्री-राष्ट्रिय-संस्कृत-विद्यापीठ,** नई दिल्ली-१६, इति सङ्केतेन (बैंकड्राफ्ट अथवा मनीआर्डर) द्वारा प्रेषणीयः।

९. पत्रिकासम्बन्धी सर्वविधः पत्रव्यवहारः 'सम्पादकः' 'शोध-प्रभा', श्रीलालबहादुरशास्त्री राष्ट्रिय-संस्कृतविद्यापीठ, कटवारिया सराय, नई दिल्ली-११००१६ इति सङ्केतेन विधेयः।

सम्पादकः

नैवेद्यम्

अभिनवगुप्तपादाचार्याणां सहस्राब्दमभिलक्ष्य विशेषाङ्कोऽयमिदानीं प्रकाश्यत इति प्रमोदावहम्। राष्ट्रस्याध्यात्मिकशैक्षिकोन्नत्यै तैर्महायोगदानं विहितमिति। 'अभि' पूर्वकनुधातुत: भावे अप्प्रत्ययो भवति तत: अभिनवशब्दस्य सिद्धिर्जायते। तस्यार्थ: नूतन इति कोशकार:। अत एव अभिज्ञानशाकुन्तले उक्तम् -

''अभिनवमधुलोलुपस्त्वं तथा परिचुम्ब्य चूतमञ्जरीम्'' इति। कोशेऽपि 'अभिनवोद्भित' शब्दो वर्तते। तस्य व्युत्पत्तिस्तु अभिनवं यथा तथा उद्भिनत्ति उद्भिद्य जायते यथा अङ्कुर:। तथैवाज्ञानावृते काले कश्मीरदेशे अज्ञानस्य निराकरणं कृत्वा अभिनवज्ञानालोकस्योद्भावनमभिनवगुप्तपादाचार्य अकरोदिति। विमलकलाभिधाना यस्य जननी सत्पुत्रप्रसवेन कृतकृत्यतया चमत्कारातिशयकारित्वेन ''मह:'' उत्सवो यस्या: सा इत्यन्वर्थाभिधानेन महोत्सवेति पद्वीमगात्। एवम्भूताया: जनन्या: पुत्रोऽभिनवगुप्तपाद:, पञ्चमुख:, सिंह:, सिंहगुप्तेति संज्ञया 'रुचि:' दीप्ति: सर्वत्र प्रथा यस्यासौ स इति श्रीनरसिंहगुप्तसंज्ञया ख्यातस्य पुत्र: श्रीमदभिनव:। श्रीमदभिनवगुप्तस्य पिता शिवसदृश: माता च शक्तिस्वरूपा आसीदभिनवगुप्तस्तु ज्ञानस्वरूपोऽभवदिति। अत एवोच्यते तन्त्रालोकस्य टीकायाम् -

शिवशक्त्यात्मकं रूपं भावयेच्च परस्परम् ।
न कुर्यान्मानवीं बुद्धिं रागमोहादिसंयुताम् ॥
ज्ञानभावनया सर्वं कर्तव्यं साधकोत्तमै: ।

स्वयमेव ज्ञानास्वरूपोऽपि भक्त इत्यपि श्रीमदभिनवगुप्तस्य विषये प्रतिपादितं विद्यते। कश्मीरप्रदेशे ये प्रसिद्धा आगमा: आसन् तेषामुद्धारकोऽयमभिनवगुप्तोऽभवदिति ज्ञायते ।

नन्दन्ति पितरस्तस्य नन्दन्ति च पितामहा: ।
अद्य माहेश्वरो जात: सोऽस्मान्संतारयिष्यति ॥

चत्वारिंशदधिकविशिष्टग्रन्थानरचयदभिनवगुप्तपादाचार्य:। तेष्वन्यतमो ग्रन्थ: तन्त्रालोक:, ध्वन्यालोकलोचनटीका च वर्तेते । तन्त्रालोकस्तु शैवागमानां विश्वकोश अथ च साहित्यशास्त्रस्य वा विशेषत: ध्वन्यालोकस्य चक्षु: लोचनटीका विद्यते। शिवाद्वैतवादस्य स्वरूपं श्रीमदभिनवगुप्तेन निरूपितमिति। शिव एव पशुभावं सम्प्राप्य जीवरूपेण प्रतिभासत इति। अत एवोच्यते तन्त्रालोकटीकायां ''वस्तुतो हि शिव एव अस्माकमद्वैतवादिनां मते गृहीतपशुभावो'' विद्यते। श्रीमदभिनवगुप्तोऽपि भणति–

उच्यते वस्तुतोऽस्माकं शिव एव तथाविध: ।
स्वरूपगोपनं कृत्वा स्वप्रकाश: पुनस्तथा ॥

आचार्यै: ये ग्रन्था: रचिता:, ते च सर्वे ग्रन्था: भारतीयदर्शनानां विकासे साहित्यशास्त्रस्य च विकासे महायोगदानं कुर्वन्ति। इदानीमपि तेषां ग्रन्थानां परिशीलनेन राष्ट्रस्यास्य आध्यात्मिकशैक्षिकार्थिक-नैतिकोन्नतिर्भविष्यति। विशेषाङ्केऽस्मिन् यानि शोधपत्राणि प्रतिपादितानि सन्ति सर्वाणि श्रीमदभिनवगुप्त-पादाचार्यस्य व्यक्तित्वस्य कृतित्वस्य च विमर्शे साहाय्यं भविष्यन्ति इत्याशासे।

प्रो. रमेशकुमारपाण्डेय:

कुलपति:

सम्पादकीयम्

भारतीयज्ञानपरम्परायामाचार्याभिनवगुप्तपादस्य योगदानं को न वेत्ति? एतेषां शास्त्रीयं गाम्भीर्यम् सर्वत्रापि विजयते। प्रत्यभिज्ञादर्शनस्य त्रिकशास्त्र चाऽपरपर्यायभूतोऽसौ साक्षाच्छिवावतार एव इति सर्वे विदन्ति विश्वसन्ति च। परमार्थसारग्रन्थे ''आधार'' इति विशेषणेन मतस्यास्य पुष्टिर्भवति-

गर्भाधिवासपूर्वकमरणान्तकदुःखचक्रविभ्रान्तः।
''आधारम्'' भगवन्तं शिष्यः प्रपच्छ परमार्थम्॥

शारदाभूमौ शारदायाः यथा समाराधना एभिर्विहिता तथा नाऽन्येन इत्यप्यनुभवन्ति शास्त्ररक्षणदक्षाः विचक्षणाः।

आचार्याभिनवगुप्तपादः उत्कृष्टसाधकः श्रेष्ठदार्शनिकश्चासीदिति सुप्रसिद्धम्। असौ भारतीय-ज्ञानपरम्परायाः दार्शनिकवाङ्मयस्य च समीक्षक इति मन्यते मनीषिभिः। एतेषां चिन्तने निगमागमयोः शैवशाक्त्योः योगसौन्दर्ययोः जीवजगतोश्च समन्वयः सम्प्राप्यते। अत एव प्रत्यभिज्ञादर्शनं सर्वसमावेशिदर्शनमिति रूपेण प्रथितम्। दर्शनेऽस्मिन् ब्रह्मजगतोर्मध्ये विभाजनं न क्रियतेऽपितु सर्वमपि दृश्यमानं ब्रह्मणो विस्तारभूतम्, सर्वत्र चराचरयोः जडचेतनयोः समस्ते च जगति शिव एव व्याप्तः। या माया जीवं धर्मपथाद् पृथक्करोति तस्यां मायायामपि तस्यैव शिवस्य प्रकाशः। एतेषां जीवने तन्त्रचिन्तनस्य यद्यपि महान् प्रभावस्तथापि प्रत्यभिज्ञादर्शनेन एते लब्धख्यातयो विद्यन्ते। साहित्य-दर्शन-तन्त्रप्रभृति विषये एभिर्विरचिता अनेके ग्रन्थाः विदुषां जिज्ञासूनाञ्च चित्तं प्रसादयन्ति। आचार्याभिनवगुप्तपादः विद्याप्राप्तिकामनया बहून् गुरूनङ्गीकृतवान्। असाधारणप्रतिभासम्पन्नमभिनवमवलोक्य, कुशाग्रबुद्धिविशिष्टोऽयं शास्त्रप्रतिपादनेऽत्यन्तं दक्ष इति विचिन्त्य ''सर्वाचार्यः'' इत्युपाधिनाऽयं विभूषितः। शिवावतारभूतत्त्वाद् ''महामहेश्वर'' इति रूपेणापि एतेषां प्रसिद्धिः।

आचार्याभिनवगुप्तपादानां जन्मनः सहस्रवर्षाणि व्यतीतानि अतः वर्षमिदं जन्मसहस्राब्दवर्षरूपेण परिकल्पितम्। शोधप्रभाया अयमङ्कः अभिनवगुप्तविशेषाङ्करूपेणाभिमतः।

प्रकृतेऽस्मिन्नङ्के चिन्तनान्वेषणविश्लेषणविशिष्टाः षोडशशोधनिबन्धाः, प्रो. अभिराजराजेन्द्रमिश्रेण विरचितं अभिनवसूर्योदयमिति नाटकञ्च शोधप्रभायाः प्रभां प्रख्यापयन्तु इति कामयमानोऽहं प्रमादादज्ञानाद्वा समुत्पन्नस्य दोषव्यूहस्य विच्छेदपूर्वकं निर्देशोपदेशादिभिरुद्बोधनार्थमुत्साहसम्वर्द्धनार्थञ्चाभ्यर्थये सुमनसः मनीषिणः।

डॉ. शिवशङ्करमिश्रः
सहाचार्यः
शोधप्रकाशनविभागस्य

विषयानुक्रमणिका

संस्कृतविभागः

हिन्दी विभाग

English Section

आचार्याभिनवगुप्तपादकृते परमार्थसारे मोक्षविचारः

प्रो.प्रभुनाथद्विवेदी

देशेऽस्मिन् जन्मनो यस्य सहस्राब्दमहोत्सवः।
सश्रद्धं सादरं सैष आयोज्यते समन्ततः॥1॥
विश्रुतः परमाचार्यो महामाहेश्वरो विभुः।
स्मृतोऽभिनवगुप्तोऽसौ कीर्तिकायः कृती प्रधी॥2॥
जन्मना कर्मणा चैव कश्मीरो येन भूषितः।
यशो यस्य जगद्व्याप्तं वन्दे तं विबुधेश्वरम्॥3॥
अक्लिष्टः साधनामार्गे यतते स्म यती व्रती।
तन्त्रादिशैवशास्त्रेषु नाट्ये काव्ये गुरुर्महान्॥4॥
परमार्थसारो ग्रन्थप्रकारः तस्मिन् शिवाद्वैतपरप्रचारः।
कृतोऽस्ति यस्तत्र मोक्षविचारः सैवात्र संक्षिप्तनवावतारः॥5॥

पुरा कान्यकुब्जनगरादष्टमे ख्रिष्टाब्दे कश्मीरं गतस्य सद्विप्रवंशस्य विद्वच्छिरोमणेरत्रिगुप्तस्यान्वये लब्धजन्मानं श्रीमदभिनवगुप्तपादाचार्यं को न जानाति संस्कृतवाङ्मये कृतश्रमः सुजनः? अयं भगवतीभारतीक्रोडालङ्कारः सर्वशास्त्रकृताधिकारः सुविहितसाहित्योपकारः प्रथितशिवाद्वैतविहारः समुन्मूलितः सकलविकारः परिगृहीतनैष्ठिकब्रह्मचर्याचारः समेधिततपःपूतसिद्धेराविष्कारप्रभावाल्लोके 'महामाहेश्वर' इति पुण्योपाधिनालङ्कृतो राजते स्म। नायं कृपणः परिचयं दातुं निजान्वयस्य पूर्वजानाञ्च। यथा तद्विरचिते ग्रन्थे तन्त्रालोके-

निःशेषशास्त्रसदनं किल मध्यदेश-
स्तस्मिन्नजायत गुणाभ्यधिको द्विजन्मा।
कोऽप्यत्रिगुप्त इति नाम निरुक्तगोत्रः
शास्त्राब्धिचर्वणकलोद्यदगस्त्यगोत्रः।
तमथ ललितादित्यो राजा निजं पुरमानयत्।
प्रणयरभसात्कश्मीराख्यं हिमालयमूर्धगम् ॥
तस्मिन् कुबेरपुरचारि सितां शुमौलि-
साम्मुख्यदर्शनविरूढपवित्रभावे।
वैतस्तरोधसि निवासममुष्य चक्रे
राजा द्विजस्य परिकल्पितभूरिसम्पत् ॥

तस्यान्वये महति कोऽपि वराहगुप्तनामा बभूव भगवान् स्वयमन्तकाले।
गीर्वाणसिन्धुलहरीकलिताग्रमूर्धा यस्याकरोत् परमनुग्रहमाग्रहेण।।
तस्यात्मजः चुलुखकेति जने प्रसिद्धश्चन्द्रावदातधिषणो नरसिंहगुप्तः।
यं सर्वशास्त्ररसमज्जनशुभ्रचित्तं माहेश्वरी परमलङ्कुरुते स्म भक्तिः।।

एभिश्श्लोकैर्ज्ञायते यदभिनवगुप्तस्याऽत्रिगुप्तनामा कोऽपि पूर्वज आसीत्, ये राजा ललितादित्यः सप्रणयं निजं राज्यं कश्मीरं नीतवान्। तत्र क्वचिद् वितस्तातटे पुण्यभूमौ तदर्थं निवासं परिकल्प्य भूरिसम्पत्तिदानेन परितुष्टं चकार। तत्रैव दशमे ख्रिष्टाब्दे आचार्योऽभिनवगुप्तो जनिं लेभे। अस्य पितामहस्य नाम वराहगुप्त आसीत् पिता चास्य नरसिंहगुप्त आसीद् यो लोके 'चुलुखक' इति नाम्ना प्रथितो बभूव।

अपूर्वमेधासम्पन्नस्य प्रतिभावतोऽभिनवगुप्तस्य विद्याध्ययनाय महती रुचिर्बाल्यकालादेवासीत्। सोऽयं विद्याव्यसनी ज्ञानार्जनोत्सुकोऽभिनवगुप्तः यस्मिन् यस्मिन् शास्त्रे य यमाचार्यं प्रौढपाण्डित्ययुतं श्रृणोति स्म तं तं गुरुमुपसृत्य तन्निष्ठयाऽध्ययनं करोति स्म। एवं तस्योपाध्यायानां विशिष्टशास्त्रज्ञगुरूणां भूयसी संख्या सञ्जाता। अभिनवगुप्तस्य पितृपादो नरसिंहगुप्तः तस्य व्याकरणशास्त्रस्य गुरुरासीत्। एवमेव, वामनाथो द्वैताद्वैततन्त्रस्य, भूतिराजतनयो द्वैतवादिशैवदर्शनस्य, लक्ष्मणगुप्तः प्रत्यभिज्ञा-क्रम त्रिक्दर्शनानाम्, भट्टेन्दुराजः ध्वनिसिद्धान्तस्य, भट्टतौतो नाट्यशास्त्रस्य तथा च, भूतिराजो ब्रह्मविद्याया गुरव आसन्। एते आसन् प्रमुखा विशिष्टा गुरवः। एतदतिरिक्तमन्येषां त्रयोदशगुरूणामुल्लेखं कृतवान् शास्त्रनिष्ठो गुरुभक्त आचार्याभिनवगुप्तपादोऽस्मिन् श्लोके-

श्रीचन्द्रशर्मभवभक्तिविलासयोगानन्दाभिनन्दशिवशक्तिविचित्रनाथाः।
अन्येऽपि धर्मशिववामनकोद्भटश्रीभूतेशभास्करमुखप्रमुखा महान्तः।।

एषा विंशतिमिता संख्या गुरुवर्याणामभिनवगुप्तस्य विविधविद्यारुचिं प्रदर्शयति। शैशवावस्थायामेव तस्याभिनवगुप्तस्य जननी दिवङ्गता-'माता व्ययूयुजदमुं किल वाल्य एव।' अतः परमस्य जनको नरसिंहगुप्तोऽपि यममन्दिरं जगाम। प्रथमं माता ततः पितेति द्वयोरपि देहावसानेनाऽभिनवगुप्तस्य जीवनं सर्वथा परिवर्तितम्। संसाराद् विरक्तः सन् स गृहमेधमपि न स्वीचकार। तस्य साहित्यक्रीडापरा प्रवृत्तिर्निवृत्ता प्रवृत्ता चाध्यात्मिकी शिवभक्तिः। आजीवनं नैष्ठिकं ब्रह्मचर्यव्रतं परिपाल्य स प्रवृद्धे वयसि स्वकीयैः सहस्राधिकैः शिष्यैः सह भैरवगुहां प्रविष्टः पुनर्नागतः।

आचार्याभिनवगुप्तपादेन विरचितानां ग्रन्थानां संख्याऽतिभूयसी। ते ग्रन्था अधोलिखितास्सन्ति-

1. तन्त्रालोकः, 2. तन्त्रसारः, 3. अभिनवभारती, 4. ध्वन्यालोकलोचनम्, 5. बोधपञ्चदशिका, 6. परात्रिंशिकाविवृत्तिः, 7. भगवद्गीतार्थसंग्रहः, 8. परमार्थसारः, 9. भैरवस्तोत्रम्, 10. तन्त्रवटधानिका, 11. मालिनीविजयवार्तिकम्, 12. ईश्वरप्रत्यभिज्ञाविमर्शिनी, 13. ईश्वरप्रत्यभिज्ञाविवृत्तिविमर्शिनी (वृहती), 14. क्रमस्तोत्रम्, 15. देहस्थदेवताचक्रस्तोत्रम्, 16. परमार्थद्वादशिका, 17. अनुभवनिवेदनम्, 18. परमार्थचर्चा, 19, महोपदेशविंशतिका, 20. अनुत्तरशतिका, 212. तन्त्रोच्चयः, 22. घटकर्परकुलकविवृत्तिः, 23. क्रमकेलिः, 24. कथामुखटीका, 25. शिवदृष्ट्यालोचनम्, 26. पूर्वपञ्चिका, 27. पदार्थप्रवेशनिर्णयटीका, 28. प्रकीर्णकविवरणम्, 29. प्रकरणविवरणम्, 30. काव्यकौतुकविवरणम्,

31. लघ्वीप्रक्रिया, 32. देवीस्तोत्र-विवरणम्, 33. प्रकरणस्तोत्रम्, 34. नाट्यालोचनम्, 35. भेदवाद-विदारणम्, 36. तत्त्वार्थप्रकाशिका, 37. शिवशक्त्यविनाभावस्तोत्रम्, 38. बिम्बप्रतिबिम्बवादः, 39. परमार्थसङ्ग्रहः, 40. अनुत्तरशतकम्, 41. अनुत्तरतत्त्वविमर्शिनी। ग्रन्थाः केचिदत्र परिगणिता अलब्धाः सन्ति।

अत्र साहित्यग्रन्थेषु नाट्शास्त्रस्य टीकाऽभिनवभारती ध्वन्यालोकस्य च टीका लोचनमिति वर्तेते। तन्त्रागमशैवादिदर्शनग्रन्थेषु केचन बृहत्कायाः, केचनलघुकायाः केचन च लघुतमकायाः सन्ति। तन्त्रालोकादयो ग्रन्था बृहत्कलेवरा गूढार्थमयाः सन्ति। जिज्ञासुरप्यल्पमतिस्तं बोद्धुं न प्रभवति। अथ च, क्रमस्तोत्रानुत्तरराष्टिका परमार्थचर्चादयो ग्रन्थाः पद्यकतिपयैर्विनिर्मिता केवलं मूलसिद्धान्तप्रतिपादकाः जिज्ञासुतुष्टये नाऽलमित्यवेक्ष्याचार्याभिनवगुप्तपादो मध्यमस्थानां शैवदर्शनजिज्ञासापराणां कृते यदा मध्यमाकारं शैवदर्शनसिद्धान्तपरं ग्रन्थं निर्मातुमुद्यतोऽभूत्तदा तस्य दृष्टिः पतञ्जलिमुनिकृते वैष्णवाद्वैतसिद्धान्तप्रधानवस्तुमये परमार्थसारनाम्नि ग्रन्थे समाश्लिष्टा। अस्य ग्रन्थस्य निर्माणविधिः तस्मै भृशमरोचत। तं ग्रन्थं निरीक्ष्य परीक्ष्य च स स्वकीयं 'परमार्थसार' इति ग्रन्थं निर्मितवान् परमार्थसारानुसारेण महर्षिपतञ्जलिविरचितस्य तस्य परमार्थसाररस्य मूलं नामास्ति-'आधारकारिकाः' ग्रन्थकृतश्चाभिख्या वर्तते 'आधारः' (भगवान्)। आधारो नाम भगवान् शेषः तस्य चावताररूपतां गतो महर्षिपतञ्जलिः। अतो महर्षिपतञ्जलिना (भगवताऽऽधारेण इति) विरचिताः कारिकाः 'आधारकारिकाः' इति। इयमाधारकारिकाऽऽसीद् वैष्णवाद्वैतप्रतिपादिका। किन्तु महामाहेश्वरेण शैवाद्वैतसिद्धान्तानुरोधतस्तत्र तत्र यथाशास्त्रं परिवर्तनं विधाय तस्य परमार्थसारस्य (आधारकारिकायाः) किमप्यभिनवं रूपमभिनवकृतं शिवभक्तानां समक्षमुपस्थापितम्। आचार्योऽभिनवगुप्तपादः स्वयमेव तथ्यमिदं प्रकाशयति-

गर्भाधिवासपूर्वकमरणान्तकदुःखचक्रविभ्रान्तः।
आधारं भगवन्तं शिष्यः पप्रच्छ परमार्थम्॥
आधारकारिकाभिः तं गुरुरभिभाषते स्म तत्सारम्।
कथयत्यभिनवगुप्तः शिवशासनदृष्टियोगेन॥[1]

एवं प्राचीनस्य वैष्णवदर्शनस्य पाञ्चरात्रागमानुसारित्वात् पाञ्चरात्रागमानाञ्चशैवागमानुकारित्वात् तत्र पर्याप्तं साम्यं शैवदर्शनेन सहालोकितमाचार्येणाभिनवगुप्तपादेन। ततश्च तस्य परमार्थसारस्य (आधारकृतस्य/पतञ्जलिकृतस्य) प्रतिसंस्कारं विधाय तदेव शास्त्रं शैवशास्त्रत्वेनोपहृतं सुकुमारमतीनां जिज्ञासूनां साधकानां विदुषानाञ्च प्रीत्यर्थमिति प्रतिपादयन्ति शैवागमरताः साम्प्रतिका अपि सुधियो विद्वत्तल्लजाः।

आचार्याभिनवगुप्तकृतोऽयं परमार्थसारः शैवशास्त्रप्रवेशार्थिनां कृते मुख्यं द्वारमित्यवगन्तव्यम्। शिवाद्वैतप्रतिपादकेऽस्मिन् परमार्थसारे निरूपिता विषयास्त्वेवं सन्ति- परतत्त्वस्य निरूपणं, जगत्सृष्टिप्रकारः षट्त्रिंशत्तत्त्वनिरूपणं, बन्धमोक्षस्वरूपवर्णनं बद्धमुक्तसमीक्षणं, जीवन्मुक्तिनिरूपणं, क्रममोक्षप्रतिपादनं मोक्षोपायसङ्केतश्च। एते सर्वे विषया अत्र महामाहेश्वरेण अतीवसरलपद्धत्या सरलभाषया च सम्यक् प्रतिपादिता विराजन्ते।

---

1. परमार्थसारः, 2-3, श्रीरणवीरकेन्द्रीयसंस्कृतविद्यापीठम्, जम्मू, 1981 ई., पृष्ठ-11

पुरुषार्थचतुष्टये प्रथमे त्रयः पुरुषार्थाः धर्मार्थकामा साधनरूपाः मोक्षस्तुरीयः साध्यः। एष एव जीवस्य परमः पुरुषार्थः तथा च जीवनस्य चरमं प्रयोजनम्। शास्त्राणि मोक्षस्य मुक्तेर्वा स्वरूपमुपायांश्च प्रतिपादयन्ति। मोक्षस्य प्रकारा अपि बहुधा वर्ण्यन्ते। प्रायेण जिज्ञासा भवति- मुक्तस्य जीवस्य किं भवति? स कुत्र गच्छति? कथं तस्य पुनर्भवो निरुध्यते? एतत्सर्वं विचिन्त्य श्रीमदाचार्योऽभिनवगुप्तः परमार्थसारे मोक्षस्वरूपं प्रतिपादयति-

मोक्षस्य नैव किञ्चिद् धामास्ति न चापि गमनमन्यत्र।
अज्ञानग्रन्थिभिदा स्वशक्त्यभिव्यक्तता मोक्षः॥[1]

आचार्योऽत्र सहजतयाऽतीवसरलभाषया मोक्षस्य स्वरूपं निरूपयति। नास्त्यत्र कश्चिद् बौद्धिकाडम्बरो नापि काचित्प्रतिपादनजटिलता। सामान्योऽपि संस्कृतज्ञः कारिकायाः प्रतिपाद्यं बोद्धुमर्हति। एतदेव वैशिष्ट्यं परमार्थसारस्य। मोक्षो नाम न किमप्यनिर्वचनीयं वस्तु। सर्वे जानन्ति-'ऋते ज्ञानान्न मुक्तिः।' अर्थात्, ज्ञानं बिना तत्त्वज्ञानं विना मुक्तिर्मोक्षो न भवति। शैवदर्शनेऽप्येवमेव। मोक्षावाप्तये जीवेनावश्यमेव प्रयत्नः करणीयः। अस्याः कारिकाया अभिप्रायोऽस्ति यन्मुक्तस्य जीवस्यावस्थानाय किञ्चित् पृथक् लोकान्तरं नास्ति। धाम इति स्थलम्। नान्यत्स्थानम्। मुक्तो जीवः पृथिवीमुत्क्रम्य न क्वचिदुच्चतरं लोकमवस्थानाय गच्छति। वस्तुतस्त्वज्ञानमेव बन्धनं, यथार्थज्ञानं तत्त्वज्ञानं वा मोक्षः। जाते सत्यात्मसाक्षात्कारे जीवो मुक्तदशामनुभवति, मुच्यते। स पूर्वत एव विद्यमाने जीवलोके मर्त्यलोके वा वसन्नपि मानवदेहं धारयन्नपि मुच्यते, मुक्त इवाचरति। एवं हि नष्टेऽज्ञानेऽधिगते च ज्ञाने स्वस्वभावभूतायाः परमेश्वरतायाः प्रत्यभिज्ञैव मोक्षः सद्भिरुक्तः। एवं वक्तुं शक्यते यन्मुक्तौ न किञ्चिन्नूतनं साध्यतेऽपितु नैजमेव स्वरूपमविकलं प्रथते। उक्तं हि प्राञ्चैः-

यथोदपानकरणात् क्रियते न जलाम्बरम्।
सदैव नीयते व्यक्तिमसतः सम्भवः कुतः॥
भिन्ने दृतौ यथा वायुर्नैवान्यः सह वायुना।
क्षीणपुण्याघबन्धस्तु तथात्मा ब्रह्मणा सह॥[2]

तत्त्वज्ञानी जीवन्मुक्तो भवति। स परानुग्रहार्थं धृतविग्रहोऽपि मुक्त इति प्रतिपादयति परमार्थसारकरोऽभिनवगुप्तापादाचार्याः-

भिन्नाज्ञानग्रन्थिर्गतसन्देहः पराकृतभ्रान्तिः।
प्रक्षीणपुण्यपापो विग्रहयोगेऽप्यसौ मुक्तः॥[3]

विग्रहः शरीरम्। विग्रहयोगः शरीरसम्बन्धः। अयं शरीरसम्बन्ध एव बन्धः। तत्कथं शरीरसम्बन्धेऽपि मोक्षप्राप्तिः? सन्देहं निराकरोति कारिकाकारो महामाहेश्वरः अयं बन्धस्त्वज्ञानकृदेव। इदमज्ञानमेव ग्रन्थिः। यदायमज्ञानग्रन्थिर्भिन्नो विदारितस्तदा देहाद्यभिमानरूपो बन्धो विगलति। अनेन सह जीवो गतसन्देहो नष्टसंशयो भवत्यात्मानं प्रति। एवम् आत्मासाक्षात्कारे सञ्जाते भ्रान्तिः द्वयरूपो भ्रमोऽपि

1. परमार्थसारः, 60
2. तत्रैव, कारिका 60, योगराजाचार्यकृतटीकायाम्, पृष्ठ-83
3. परमार्थसारः, 61

निवर्तते न्यक्कृतो भवति। इत्थं संस्कारा विगलिता भवन्ति पापपुण्यान्यपि क्षीयन्ते। अर्थात् यानि-यानि बन्धहेतुभूतानि तानि सर्वाण्यपि विनश्यन्ति। अतः शरीरयोगेपि जीवो निर्मुक्तो भवति। उक्तं हि मोक्षशास्त्रकारैर्महर्षिभिः-

भिद्यते हृदयग्रन्थिः छिद्यन्ते सर्वसंशयाः।
क्षीयन्ते सर्वकर्माणि तस्मिन् दृष्टे परावरे॥ इति॥

अतोऽम्भसा पद्मपत्रमिव मुक्तजीवः संसारे वसन्नपि तेन स्पृष्टो न भवति। एवं स न बध्यते, मुक्त एव तिष्ठति।

अपि च, जीवन्मुक्तस्य विग्रहयोगेऽपि तेन शरीरयात्रामात्रार्थं तेन कृतं कर्म ज्ञानेद्धं तत्फलाय न सम्पद्यते इति प्रदर्श्यते समुपपत्तिः-

अगन्यभिदग्धं बीजं यथा प्ररोहासमर्थतामेति।
ज्ञानाग्निदग्धमेवं कर्म न जन्मप्रदं भवति ॥[1]

अत्र लौकिकदृष्टान्तेन तत्त्वज्ञानिनः कर्मफलाभावं समर्थयन्ति। यथा किञ्चिद् बीजं वह्निना भृष्टं क्षीणशक्तित्वादङ्कुरोत्पादने सामर्थ्यं न भजते, तथैव ज्ञानाग्निना भस्मीभूतं कर्म पुनर्जन्मने नालम्। तत्त्वज्ञानी आत्मसाक्षात्कारी जीवो जीवनप्रयोजनविरहेऽपि तावत्कालपर्यन्तं तच्छरीरं धारयते यावत्कालपर्यन्तं भोगैः प्रारब्धं कर्म न परिक्षीयते। एवं हि शरीरयोगेऽपि न जीवन्मुक्तिर्बाधते। अनन्तरं देहपातात्पूर्णो मोक्ष इति शास्त्राणि प्रमाणम्। श्रीमद्भगवद्गीतायां ज्ञानाग्निना सर्वकर्मदाह उक्त एव-

यथैधांसि समिद्धोऽग्निर्भस्मसात् कुरुतेऽर्जुन।
ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा॥[2]

अतः परमस्मिन् मोक्षप्रकरणे प्रतिपादितमपि वस्तु परमार्थसराकारो महामाहेश्वरः जिज्ञासूनां सम्यग्बोधाय शब्दान्तरैः पुनरपि समुपदिशति-

यदि पुनरमलं बोधं सर्वसमतीर्णबोद्धृकर्तृमयम्।
विततमनस्तमितोदितभारूपं सत्यसङ्कल्पम्॥
दिक्कालकलनविकलं ध्रुवमव्ययमीश्वरं सुपरिपूर्णम्।
बहुतरशक्तिव्रातप्रलयोदयविरचनैककर्तारम्॥
सृष्ट्यादिविधिसुवेधसमात्मानं शिवमयं विबुद्ध्येत।
कथमिव संसारी स्याद् विततस्य कुतः क्व वा सरणम्॥[3]

मन्ये, आचार्योऽत्र यद् ब्रवीति शिष्यानुपदिशति वा तत्सर्वमनुभवसिद्धम्। स आत्मसाक्षात्कारी तत्त्वज्ञानी जीवन्मुक्तो निर्जितसकलविकारो न्यक्कृतसंसारो भुवि प्रारब्धवशाद् विग्रहयोगः सन् विचरति। ''यद्यदाचरति श्रेष्ठः तत्तदेवेतरो जनः। स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते।'' इति गीतोक्तन्यायतस्तस्य किमपि करणीयं नास्ति। जीवनयात्रार्थं यत्करोति तत्कर्माचरणमन्येषां निदर्शनार्थमेव।

1. परमार्थसारः, 62
2. श्रीमद्भगवद्गीता, 4/37
3. परमार्थसारः, 64-66

अत्र शिष्याननुग्रहीतुं तेन महापुरुषेण यदुक्तं तिसृभिः कारिकाभिः तदाशयस्त्वेवम्-

आत्मसाक्षात्कारी तत्त्वज्ञानी सिद्धो महात्मा सर्वत्रात्मदर्शनभावादतः सर्वव्यापकत्वात्सर्वत्रोपस्थितः। ततः सोऽसीमः कुतः कुत्र कथं किमर्थञ्च सरणं कुर्यात्। यः सर्वव्यापी तस्य सरणं नाम किम्? सोऽबद्धो निर्मुक्तोऽपरिमितसंवित्स्वरूपः स्वात्मानं विश्वसमुत्तीर्णमद्वयं सर्वशक्तिसम्पन्नं सर्वकर्तृत्वापन्नं निस्सीमं देशकालादिनिरपेक्षं निर्विकारमविचलमविनश्वरं सर्वसामर्थ्यशीलं स्वतन्त्रं स्वात्ममहेश्वरं मन्येत। तस्य सकलकर्मध्वंसात्पुनर्जननं नावशिष्टम्। यावत्कालपर्यन्तं प्रारब्धवशाद् विग्रहयोगो वर्तते तावत्कालपर्यन्तं जीवमुक्तावस्थो विद्यते। देहपाते सति विदेहमुक्तिरूपतामधिगम्यैकधनशिवतामाप्नोति।

जीवन्मुक्तस्य कुतः कुत्र किमर्थं वा सरणम्? तस्य सरणं नैव भवति। तदुक्तं स्वच्छन्दशास्त्रे-

यत्र यत्र मनो याति तत्र तत्रैव धारयेत्।
चलित्वा कुत्र गन्तासि सर्वं शिवमयं यतः॥

एवमेव शैवोपनिषदि-

यत्र यत्र मनो याति बाह्ये वाभ्यन्तरे प्रिये।
तत्र तत्र शिवावस्था व्यापकत्वात् क्व यास्यति?॥

अत एव साधूक्तम् सत्यपि देहयोगे मुक्तस्य क्वचित् सरणं नास्ति।

अथ जीवन्मुक्तेन ज्ञानिना कृतं सफलं न भवति अर्थात्तस्य कर्मणः फलं स नाश्नुते, तत्तु शिवार्पणमेव-

इति मुक्तिभिरपि सिद्धं यत्कर्म ज्ञानिनो न सफलं तत्।
न ममेदमपि तु तस्येति दार्ढ्यतो नहि फलं लोके॥[1]

नाहं कर्तेत्यकर्तृभावेन ज्ञानिना कृतं सिद्धं निष्पन्नमपि कर्म तत्फलेन न युज्यते, पूर्वप्रतिपादितस्वरूपाभिरुपपत्तिभिर्ज्ञायते। यथा कोऽपि यजमानः पुरोहितेन यज्ञादिकं कर्म कारयति, स पुरोहित इन्द्राय-अग्नये-प्रजापतये स्वाहेति मन्त्रोच्चारणपूर्वकमाहुतिमग्नौ प्रक्षिपति, 'न ममेदमिति' परस्मैपदप्रयोगतः। तत्फलं यजमानायैव भवति न पुरोहिताय। एवमेवाऽत्रापि विमुक्तस्तत्त्वज्ञानी यद्यत्कर्म करोति, तत्तत्कर्मणः फलं नाप्नोति। यतो हि स विजानाति नेदं कर्मजातं ममाऽपितु तस्य शिवस्यैवेति। अतः कर्मफलत्वात्संसरणमपि तस्य नैवास्ति। एतदेवोक्तं श्रीमद्भगवद्गीतायाम्-

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम्॥[2]

इत्थं कर्म कुर्वन्नप्यफलाकांक्षी ज्ञानी आत्मज्योतिर्दीप्तो भवति-

इत्थं सकलविकल्पान् प्रतिबुद्धो भावनासमीरणतः।
आत्मज्योतिषि दीप्ते जुह्वज्ज्योतिर्मयो भवति॥[3]

1. परमार्थसारः, 67
2. श्रीमद्भगवद्गीता, 9.27
3. परमार्थसारः, 68

शैवसाधनायां ज्ञानयोगो भावनायोगोऽपि प्राप्यते। तत्र भावनासमीरणेन प्रदीप्ते आत्मतत्त्वहोमाग्नौ सकलमपि कर्मजातं हविरर्पयन् ज्ञानी स्वयमपि शुद्धात्मज्योतिः स्वरूपतां समधिगम्य शिवभावेऽधिगतदार्ढ्यो जीवन्मुक्तो भूत्वा ततश्च यथाकालं विदेहमुक्तिं लभते।

अपि च, स जीवन्मुक्तो ज्ञानयोगी अवशिष्टं जीवनकालं कथं यापयतीति सूचयति श्रीमदभिनवगुप्तपादाचार्यः-

अश्नन् यद् वा तद् वा संवीतो येन केनचिच्छान्तः।
यत्र क्वचन निवासी विमुच्यते सर्वभूतात्मा॥[1]

जीवन्मुक्तो ज्ञानी सर्वभूतात्मा भवति। सर्वात्माऽऽत्मनि सर्वभूतानि सर्वभूतेषु चात्मानमनुभवति पश्यति। सः शान्तमनाः यत्किमपि खादन् शरीरे किमप्यावरणं धारयन्न वा, यत्र कुत्रचिन्निवसन् सर्पो निर्मोकमिवानायासं देहं त्यक्त्वा विदेहमुक्तिं लभते। जीवनमुक्तावनियम इति। अन्ततश्च,

तीर्थे श्वपचगृहे वा नष्टस्मृतिरपि परित्यजन् देहम्।
ज्ञानसमकालमुक्तः कैवल्यं याति हतशोकः॥[2]

जीवन्मुक्तस्य देहत्यागे स्थानविवेको नास्तीति विशदयति संशयच्छेदी महामाहेश्वरः। यत्र कुत्रचिदपि पवित्रेऽपवित्रे वा स्थले देहपातो भवेत्, विदेहमुक्तौ न कश्चिद् भेदः। तत्स्थानं तीर्थं स्यादथवा चाण्डालगृहं स्यात् नान्तरं किञ्चित्। यतोहि स सर्वात्मा सर्वत्र सर्वं व्याप्य तिष्ठति। स तु आत्मज्ञानोदयकालेन सममेव मुक्तो जातः। अतः तस्येदं शरीरं व्यवहारप्रयोजनमात्रमेवावशिष्टम्। तस्य पातस्तु काष्ठ-लोष्ठपातवद् यत्क्वचिदपि पतेत्। देहपतनसमकालमेव स नष्टशोको हतसंसारभावः कैवल्यं याति विदेहमुक्तिं लभते। उक्तमेव श्रीनिर्वाणयोगोत्तरे-

हिमवति गङ्गाद्वारे वारणास्यां कुरौ प्रयागे वा।
वेश्मनि चाण्डालादौ शिवतत्त्वविदां समं मरणम्॥[3]

नष्टस्मृतिरित्यनेन शरीरं विस्मरणमुक्तं न त्वात्मविस्मरणम्। यथा हि श्रीमद्भगवद्गीतायां भगवता श्रीकृष्णेन प्रतिज्ञातम्-

अन्तकाले च मामेव स्मरन्मुक्त्वा कलेवरम्।
यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः॥[4]

आत्मसाक्षात्कारकृज्जीवः तत्त्वज्ञानसमनन्तरमेव व बन्धान्निर्मुक्तो विग्रहयोगेऽपि मुक्त एव भुवि तिष्ठति, न क्वचिदन्येषु लोकेषु तस्यावस्थानम्। यावत्कालपर्यन्तं प्रारब्धसंस्कारवशात्तस्य कायः तावत्कालं शरीरयात्रार्थं कर्मकुर्वन्नपि तत्फलं शिवार्पणं निवेद्य प्रहीणपापपुण्योऽन्ततो देहपाताद् विदेहमुक्तिं लभते इति परमार्थसारे मोक्षविचारसारः।

---

1. तत्रैव, 69
2. तत्रैव, 83
3. तत्रैव, 83 योगाराजाचार्यकृतटीकायाम्।
4. श्रीमद्भगवद्गीता, 8.5

अभिनवगुप्ताचार्यसम्मतं रसाभास-स्वरूपम्

म.म.देवर्षिकलानाथशास्त्री

आचार्याभिनवगुप्तपादानां यशोधवलिम्ना विशदीकृते भारतीये काव्यशास्त्रे रसाभासभावाभासौ, भावशान्तिभावोदयादयश्च ध्वनिकाव्यभेदेषु परिगणितत्वादुत्तमकाव्यत्वं बिभ्रतीति निर्विवादम्। इदमपि स्पष्टमवधेयं यत्सर्वेषाममीषामसंलक्ष्यक्रमध्वनिभेदानामेकत्रोल्लिखितत्वात्कस्योत्कृष्टतरत्वं कस्य वाऽपकृष्टतरत्वमिति न शक्यते वक्तुम्, सर्वेषामेषामविशेषेण सर्वसहृदयसंवेद्यत्वाद्धृद्यत्वाच्च। तथापि रसाभासपदस्य स्फोटे काचन न्यक्कृतिर्गर्भिता भवेदिति भ्रान्ता धीरद्यापि लौकिकभाषामात्रधनेषु पांसुलपादेषु द्रष्टुं शक्यते। ''सभायां तस्यां परस्परकलहवशाद् रसाभासः समजनि'' इत्यादिलौकिक-भाषावाक्येषु रसाभासपदस्य प्रवृत्तिनिमित्तं न्यक्कारगर्भमिति स्फुटमवगम्यते। कोऽत्र हेतुरिति विचार्यमाणे प्रथमं त्विदं प्रतिभाति यन्न्यायशास्त्रीयसंज्ञाया 'हेतु'रित्यस्या वैयधिकरण्ये हेत्वाभाससंज्ञायाः प्रयुक्तत्वादाभासपदार्थे हीनता अपकर्षो वा कश्चन बुद्धिविषयतामवतरीतुमारब्धवान्। दुष्टे हेतौ हेत्वाभासपदप्रवृत्तिर्न्यायशास्त्रे सुप्रसिद्धा–

अनेकान्तो विरुद्धश्चाप्यसिद्धः प्रतिपक्षितः। कालात्ययापदिष्टश्च हेत्वाभासस्तु पंचधा। तल्लक्षणं तु यद्विषयकत्वेन ज्ञानस्यानुमितिविरोधित्वं तत्त्वमिति। (न्यायसिद्धान्तमुक्तावली 2/71)

न खल्वेतस्योदाहरणस्यानुरोधने दुष्टे रसे रसाभासत्वप्रवृत्तिः शङ्कनीया, तथा सति तस्य ध्वनिकाव्यत्वहानेरपरिहार्यत्वात्। किन्तु ''मधु द्विरेफः कुसुमैकपात्रे पपौ[1] प्रियां स्वामनुवर्तमानः।'' इत्यादि कालिदासीयवसन्तवर्णनादौ सर्वेषामपि सहृदयानामलौकिकचमत्कारानुभूती रसनिष्पत्तिश्च निर्विवादा। किमित्येवंविधानि स्थलानि रसाभासपदवाच्यानि व्यपदिष्टानीति जिज्ञासा स्वाभाविकी।

अद्यत्वे पाठशालासु रसाभासादीनां यल्लक्षणं पाठ्यन्ते छात्रास्तस्य मूलं काव्य-प्रकाशीयेऽस्मिल्लक्षणे मृगयितुं सुशकम्–''तदाभासा अनौचित्यप्रवर्तिताः।'' अनौचित्यपदमिदमत्र कुत आगतमिति गवेषणे प्रतिभाति यदाचार्याभिनवगुप्तपादानुसारिणा मम्मटेनाभिनवगुप्तानामभिवनभारत्यां लोचने च तद्विनिर्दिष्टं पदद्वयमनुसृतम्–''अनौचित्येन तदाभासः।'' इति। कस्मिन् प्रसङ्गे पदद्वयमिदमवतरतीति ज्ञातुं सोऽयं सन्दर्भ उद्ध्रियते–''अनौचित्येन प्रवृत्तौ चित्तवृत्तेरास्वाद्यत्वे स्थायिन्या रसो व्यभिचारिण्या भावः, अनौचित्येन तदाभासः।'' ध्वन्यालोके लोचने प्रथमोद्द्योतेऽभिनवगुप्त-पादानामुक्तिरियम्। अभिनवगुप्तप्रयुक्तमिदं पदं परवर्तिभिराचार्यैर्लक्षणेष्वप्यनुसृतं, ततश्च तदिदमेव विमर्शपरम्पराया आद्यं प्रवर्तकमिति भाति। कोऽयमनौचित्यपदार्थः, कथं च सोऽयमाभासलक्षणेऽवातरदिति संप्रति विचार्यते।

---

1. कालिदासीये कुमारसम्भवे (3/36)

मुनिना भरतेनाभासाप्रसङ्गेऽनौचित्यपदं क्वचन प्रयुक्तं स्यादिति नोपलभ्यते। तेन तु शृङ्गाररसाभासस्थले शृङ्गारानुकृतिरिति पदं प्रयुक्तमस्ति किन्तु तद्व्याख्यानप्रसङ्गेऽभिनवगुप्तेनाभासस्यानुकृतेश्च पर्यायत्वं साधयता विनिर्दिष्टम्–"अतएव तदाभासत्वं वस्तुतस्तत्र स्थाप्यते, शुक्तौ रजताऽऽभासवत् अनुकृतिरमुख्यता, आभासवदित्येकोऽर्थः।" इत्थमभिनवगुप्तेनाभासं व्याचक्षाणेन अमुख्यता इति तद्व्याख्या कृता, शुक्तौ रजताभासस्योपमानमप्युद्धृतम्। आभासस्यार्थोपि तथाविध एव। शब्दकोषेनाभासस्य व्याख्यानं "प्रतिबिम्बादिवदवास्तवस्वरूपम्। इत्यादिरूपेण कृतमस्ति। सदृशः प्रतिबिम्बम् इति वेदान्तः (शब्दकल्पद्रुमे)। सर्वमिदमनुरुध्य रसाभासस्य सरला व्याख्या नूनमित्थमभिधातुमुचिता यस्मिंस्थले रत्यादेर्वस्तुसत्ता नास्ति किन्तु रत्यादिराभासते, आरोपवशात् कविप्रतिभयाऽसती अपि रत्यादेरुपस्थितिराभासते, प्रत्याय्यते प्रतिभास्यते वा तत्र रसाभासः। इदमेव मुनेस्तात्पर्यं भवेदिति तर्कशुद्धमनुमानम्। अतएवाभिनवगुप्तानामनुकृतिमाभासं च शुक्तौ रजताभासोपमानेन व्याचक्षाणानामपि सोयमेवाशय इति स्फुटीभवति।

"बालेन्दुवक्राण्यविकासभावाद्[1] बभुः पलाशान्यतालोहितानि" इत्यादिस्थलेषु 'मधुद्विरेफ' इत्यादिस्थलेषु वा तरुषु, वनस्थलीषु, भृङ्गेषु, मृगेषु वा रत्यादेरुपस्थतिरसती अप्यारोपविधया कविप्रतिभोपसंदृब्धा प्रतिभासते। आश्रमेवाऽऽलम्बने वा न तादृशी रतिरनुभाव-संचार्यादयो वा वस्तुत उपस्थिताः किन्तु कविप्रतिभाबलान्मानवीयभावनाऽऽरोपवशात्तादृशी प्रतीतिः सहृदयेषूद्भवन्ती रतिस्थायिनमुद्बोध्यास्वादविशेषं जनयति, रसनिष्पत्तिं च प्रवर्तयतीत्युत्तमकाव्यत्वमस्याः कालिदासोक्तः सर्वैरेवाङ्गीकृतमितीयं व्याख्या सर्वं तत्पदजातं सङ्गमयति। अस्या एवानुकृतेः, अनुपस्थितेः, असंभाव्यताया वा सङ्केतोऽनौचित्यपदेनापि कुत्रचन कृतोऽभिनवेन इति तत्पदविमर्शेन विशदीभवति।

अपरतश्चानौचित्यपदस्य सामान्योऽर्थः कश्चनान्य एतेति ध्वन्यालोकस्यास्यामुक्तौ द्रष्टुं शक्यते–

"अनौचित्यादृते[2] नान्यद्रसभङ्गस्य कारणम्। प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषत् परा।" अनौचित्यं प्रमुखं दूषणमिति स्फुटीकुर्वाणेनानन्दवर्धनेन सूचितमस्ति यद् यथैवानौचित्यप्रतीतिर्भवति त्वरितमेव रसभङ्ग उदेति। एवं च दुष्टत्वात्तस्य काव्यस्य, तत्र काव्यत्वमेव नोपसर्पति किं पुनरुत्तमकाव्यत्वम्? यद्यनौचित्यस्य रसाभासस्थलेऽपि सोऽयमेवाशयोऽभविष्यदाचार्याणां तर्हि ते रसाभासादीनां परिसंख्यानमुत्तम-काव्यत्वेन नैवाकरिष्यन्निति निश्चप्रचमेव।

अतएवाऽत्रास्माकमियं प्रतिपत्तिर्यत् प्रथमतो भरतेनशृङ्गारानुकृतिपदेन यादृशानि स्थलानि रसाभासादे सङ्केतितानि, तत्रानुकृतिराभास इत्यादिपदानां तात्पर्यं प्रतिबिम्बवत्, शुक्तौ रजताभासादिवद्वाऽसतोऽपि रत्यादेर्भावस्यानुभावानां सञ्चारिणां वा निबन्धनेऽभूत्, यतस्तदात्वे रसाभासादेर्लक्ष्यकाव्यानि (कालिदासकाव्यादिषूपलब्धानि) तान्येवाभूवन् येषु निश्चेतनेषु तिर्यगादिषु वा रसभावादीनां निबन्धनं कृतमभूत्, आश्रयेवाऽऽलम्बने वा रत्यादेः स्थितिर्न संभाव्याऽभूत् किन्तु कविप्रतिभानिबद्धत्वादाभासते स्म। तिर्यगादिषु, वृक्षादिषु च रत्यादेर्निबन्धने न हि गुरुपत्नीगतत्वसदृशं, बहुनायकविषयत्वसदृशं वा किञ्चिदनौचित्यम्। अभिनवगुप्तानामत्राऽऽशयो नूनमेवं भवेत्– अनौचित्यम् असंभाव्यत्वम्, वस्तुसत्ताया

1. तत्रैव (3/29)
2. ध्वन्यालोकस्य तृतीयोद्योते।

अभाव: आभासमात्रमिति यावत्। इत्थमसंभाव्यत्वस्यानुपस्थितेर्वा द्योतकेऽनौचित्यशब्दे परस्तात् धर्मशास्त्रविरुद्धत्वम्, अमर्यादितत्वम्, अगम्यागतत्वामित्यादयस्तेऽभिप्राया अयोज्यन्त येषां प्रथमत: कल्पना मन्ये न कृताऽभूद् भरतेनाभिनवगुप्तेन वा (तथासति तत्र काव्यत्वस्याप्रसक्त्यापातात्)।

अत्र प्रमाणानि–

अस्माकमस्मिन्निर्वचने बहूनि प्रमापकानि समुद्धर्तुं शक्यन्ते, तलस्पर्शिनामनेकेषामाचार्याणां च समर्थनेनेदं व्याख्यानं पुष्टिं लभते। तत्र केवलं दिङ्मात्रमुदाह्रियते–

यदि तिर्यग्गतेषु भावनिबन्धनेषु सर्वत्रैव रसाभास-भावाभसयो: स्थितिराचार्याणामभिमताऽभविष्यत् तर्हि रति-हासादिवत् तिर्यग्गतेषु भयक्रोधादिवर्णनेष्वपि रसाभास-भावाभासा व्यधास्यन्त। किन्तु ''ग्रीवाभङ्गाभिरामम्'' इत्यादि कालिदासीयं पद्यं सर्वत्र सर्वैरेव काव्यशास्त्रिभिर्भयानकरसोदाहरणत्वेन प्रस्तुतं न भयानकरसाभासोदाहरणत्वेन। भयस्थायिभावस्य तिर्यग्गतत्वेऽपि तत्र भयस्य वस्तुसत्त्वात्तस्यायं विषयो न रसाभासस्येति। इदं खल्वलङ्कारमहोदधिकारेण नरेन्द्रप्रभसूरिणापि स्पष्टीकृतमस्ति।

यद्यनुचितविभावालम्बनत्वस्य निर्वचनं निषिद्धविभावालम्बनत्वदिशा विधीयते तर्हि सेयमाशङ्का स्वाभाविकी यद्यथाऽनुचितविभावाश्रिता रत्यादयो भावश्च रसाभास-भावाभासत्वव्यपदेशभाजस्तथाऽनुचितविभावालम्बनाभावशालिर्भावोदयो भावसन्धिर्भावशबलता वा भावशान्त्याभास-भावोदयाभास-भावसन्ध्याभास-भावशबलताभासादिलक्ष्य पार्थक्येन किमिति नाम्नाता आचार्यै:? यदि च रसे एव केवलमाभासता सूपपादा तर्हि भावाभासस्यैव पार्थक्यने परिगणनं किमित्यावश्यकमापतितम्। मन्ये तादृशं सूक्ष्मसमीक्षणं भावाभासात्परतो न केनाप्युपक्रान्तम्। अस्त्यत्र कारणान्तरमपि। तिर्यक्षुजडपदार्थेषु वा रत्यादिष्वसत्स्वपि सादृश्यबलादारोपवशाद्वा तेषां प्रतिभास: कविना शक्य: कारयितुं किन्तु न खल्वचेतनेषु कुत्रापि भावोदय-भावशान्त्यादीनां संभव:, केवलं सत्त्वशालिषु मानवेष्वेव तेषां संभवात्, सत्त्वगतानामेषां सूक्ष्मभावविकाराणां तिर्यक्षु-वृक्षादिषु वा प्रतिफलनस्य प्रतिभासस्यापि वाऽसंभाव्यत्वात्। किन्तु निषिद्ध (अनुचित) विभावगतायां परकीयागतायां वा रतौ अनौचित्यप्रवर्तितायामपि सर्वेषामेव भावोदय-भावशान्त्यादीनां सर्वथा सर्वत्र संभव: केन वा नाभ्युपगम्येत? मानवसत्त्वाधिकरणत्वात्तेषा प्रत्युत परकीयागतेषु तादृशेषु भावेषु भावविकाराणामेषां प्रभूततरा संभाव्यता किन्तु न भावशान्त्याभासादय आम्नाता आचार्यै:? किमिति? यतो हि स्थलेष्वेवंविधेषु भावशान्ति-भावोदयादीनां वस्तुत: आश्रये सत्ता, उपलम्भश्च, न त्वारोपमात्रम्, अत एवंविधेषु स्थलेषु भावशान्ति-भावोदयादय एवाऽऽम्नातव्या न तु तेषामाभासा इति प्राचामाकूतं प्रतिभाति। इत्थं हि परकीयागतेषु रत्यादिष्वपि रसादय एवाऽऽम्नातव्या न रसाभासादय इति विचारक्षमं प्रतिभाति। नितरामनुचितस्थलनिबद्धायां, हेयायां गर्हितायां वा रतौ वर्णितायां रसनिष्पत्तेरभावादसंलक्ष्यक्रमव्यङ्ग्यरूपकाव्यत्वस्याप्यप्रसक्तेर्न काचित्कथा रसस्य वा रसाभासस्य वा।

समीक्षादृष्टि

इत्थं खल्वनौचित्यपदस्य रसाभासप्रसङ्गे प्रयोगं कृतवतोऽभिनवगुप्तस्य या विवक्षाऽभूत्तस्या निर्वचने तत्परवर्तिनामाचार्याणां व्याख्याने काचनेषद्विपरिवृत्ति: संजातेति तर्कशुद्धमनुमानं सामञ्जस्यमवगाहते।

इदं श्रीमदभिनवगुप्तानां भरतव्याख्याने स्फुटीभवति–''रावणकाव्याकर्णने शृङ्गाराभासः रत्याभासो हि सः। अतश्चाभासता येनास्य'' ''सीतामय्युपेक्षिका द्विष्टा वेति'' प्रतिपत्तिर्हृदयं न स्पृशत्येव। तत्स्पर्शे हि तस्याप्यभिलाषो विलीयते। न च ''मयीयमनुरक्ते''त्यपि निश्चयने कृतं, कामकृतान्मोहान्। अतएव तदाभासत्वं वस्तुतस्तत्र स्थाप्यते, शुक्तौ रजताभासवत्। एतच्च शृङ्गारानुकृतिशब्दं प्रयुञ्जानो मुनिरपि सूचितवान्। ''इति श्रीमदभिवनगुप्ताः स्पष्टं सङ्गिरन्ते येनाभासपदेन तद्विवक्षा का इति सूच्यते, एतेन चास्मत्कृता व्याख्या प्रकटं संगच्छतीति प्रमाणं मनीषिण एव। कामकृतान्मोहाद्रावणे रतिराभासते, आलम्बने सीतायां तु रतिर्नास्त्येव अत एवात्र रसाभासः शृङ्गाराभासः (शृङ्गारानुकृतिः) न तु शृङ्गारः इयत्राभासपदस्य सङ्गतिः।

केवलं समयविशेषस्य, समाजविशेषस्य, मर्यादाविशेषस्य वानुरोधने यत्र रत्यादेः प्रतिषेधः, यत्राऽगम्यात्वं, तत्र प्रवर्तमाना रत्यादय एवानौचित्यपदार्थस्य विषय उपगम्यते; तत्रैव रसाभासस्थलमभ्युपगम्यते चेत्तेन रससिद्धान्तस्य सार्वत्रिकतापि व्याहन्यते। अत एव रससिद्धानां समीक्षमाणैराधुनिकैर्विद्वद्भी रसाभासस्थलेऽनौचित्यपदस्य लक्ष्यतावच्छेदकमवलम्ब्य विविधाः शङ्काः समुद्भाविताः। हिन्दीभाषायां-'रससिद्धान्त'–ग्रन्थस्य[1] प्रणेता डॉ. नगेन्द्रो ब्रूते यन्नैतिकसिद्धान्तानुरोधमात्रेण कामं कतिपयानां कृते भवतु तत्र रसाभासो यत्र परकीयागता, बहुवल्लभगता वा रतिरूपनिबद्धा किन्तु येषु संप्रदायेषु परकीयाभाव एव भक्तेः साधनेषु स्वीकृतो, येषु समाजेषु बहुवल्लभता साधुत्वं बिभर्ति (पारसीकादि समाजेषु), तत्र किमित्ययं रसाभासः स्यात्? रस एवाभ्युपगन्तव्यः स्यात्। तर्हि नायं तात्त्विको भेद, औपाधिक एवेति प्रश्नानुद्भावयति सः। मार्क्ससिद्धान्तानुयायिनः काव्यशास्त्रविचारकाः (डॉ. विश्वंभरनाथोपाध्यायसदृशाः) अप्यनेनैव कारणेन्नात्र संशेरते यत्सार्वत्रिके सार्वदिके च रससिद्धान्ते देशकालविशेषमर्यादानुरोधनिबन्धना भेदावगमाः किमौचितीमावहन्ति? किन्त्वस्माकमियं व्याख्या नैवंविधानां शङ्कानां प्रसरणावसरं ददाति।

देशान्तर-साहित्य-समीक्षा–

यत्राऽसत्स्वपि भावेषु, मानवस्वभावारोपात्प्रकृतिगतजडपदार्थादिषु यत्रैवंविधा मानवीयभावकल्पना कविप्रतिभाबलात्समुतिष्ठति तत्र किञ्चिदलौकिकं चारुत्वं सर्वेषु देशेषु काव्यशास्त्रभिरभ्युपगम्यते इति भाषान्तरसाहित्यवेदिनां सुविदितम्। पाश्चात्यसाहित्य एवंविधान्याभासस्थलानि पैथेटिक फैलेसी Pathetic Fallacy इत्याख्यायन्ते। तत्रापि फैलसीशब्दो मिथ्याप्रतीतिवाचकः किन्तु नेयं मिथ्या-प्रतीतिर्हेयतामावहति, उपादेया हि सा। या स्थितिस्तत्र पैथेटिक फैलेसीस्थलस्य सैवात्र रसाभासस्येति स्फुटम्। एवंविधा आपाततो दोषाभिधानभाजः प्रत्यया गुणा एव, रसगङ्गाधरकृता जगन्नाथेनाख्याने सहृदयताख्यदोषपदे प्रयुक्तं दोषपदमिव। न खलु सहृदयता दोषः संभवति, गुणो हि सः। किन्तु न सा सार्वदिकी प्रकृतिः अत एव दोषपदेनाख्याता[2]। एवमेव रसाभासो न मनागपि न्यूनतरो रसात्, हेयो वा,

1. डॉ. नगेन्द्र, ''रससिद्धान्त'', पञ्चमेऽध्याये (घ) तदिदमपि ब्रूते यत् पारसीकादिसभ्यतासु परकीयागता रतिः ''शायरी'' त्यादिषु समुपनिबद्धा न रसाभासं जनयति, शृङ्गारस्यैवोदाहरणम्।
2. ''भारतीय काव्य शास्त्र का अध्ययन : डॉ. विश्वम्भरनाथ उपाध्याय (1979) सप्तम अध्याय रसवाद; ''रसाभास और रसकी असङ्गति'' पृ. 405

उत्तमं काव्यं हि तत्। तथापि हेत्वाभासपदसादृश्याद्रसाभासपदे काचिदपकर्षभावना भ्रमवशादुपसृप्ता येन नव्यव्यायपारदृश्वानः केचनाचार्या मनाक् तथापि सङ्केतयितुं विवशा अभूवन्।

रसविमर्शस्य मनीषी, काव्यशास्त्रसिद्धान्तानदीष्णः पंडितराजोजगन्नाथोऽपि हेत्वाभासोपमानाकृष्टदृष्टित्वादेव रसाभासस्थलानि रसापेक्षया मनाङ्न्यूनानीति किंचित्सङ्केतयति, यद्यपि मतमिदं स स्वकीयत्वेन न निर्दिशति, केषांचिदित्येव वक्ति- ''निर्मलस्यैव रसादित्वादित्येके'' इति व्याचक्षाणः। तथापि तदुदाहरणरेषु सर्वत्र धर्मशास्त्राद्यनुरोधेन निषिद्धालम्बनगतानां रत्यादीनामेव स्थलानि रसाभासस्थलानि निर्दिशता पण्डितराजेनानुचितविभावालम्बनत्वस्य निर्वचनं न तथा विहितमस्ति यथा भरतस्याभिनवगुप्तस्य चास्मदुद्धृतानां पदानामाशयः। यदि मूर्धन्यो मनीषी सोऽयमाभासपदवाच्यत्व-समीक्षकाणि तानि पदान्यपालोकिष्यत तर्हि तदेव निर्वचनपमभ्यरोचयिष्यदित्यस्माकमनुमानम्।

एवं हि मम्मटमारभ्य जगन्नाथपर्यन्तमनौचित्यपदस्य यद्व्याख्यानं प्रमुखैः कतिपयैराचर्यैर्विहितं, तस्मिंस्तत्पदगतो मूलाशयः परिवृत्तिं भजन् विलोक्यते। तथापि बहुभिराचार्यैराभासस्थलानि समीक्षमाणै-राभासस्यानौचित्यस्य च व्याख्या तमेवाशयं व्यञ्जनी कृतास्ति योऽस्माभिरत्र स्फुटीकृतः। तेन चास्माकं मतस्य प्रकटं समर्थनमवगम्यते।

काव्यप्रदीपटीकाकारो गोविन्दठक्कुरः,[1] चमत्कारचन्द्रिकाप्रणेता कविचन्द्रः, काव्यानुशासनकारो हेमचन्द्र, प्रभावृत्तिप्रणेता वैद्यनाथः, अन्ये च बहवो व्याख्यातार आभासपदस्यानौचित्यपदस्य च लक्ष्यतावच्छेदकं तेनैव पथा संकेतयन्ति योऽस्माभिर्निदर्शितः। सङ्केतटीकाकारो मणिक्यचन्द्रः, काव्यादर्शकारः सोमेश्वेरभट्टश्चापि आभासपदार्थमारोपसामानाधिकरण्येन व्याख्यातवन्तौ–''तेन निरिन्द्रियेषु तिर्यगादिषु चाऽऽरोपणात् तदाभासः'' (सोमेश्वरः)। अलङ्कारमहोदधिप्रणेत्रा नरेन्द्रप्रभसूरिणा तदिदमेव निर्वचनं समर्थ्यते–''तिर्यगादिष्विन्द्रियादिवर्जितेष्वपि च नायकत्वारोपाद् रसाभासा भावभासाश्च।'' काव्यशिक्षाकारो विनयचन्द्रसूरिरपि ''निरिन्द्रियेषु तिर्यगादिषु चारोपाद् रस-भावाभासौ'' इति ब्रुवाण आभासपदस्य प्रतिबिम्बरूपत्वमारोपत्वं च पाश्चात्य–''पैथेटिक-फैलेसी'' दिशैव निरूपयतीति बहूनां विचारकाणामस्मन्मतेन संवादः सिद्ध्यति। अनेन च स्पष्टीभवति यत् कथं मध्यकालिकैराचार्यै-रभिवनगुप्तपादाना''मनौचित्य''पदस्य तात्पर्यं सम्यङ् नावबुद्धं, तेन च भ्रान्तय उर्वरिता इति।।

---

1. काव्यप्रदीपकारो गोविन्दठक्कुरः कथयति ''तच्चैकाश्रयत्वे तिर्यगादिविषयतायाम् सङ्केतटीकाकारो माणिक्यचन्द्रो ब्रूते'' तथा निरिन्द्रयतरुलतातरुनदी शैकादेः सेन्द्रियपश्वादेश्च यः काव्ये कामादिव्यवहारस्तत्र रसभावाभासतैव।'' काव्यादर्शकारः सोमेश्वरभट्टो वक्ति–''आभासोऽनुकृतिरमुख्यतेति एकोऽर्थः। तेन निरिन्द्रियेषु तिर्यगादिषु चारोपणात् तदाभासः।'' अलङ्कारमहोदधिकारेण नरेन्द्रप्रभसूरिणा यदुक्तम् ''तिर्यगादिष्विन्द्रियवर्जितेष्वपि च नायकत्वारोपात् रसाभासा, भावभासाः। '' यथा च काव्यशिक्षाकारो विनयचन्द्रसूरिरपि ब्रूते ''निरिन्द्रियेषु तिर्यगादिषु चारोपात् रसभावाभासौ।'' एते आरोपमधारीकृत्याऽऽभासत्वं विवक्षन्ति, तादृश एवाऽभिगमः पाश्चात्येषु रस्किन-हडसन-प्रभृतीनां पैथेटिक फैलेसी सिद्धातं निरुक्तवतामस्तीत्याशयः। (रस्किनः ''मॉडर्न पेन्टर्स,'' खंड 3 भाग 4 The Pathetic Fallacy" रस्किन इमं विषयिगतं दोषं मनुते। आरोपमेवंविधं हडसनोऽपि समर्थयति (An Introduction to the Study of Literature : W.A. Hudson, Ch. III—The Study of Poetry).

अभिनवगुप्तस्य तन्त्रालोकः

(द्वितीयभागस्य परिप्रेक्ष्ये)

प्रो.हरेरामत्रिपाठी,
श्रीविनयगोपालत्रिपाठी

काश्मीरप्रदेशो भारतस्य शिरोभूषणं विद्यते। अनादिकालतो मातुः शारदायाः स्वच्छन्दविहारस्य विलासस्यानुभवं कुर्वन् वर्तते। हिमालयशिखरैः समावृत्तोऽयं प्रदेशः संस्कृतसाहित्यस्य भारतीयदर्शनस्य भारतीयसंस्कृतेश्च विकासे महत्त्वपूर्णं योगदानमकरोत्। महाभारते हरिवंशपुराणे च काश्मीरराज्ञां व्यक्तित्वं विश्वविश्रुतमस्तीति प्रतिपादितं विद्यते। आनन्दवर्धनः, कैय्यटः, भामहः महिमभट्टप्रभृतयः विद्वांसः संस्कृतसाहित्यशास्त्रस्य विकासे विलक्षणं योगदानमकुर्वनिति। एते सर्वे जम्मूकाश्मीरस्य निवासिनः आसन्। एवमुत्पलदेवः, क्षेमेन्द्रः, गोरक्षनाथः, जयन्त भट्टः, अभिनवगुप्तप्रभृतयः विश्वविश्रुताः विद्वांसः भारतीयदर्शनानां विकासे विशिष्टं योगदानं चक्रुः। आचार्याभिनवगुप्तपादानां चिन्तनं विश्वप्रसिद्धं वर्तते। भारतवर्षस्यैकत्वसम्पादनाय शैवदर्शनस्य विवेचनमभिनवगुप्तपादैः कृतमिति। एते महोदयाः भारतस्य कृते वा विश्वस्य कृते न अपितु समस्तजीवानां कृते मोक्षसम्पादयितुं सोपानं वा मार्गं दर्शितवन्तः। अस्य दर्शनं ब्रह्माण्डस्य कृतेऽपि उपयोगी वर्तते। आचार्याभिनवस्य चिन्तने भारतीयदर्शनस्य विभिन्नशाखानां साकारात्मकं संश्लेषणं वर्तते। चिन्तनेऽस्मिन् आगमनिगमशैवशाक्तयोगसौन्दर्यब्रह्मजगतां विवेचनमवलोक्यते। एतेषां दृष्ट्या जगदिदं शिवादभिन्नमस्ति। आचार्याभिनवगुप्तः साधकः श्रेष्ठदार्शनिकः शैवदर्शनस्य विशेषतः काश्मीर शैवदर्शनस्य विशिष्टः आचार्यः आसीत्। तेषां दर्शनं लोकस्य वेदानां तन्त्राणाञ्च सारतत्त्वं निरूपयति। विभिन्नमान्यतायाः समन्वयं निरूपयति। प्रत्यभिज्ञात्वेनाचार्यस्यावदानं समन्वयवादी समावेशी च विद्यते। वैश्वीकरणयुगे उपभोगस्य चरमावस्था विद्यते आत्मिकसुखाभावे सति प्रकृतेः विनाशकारित्वात् जगदिदं संयमितजीवनस्यान्वेषणे प्रवृत्तं विद्यते। आचार्याभिनव-गुप्तपादविरचित-प्रत्यभिज्ञादर्शनमतिविशिष्टं विद्यते। जम्मूकाश्मीरस्य भैरवगुहायामभिनवगुप्तपादः प्रविष्टवानिति किं वदन्ती विद्यते। वड्ग्रामस्य पार्श्वे गुहेयं विद्यते। पौषकृष्णदशमी तिथिः 1016 ख्रीष्टाब्दे गुहायां प्रविष्टवानभिनवगुप्तः। अभिनवगुप्तस्य तन्त्रालोकः विश्वविश्रुतो विद्यते। महापुरुषाणां शक्तयः पञ्च भवन्ति–1. भवे भक्तिम्, 2. तन्त्रसिद्धिम्, 3. तन्त्रनियन्त्रणम्, 4. कामदमनम्, 5. सकलशास्त्रज्ञानोदयञ्च। एताः पञ्चशक्तयः अभिनवगुप्तस्य पार्श्वे आसीत्। अभिनवगुप्तपादैः लिखिताः ग्रन्थाः अधोलिखिताः सन्ति।[1]

1. अनुत्तराष्टिका।
2. भट्टतौतकृतस्य काव्यकौतुकस्य विवरणम्।
3. क्रमस्तोत्रम्।
4. घटकर्परकुलंकवृत्तिः।

1. जम्मू काश्मीर शैव दर्शनस्य इतिहासः।

5. तन्त्रवटधानिका।
6. तन्त्रसारः।
7. तन्त्रालोकः।
8. देहस्थदेवताचक्रस्तोत्रम्।
9. ध्वन्यालोकलोचनम्।
10. नाट्यलोचनम्।
11. परमार्थचर्चा।
12. परमार्थद्वादशिका।
13. परमार्थसारः।
14. परात्रिंशिकाविवरणम्।
15. प्रकरणस्तोत्रम्।
16. प्रत्यभिज्ञाविमर्शिणी बृहतीवृत्तिः।
17. प्रत्यभिज्ञाविमर्शिणी लघुवृत्तिः।
18. बोधपञ्चदशिका।
19. श्रीमद्भगवद्गीता टीका।
20. भारतीयनाट्यशास्त्रटीका
21. भैरवस्तोत्रम्।
22. महोपदेशविंशतिः।
23. मालिनीविजयवार्तिकम्।
24. अनुभवविवेचनम्।
25. क्रमकेलिः।
26. प्रकरणविवरणम्।
27. प्रकीर्णविवरणम्।
28. पूर्वपञ्चाशिका।
29. कथामुखतिलकम्।
30. लघ्वीप्रक्रिया।
31. भेदवादविदारणम्।
32. तत्त्वध्वप्रकाशिका।
33. शिवदृष्ट्यालोचनम्।

इदानीम् अभिनवगुप्तपादानां द्वाविंशतिः ग्रन्थाः उपलभ्यन्ते। द्विचत्वारिंशत् ग्रन्थानां निर्माणमभिनवगुप्तपादैः कृतमिति केचन दार्शनिकाः वदन्ति।[1] माननीयाः सुरेशभैयामहोदयाः वदन्ति यत् पञ्चाशत् ग्रन्थानां कर्त्ता अभिनवगुप्तो विद्यते। तन्त्रालोकः, परात्रिंशिकाविवरणम्, परमार्थसारः, तन्त्रसारः, गीतार्थसङ्ग्रहश्चेति मुख्यग्रन्थान् रचितवान् अभिनवगुप्तपादाचार्य। ध्वन्यालोकलोचनटीकापि विश्वविश्रुता वर्तत इति। अभिनवगुप्तः मन्त्रसिद्धसाधकः भैरवस्यावतारभूतः आसीदिति केचन तस्यानुयायिनः वदन्ति। काश्मीरस्य प्राचीनाध्यात्मिकसांस्कृतिकविचारान् स्वीकृत्य तेषां नूतनरूपेण समयानुकूला व्याख्या तैः कृता इति। एते महापुरुषाः विश्वबन्धुत्वस्य कृते विश्वस्यैकत्वसूत्रे निबध्नाय च प्रत्यभिज्ञाशास्त्रस्य उद्भावनम् अकुर्वन्। विश्वस्य शान्तये आध्यात्मिकविषयकमुपदेशं निरूपयन्नाह–

मोक्षस्य नैव किञ्चित् धामास्ति न चापि गमनमन्यत्र।
अज्ञानग्रन्थिभिदा स्वशक्त्यभिव्यक्तता मोक्षः॥[2]

अभिनवगुप्तपादाचार्यस्य तन्त्रालोकः विश्वविश्रुतो विद्यते। यद्यप्ययं ग्रन्थः अतिविस्तृतो वर्तते। अष्टसु भागेषु विभक्तोऽयं ग्रन्थ तन्त्रस्य शैवदर्शनस्य च सारतत्त्वं प्रतिपादयति। अत्र त्रिकतत्त्वस्य सविस्तृतं निरूपणं विद्यते। शिवाद्वयवादस्यैवात्र निरूपणं विद्यते। तन्त्रालोकस्य प्रथमश्लोके मङ्गलाचरणं

---

1. जम्मू काश्मीर प्रवासी संगठन द्वारा निर्गत पत्र।
2. परमार्थसारग्रन्थस्य अंश।

कुर्वन्नाह-अभिनवगुप्तपादाचार्यः-

विमलकलाश्रयाभिनवसृष्टिमहा जननी
भरिततनुश्च पञ्चमुखगुप्तरुचिर्जनकः।
तदुभययामलस्फुरितभावविसर्गमयं
हृदयमनुत्तरामृतकुलं मम संस्फुरतात्।।[1]

अस्य श्लोकस्यार्थद्वयं विद्यते। अध्यात्मपक्षे श्लोकस्य अर्थस्तु शुद्धस्वातन्त्र्यशक्तिरूपा आद्यसृष्टेः जननी परविमर्शैकस्वभावकर्तृतालक्षणा अनन्योन्मुखतया स्वतन्त्रः शिवो जनकः जगदुत्पादयति।

शिवस्य स्वातन्त्र्यशक्तिरेव विश्वं प्रति समवायिकारणं भवति। अत एव जयरथोऽपि वदति-

''स्वातन्त्र्यस्यैव जगद्वैचित्र्यनिमित्तत्वमुक्तम्''

''अत एव भगवतश्चिदाद्यनन्तशक्तिसंभवेऽपि तत्स्फुरणमात्रत्वात् तासां तस्या एव प्राधान्यात् इहाभिधानम्।

तथाच **''तेन स्वातन्त्र्यशक्त्यैव युक्त इत्याञ्जसो विधिः''**[2] **शिवशक्तिसंघटनात्मकपरत्रिक एव जगतः कारणं भवति।**

शक्तिशक्तिमत्सामरस्यात्मा संघट्टः तस्मात् कस्यापि अपेक्षां विना स्वतः एव उल्लसितसत्ताकः यः असौ कलात्मकः विमलकलाश्रया शुद्धस्वातन्त्र्यशक्तिरूपा आद्यायां सृष्टौ जननी अथ च पञ्चमुखगुप्तरुचिर्जनकश्च वर्तेते। चिदानन्देच्छाज्ञानक्रियास्वरूपमुखाः भवन्ति तैः युक्तः शिव एव जनको भवति। एतौ द्वौ जगतः सृष्टौ सहारे च कारणे भवतः। अनाख्या भगवती संवित् स्वस्वातन्त्र्यात् स्वात्मनि सृष्ट्यादिकमवभासयति। अत एवोक्तम्-

यस्य नित्योदिया ह्येकाभासा कालक्षयंकरी
राजते हृदयाम्भोजविकासि गगनोदरे।।
सृष्टिस्थित्युपसंहाररूपा तद्भरणे रता।[3]

यद्वा विश्वं जनयति इति जननी परा परामेश्वरी सृष्ट्यादिचक्राद्या सा च शुद्धबोधमात्रस्वभावत्वात् सकलजगदाप्यायकारिपरामृतमयी भावसंहारं जनयति इति जनकः प्रमाता वामेश्यादिवाहशक्तीनां चक्षुरादीन्द्रियवृत्तिरूपैः द्वारैः तत्तद्विषयाहरणेन स्वावष्टम्भबलेन निखिलभावग्रसिष्णतया समुद्दीपितपरप्रमातृभावः अभिनवगुप्तस्य पिता सिंहगुप्तः विमलकालाभिधाना माता अभिनवगुप्तस्य सत्पुत्रस्य प्रसवेन कृतकृत्यतामापादयति। श्रीनरसिंहगुप्तविमलाख्यौ पितरौ प्रकारान्तरेण नमस्करोति ग्रन्थकारः। यद्यपि अभिनवगुप्तस्य प्रथमश्लोके शिवशक्त्योः वर्णनं विद्यते तथापि टीकाकारः शब्दानां माहात्म्यात् अभिनवगुप्तस्य मातुः पितुश्च निर्मलस्वरूपं निरूपितवान्। श्लोकेऽस्मिन् काश्मीरशैवदर्शने निरूपितस्य

1. तन्त्रालोक भाग-II, मङ्गलाचरणम्।
2. तन्त्रालोकविवेकटीका, पृष्ठ-6
3. तन्त्रालोक, भाग-2, पृष्ठ-9

परत्रिकस्यापि वर्णनं कृतवान्। तच्च शिवशक्तिसंघट्टात्मकमिति। अत एवोक्तम्–

तत्रापि शक्त्या सहितः स्वात्ममय्या महेश्वरः।

यदा संघट्टमासाद्य समापत्तिं परां व्रजेत्॥

अभिनवगुप्तस्य विषये प्रतिपादितं विद्यते–

नन्दन्ति पितरस्तस्य नन्दन्ति च पितामहाः।

अद्य माहेश्वरो जातः सोऽस्मान्संतारयिष्यति॥[1]

तस्यात्मजश्चुखुलकेति जने प्रसिद्ध

श्चन्द्रावदातधिषणो नरसिंहगुप्तः॥

शिवशक्तिसंघट्टात्मकपरत्रिकस्य निरूपणं प्रथमश्लोक एव अभिनवगुप्तेन कृतम्।

अनन्तरं परापरां देवी वा त्रिकस्वरूपमाह–

दीप्तज्योतिश्छटाप्लुष्टभेदबन्धत्रयं स्फुरत्।

स्ताज्ज्ञानशूलं सत्पक्षविपक्षोत्कर्तनक्षमम्॥[2]

अत्र ज्ञानपदम् इच्छाक्रियात्मकम् तथा च ज्ञानेच्छाक्रियास्वरूपं त्रिको वर्तते। जगत्सृष्टिनिमित्तं पारमेश्वरी इच्छाशक्तिः सिसृक्षारूपा, स्वातन्त्र्यरूपा शक्तिः भगवतः शिवस्य, क्रमात्मता=तत्तदनन्ताभास-संभिन्नं संकुचितात्मरूपं नरत्वम् इयं नरशक्तिः शिवात्मिका वर्तते।

त्रिकशास्त्रस्य वैशिष्ट्यं निरूपयति अभिनवगुप्तपादाचार्यः

दशाष्टादशवस्वष्टभिन्नं यच्छासनं विभोः।

तत्सारं त्रिकशास्त्रं हि तत्सारं मालिनीमतम्॥

परमेश्वरशिवस्य पञ्चशक्तयः सन्ति चिदानन्देच्छाज्ञानक्रियात्मकाः इति।[3] त्रिकशास्त्रन्तु क्रियाप्रधानं सिद्धातन्त्रम् ज्ञानप्रधानं नामकं तन्त्रम्। तदुभयमयं मालिनीमतमिति। परपरापरापरात्मकमपि त्रिकं भवति।[4] मोक्षस्य प्राप्त्युपायं प्रतिपादयन् वदति तन्त्रालोकटीकाकारः–''सर्ववादिनां मोक्ष एव उपादेयः तत्प्रतिपक्षभूतः संसारश्च हेयः, तस्य च मिथ्याज्ञानं निमित्तं, तत्प्रतिकूलञ्च तत्त्वज्ञानम् इति तत्साक्षात्कारेणैव अज्ञानापगमान्मोक्षावाप्तिः।[5] अत एव तन्त्रालोककारोऽपि वदति।

इह तावत्समस्तेषु शास्त्रेषु परिगीयते।

अज्ञानं संसृतेर्हेतुर्ज्ञानं मोक्षैककारणम्॥[6]

---

1. तन्त्रालोक, भाग-2, प्रथमाह्निकम्, पृष्ठ-13
2. तदेव, ।।4।। पृष्ठ-19
3. तदेव, पृष्ठ-38
4. तदेव, पृष्ठ-52
5. तदेव, पृष्ठ-54
6. तदेव, श्लो. ।।22।। पृष्ठ-54

न्यायनये अज्ञानं ज्ञानाभावस्वरूपं विद्यते अद्वैतवेदान्ते अज्ञानन्तु अविद्या वा माया इति तदपि मिथ्या वर्तते। यद्यपि न्यायनये तदभाववति तत्प्रकारकं ज्ञानमप्रमा वा। तच्चाज्ञानं अद्वैतनये त्रिगुणात्मकं, भावस्वरूपं, सदसद्भ्यां भिन्नम् अनिर्वचनीयञ्चास्ति। परन्तु अभिनवगुप्तनये अपूर्णं ज्ञानमज्ञानम्। तच्च तिमिरं पारमेश्वरस्वातन्त्र्यमात्रसमुल्लासितस्वरूपगोपनासतत्त्वमात्मानात्मनोः अन्यथाभिमानस्वभावमिति आर्णवमलरूपमेव। चेतयति इति चेतनः पूर्णज्ञानक्रियावान् तस्य भावः चैतन्यं, पूर्णज्ञानक्रियावत्त्वम् तदेव च परमैश्वर्यस्वभावं स्वातन्त्र्यमुच्यते। ज्ञप्तिः ज्ञानं, ज्ञायते येन इति व्युत्पत्त्या क्रियां, करणञ्च ज्ञानपदार्थः। अपूर्णज्ञानमज्ञानम्। अपूर्णत्वाच्च तदेव अपूर्णमन्यताशुभाशुभवासनाशरीरभुवनाकारस्वभाव-विविधसंकुचितज्ञानरूपतया मलत्रयात्माबन्धः बन्धरूपत्वादज्ञानं हेयमस्ति। अत एवोच्यते–

द्वैतप्रथा तदज्ञानं तुच्छत्वाद् बन्ध उच्यते।

तत एव समुच्छेद्यमित्यावृत्त्या निरूपितम्।।[1]

आणवमलं मायीयमलं कार्मणमलञ्चेति भेदेन मलं त्रिविधं विद्यते आणवमलात् शिवः स्वस्वातन्त्र्यशक्तितः संकुच्य स्वमणुं स्वीकरोति अनेकरूपञ्च धारयति। भिन्नवेद्यप्रथा वा भेदबुद्धिरेव मायीयमलमस्ति। शुभाशुभवासना एव कार्मणमलमस्ति।

अभिनवगुप्तेन ज्ञानस्य द्वैविध्यं प्रतिपादितम् पौरुषज्ञानं बौद्धज्ञानञ्चेते। (**ज्ञानाज्ञानस्वरूपं यदुक्तं प्रत्येकमप्यदः। द्विधा पौरुषबौद्धत्वभिदोक्तं शिवशासने।।**) कार्ममायीययोरपि प्रक्षयात् बन्धस्य क्षयो भवति। तदा परमचिदैकात्म्यस्य विकारस्वरं पराहन्ता विमर्शात्मकं निर्विकल्पकं कृत्रिमाहंकारादि विकल्पविलक्षणं ज्ञानं पौरुषं भवति। सर्वो ममायं विभवः इत्येवं रूपं बौद्धज्ञानं भवति।[2] अन्ये दार्शनिकाः यथा जीवन्मुक्तिः विदेहमुक्तिश्चेति भेदेन मुक्तेः द्वैविध्यं स्वीकुर्वन्ति तथैव अभिनवगुप्तोऽपि स्वीकरोति–

बौद्धज्ञानेन तु यदा बौद्धमज्ञानजृम्भितम्।

विलीयते तदा जीवन्मुक्तिः करतले स्थिता।।[3]

नव्यन्यायस्य प्रवर्तकः गङ्गेशोपाध्यायः द्वादशशताब्द्यां बभूव। न्यायस्य ये पारिभाषिकशब्दाः तत्त्वचिन्तामण्यामुपलभ्यन्ते। तेष्वन्यतमाः शब्दाः अभिनवगुप्तपादस्य तन्त्रालोके विद्यन्ते तेन प्रतीयते यदभिनवगुप्तस्य प्रभावः गङ्गेशोपाध्यायोपरि विद्यते। अथ च नव्यन्यायस्य केचन पारिभाषिकशब्दाः तन्त्रालोके विद्यन्ते ते इत्थं सन्ति।

समुच्छेद्यम्[4], अवच्छेदादवच्छेदान्तरम्[5], सर्वावच्छेदः[6], अवच्छेदैः, अपेक्षत्वम्[7], अवच्छिन्नता[8],

1. तदेव, श्लो. ।।30।। पृष्ठ–59
2. तन्त्रालोक भाग–II, प्रथमाह्निकम्, श्लो. 41, 42, पृष्ठ–78
3. तदेव, श्लो. ।।44।। पृष्ठ–81
4. तदेव, श्लो. ।।30।। पृष्ठ–59
5. तदेव, श्लो. ।।34।। पृष्ठ–71
6. तदेव
7. तदेव, श्लो. ।।35।। पृष्ठ–72
8. तदेव, श्लो. ।।65।। पृष्ठ–103

अवच्छेदः, व्यापकः[1], भावाभावः[2], स्वसमवायः[3], प्रमाणता[4], प्रामाण्यम्[5], विमुक्तता[6], आत्मत्वस्वभावः[7] स्त्रक्ष्यमाणता[8], उपयोगिता[9], चिदात्मता[10], प्रकाशत्वम्[11], परिच्छेदश्चेति।[12]

एवमन्येऽपि पारिभाषिकशब्दा अभिनवगुप्तस्य तन्त्रालोके विद्यन्ते। तथाचेदं वक्तुं शक्यते यदाचार्याभिनवगुप्तस्य प्रभावो वर्तते वा अभिनवगुप्तपादैः येषां पारिभाषिकशब्दानां प्रयोगः तन्त्रालोके कृतः तेषामुपयोगः गङ्गेशोपाध्यायेन तत्त्वचिन्तामणौ सम्पादितः।

वैशेषिकदर्शने सप्तपदार्थाः सन्ति। द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः। एतेषु अन्यतमः पदार्थः गुणः, सामान्यञ्च विद्येते उभयोः विवरणं तन्त्रालोके विद्यते। तन्त्रालोकटीकाकारोऽपि जयरथो वदति ''द्विविधो हि धर्मः पदार्थस्य प्राणप्रदो विशेषाधानहेतुश्च। आद्यो यथा सामान्यं नहि गोत्वमन्तरेण गौः गौरेव भवति। द्वितीयो यथा गुणः, शुक्लादिर्हि लब्धसत्ताकं वस्तु विशिनष्टि। एवमिह आत्मैव तत्त्वसमूहस्य प्राणप्रदत्वात् स्वभावभूतोधर्मः अत एव अनपायवान् नित्याविमुक्तः इत्युक्तम्।''[13]

ग्रामशब्दस्य[14] प्रयोगः तन्त्रालोके समूहार्थे उपलभ्यते तेन प्रतीयते आचार्याभिनवगुप्तः ग्रामीणोऽपि आसीत्। जनानां समुदायः यत्र वसति स च ग्राम एव भवति इति।

वैशेषिकदर्शने भावाभावभेदेन पदार्थस्य द्वैविध्यं प्रतिपादितं विद्यते अनयोः स्मरणं केनचित् व्याजेन करोति आचायाभिनवगुप्तपादः **''प्रकाशावस्थितं ज्ञानं भावाभावादिमध्यतः।''**[15] **दाशरथिपुत्रः रामः परमेश्वरः आसीदिति** भारतीयाः वदन्ति। अथ च रामशब्दस्य प्रयोगः पुराणेष्वपि परमेश्वरार्थे एव कृतो विद्यते। आचार्याभिनगुप्तोऽपि सर्वेषु जीवेषु विद्यते रामः स च परमात्मा वर्तत इति निरूपयति।[16] रमते तत्तज्जडाजडात्मना विश्ववैचित्र्यात्मना क्रीडति इति रामः परमात्मा तत्र तिष्ठति

---

1. तदेव, श्लो. ।।88।। पृष्ठ-132
2. तदेव, श्लो. ।।90।। पृष्ठ-135
3. स्वसमवायिभिः तदेव, श्लो. ।।198।। पृष्ठ-224
4. तदेव, श्लो. ।।228।। पृष्ठ-247
5. तदेव, श्लो. ।।228।। पृष्ठ-247
6. तदेव, श्लो. ।।237।। पृष्ठ-253
7. तदेव, श्लो. ।।252।। पृष्ठ-265
8. तदेव, श्लो. ।।268।। पृष्ठ-277
9. तदेव, श्लो. ।।301।। द्वितीयाह्निकम् तन्त्रालोक II
10. तदेव, श्लो. ।।71।। द्वितीयाह्निकम्, पृष्ठ-435
11. तदेव, श्लो. ।।101।। द्वितीयाह्निकम्, पृष्ठ-462
12. तदेव, श्लो. ।।129।। द्वितीयाह्निकम्, पृष्ठ-462
13. तन्त्रालोकः जयरथ टीका, पृष्ठ-124
    तत्त्वग्रामस्य सर्वस्य धर्मः स्यादनपायवान्।
    आत्मैव हि स्वभावात्मेत्युक्तं श्री त्रिशिरोमते ।। त.भा.-II प्र.आ. ।।82।।, पृष्ठ-123
14. हृदिस्थं सर्वदेहस्थं स्वभावस्थं सुसूक्ष्मकम्।
    सामूह्यं चैव तत्त्वानां ग्रामशब्देन कीर्तितम् ।। त.भा.-II, प्र. आ. 1 ।।83।।, पृष्ठ-123
15. तन्त्रालोक भाग-1, प्रथमाह्निकम् ।।84।।, पृष्ठ-124
16. उर्ध्वं त्यक्त्वाधो विशेषस्रामस्थो मध्यदेशगः।। त.भा.-II, प्र. आ. ।।86।।, पृष्ठ-130

तद्रूपतया परिस्फुरति'' इति जयरथोऽपि वदति। अत एवोच्यते-

सेव्यमानमधोर्ध्वं तु प्राणापानोत्थरूढधीः।
उर्ध्वं त्यक्त्वा तु प्रविशेत् रामस्थोऽत्रात एव च॥[1]
रामः किमुच्यते देव योऽस्थः स च कः प्रभो।
तस्याभ्यासः कथं नाम ब्रूहि सर्वं महेश्वर:॥[2]

रामः परममहान् व्यापकश्च विद्यते इति आचार्यः भणति।

''एष रामो व्यापकोऽत्र शिवः परमकारणम्''[3]

सकलविश्वावभासनक्रीडापरः परमात्मा परमेश्वर एव रामः, स च शिवः एव विद्यते। शिवस्य अपरं नाम महाभैरवदेवोऽपि अस्तीति तन्त्रालोके निरूपितमस्ति।[4] बिभर्ति इति भैरवःधारयति पोषयति च स्वात्मभित्तिसंलग्नत्वेन इति भैरवः। विश्वेन भ्रियते धार्यते पोष्यते च इति भैरवः भरणात् रवणाच्च भैरवः भीरूणामयं हितकृत् इति भैरवः। भीरूत्वे च निमित्तं संसारः तेन संसारिणामभयप्रदः इति।[5] भयं भीः संसारत्रासः तया जनितो योऽसौ रवः भगवद्विषय आक्रन्दः परामर्शो वा ततः जातः इति भैरवः। भवाद्भयं भीः तस्य रवो विवेचनं विमर्शनं तस्य शक्तिपातमुखेन अयं कारणमिति भैरव।: संसारवैमुख्येऽपि अयमेव निमित्तम्। भानि नक्षत्राणि ईरयति प्रेरयति इति भेरः कालः तस्य तत्त्वं क्षणाद्यात्मकं स्वरूपं तस्य सम्यङ् निःशेषेण शोषम् अभिभवं कुर्वन्ति इति कालं वायन्ति इति भेरवाः कालग्राससमाधिरूढावधाना योगिनः तेषु अयं स्वामी तत्त्वेन प्रकटः स्फुरितः इति भैरवः। संकोचिते भेदप्रथामयस्य पशुजनस्य भिये तत्तत्सुखदुःखाद्युपजननत्रासाय रवणं शब्दराशिसमुत्थकादिकलाविमर्शमयो रवो यासां ताः स्वकरणदेव्य इन्द्रियशक्तयः तथा अन्तर्बहिः प्रमातृप्रमेयाद्यात्मा चतुर्विधः चतुष्प्रकारः खेचर्यादिको गणः खेचरी-गोचरी-दिक्चरी-भूचर्यो भीरवास्तासामयं स्वामी भैरवः[6] महाभीमपदवाच्य इति। भैरवः शिव एव अत्र आगमेष्वप्युक्तम्–

---

1. ''त्रिशिरोभैरवे'' त.भा.-II, पृष्ठ-131
2. आगूरणेन भगवत्या त., पृष्ठ-131
3. बुद्धिभेदास्तथा भावाः संज्ञाः कर्माण्यनेकशः।
   एष रामो व्यापकोऽत्र शिवः परमकारणम् ॥ त.भा.-II, प्र. आ. 1 ।।88।।
4. देवो ह्यन्वर्थशास्त्रोक्तैः शब्दैः समुपदिश्यते।
   महाभैरवदेवोऽयं पतिर्यः परमः शिवः ॥ त.भा.-II, प्र. आ. 1 ।।95।।
5. विश्वं बिभर्ति पूरणधारणयोगेन तेन च भ्रियते।
   सविमर्शतया खरूपतश्च संसारभीरुहितकृच्च ॥
6. संसारभीतिजनिता द्रवात्परामर्शतोऽपि हृदिजातः।
   प्रकटीभूतं भवभयविमर्शनं शक्तिपाततो येन ॥ त.भा.-II, प्र. आ. 1 ।।97।।
   संकोचिपशुजनभिये यासां रवणं स्वकरणदेवीनाम्।
   अन्तर्बाहिश्चतुर्विध-खेचर्यादिकगणस्यापि ।।99।।
   तस्य स्वामी संसारवृत्तिविघटनमहाभीमः।

भ्रियात्सर्वं खयति सर्वदो व्यापकोऽखिले।

इति भैरवशब्दस्य सततोच्चारणाच्छिवः।।

भरणाद्भरितस्थितिः।

शिवः देवोऽप्यस्ति। देवस्य अनेके अर्थाः भवन्ति। देव्यति क्रीडति इति देवः। तेन दीव्यति विजिगीषते इति देवः। तेन दीव्यति व्यवहरति इति देवः। निखिलस्य प्रमातृप्रमेयात्मनो निखिले चास्य यदवभासनं तत् द्योतनं तेन दीव्यति द्योतते द्योतयति इति वा देवः। तेन दीव्यति स्तूयते इति देवः। तेन दीव्यति जानाति प्रसरति च इति वा देवः। समस्ता पूर्णा विमर्शलक्षणा क्रिया प्रकृता यस्यासौ, दृक्क्रियते गुणः शक्तिर्यस्यासौ यतोऽयमेवंविधः ततोऽस्य गतिः विशेषानुपादानात् सर्वत्र ज्ञानं प्रसरणं च इति सर्वज्ञः सर्वव्यापकश्च देवः शिवो विद्यते। गुरोः स्वरूपं तन्त्रालोके प्रतिपादितं विद्यते। ज्ञानयुक्तत्वात् द्योतनस्वभावः सर्वेषां पूज्यः, यः यथा आदिं विन्दति तथैव आन्त्यं विन्दति अथ च योगिसंघस्य स पूज्यो भवति सर्वान् प्रति दोषरहितमनुग्रहञ्च करोति। सर्वान् शिष्यान् वरं ददाति पुत्रवत्पालयति च सर्वत्रैव तस्य अर्चना भवति स च ज्ञानी साधकोत्तमः यतिः पण्डितः भैरवेशः देवता चेति भवति। अत एव आचार्यो वदति–

गुरोर्लक्षणमेतावदादिमान्त्यं च वेदयेत्।

पूज्यः सोऽहमिव ज्ञानी भैरवो देवतात्मकः।।[1]

श्लोकगाथादि यत्किञ्चिदादिमान्त्ययुतं जानाति तथाच निरतिशयज्ञानवान् स भवति। आचार्यनये सम्बन्धः त्रिविधो भवति दिव्यः मिश्रः अदिव्यश्चेति भेदात् स च सम्बन्धः परमेशस्यैव अत एवोच्यते–

सम्बन्धः परमेशानि सर्वः परकलामयः।

महानवान्तरो दिव्यो मिश्रोऽदिव्यश्च तत्परः।।[2]

तन्त्रालोकस्य प्रयोजनं प्रथमाह्निकस्य अन्ते उच्यते अभिनवगुप्तेन–

इति ज्ञानचतुष्कं यात्सिद्धिमुक्तिमहोदयम्।

तन्मया तन्त्यते तन्त्रालोकनाम्न्यत्र शासने।।[3]

तन्त्राणां पारमेश्वराणाम् आलोक एव आलोकः तानि आलोकयति, प्रकाशयति इति वा जयरथोऽपि वदति। सिद्धिमुक्त्योः महान् उदयः अस्मिन् इति महोदयम्, महोदयमत्र तन्त्रालोके शासने तन्त्र्यते विस्तरेण प्रकाश्यते अत्र। न्यायशास्त्रे प्रमेयेषु सर्वेषां पदार्थानामाविर्भावः भवितुमर्हति तथापि लोकव्यवहारे न्यायशास्त्रस्योपयोगित्वात् संशयादीनां पदार्थानां पृथक्पदार्थत्वेनोल्लेखः कृतः इति अत्रापि संशयस्य उल्लेखो वर्तते।

---

1. तन्त्रालोक भाग-2, आ. 3 ।।224।।
2. तन्त्रालोक भाग-2, आ. 3 ।।224।। पृष्ठ-284
3. तन्त्रालोक भाग-2, आ. 3 ।।245।। पृष्ठ-258

तत्र नानुपलब्धेऽर्थे न निर्णीते प्रवर्तते।

किंतु संशयिते न्यायस्तदङ्गं तेन संशयः॥[1]

आचार्याभिनवगुप्तेनोक्तम्–

स्थाणुर्वा पुरुषो वेति न मुख्योऽस्त्येष संशयः।

भूयस्थधर्मजातेषु निश्चयोत्पाद एव हि॥[2]

तन्त्रालोके ज्ञानस्य त्रैविध्यं प्रतिपादितमिति भेदप्रधानमाणवम् भेदाभेदप्रधानं शाक्तम् अभेदप्रधानं शाम्भवञ्चेति। अत एवोच्यते–

वस्तुतो हि त्रिधैवेयं ज्ञानसत्ता विजृम्भवे।

भेदेन भेदाभेदेन तथैवाभेदभागिना॥[3]

अत एवोक्तमभिनवगुप्तपादैः–

अभेदोपायमत्रोक्तं शाम्भवं शाक्तमुच्यते।

भेदाभेदात्मकोपायं भेदोपायं तदाणवम्॥

अत्र ''ज्ञानं मोक्षैककारण'' मित्यनेन मोक्षे ज्ञानस्य हेतुत्वमुक्तं भवति। गुप्तपादैरुक्तं–''सम्यग्ज्ञानं[4] च मुक्त्येककारणं मोक्षदशायां स्वसंविदेकात्मत्वेन परामर्शः तावदयम् एक एव प्राप्तपरप्रकाशैकात्म्यः परिस्फुरति। तन्त्रालोकः वस्तुतः तन्त्राणां विश्वकोशो वर्तते। अत्र तन्त्रस्य ये आगमाः सन्ति तेषां सर्वेषामथ च भारतीयदर्शनानां पूर्वोत्तरपक्षरूपेण विवरणमुपलभ्यते तेन प्रतीयते ग्रन्थोऽयमभिनवगुप्तस्य भारतीयजनानां वा वैश्वीकरणयुगे विश्वस्य सर्वेषां जनानां कृते महदुपयोगी वर्तत इति।

---

1. तन्त्रालोक भाग-2, आ. 3 ॥224॥ पृष्ठ-258
2. तन्त्रालोक भाग-2, आ. 3 ॥224॥ पृष्ठ-262
3. तन्त्रालोक भाग-2, आ. 3 ॥224॥ पृष्ठ-248
4. तन्त्रालोक भाग-2, आ. 3 ॥233॥ पृष्ठ-250

अभिनवगुप्तपादस्य परमार्थसारे परमार्थः मोक्षतत्त्वञ्च

डॉ.शिवशङ्करमिश्रः

आचार्याभिनवगुप्तपादः दशमशताब्द्याः मध्यसमये प्राय 950 ईस्वीतः 960 ईस्वीमध्ये तन्त्रसाधनासुविख्याते विद्वत्कुले शारदाभूमौ कश्मीरप्रान्ते जन्म लेभे। एतेषां पितामहः वराहगुप्ततनाम्ना सुप्रसिद्धः। पितृपादः श्रीनृसिंहगुप्तमहाभागः अत्यन्तं मेधावी परमशिवभक्तश्चासीत्। श्रीमती विमलादेवी मातृपदभाजा परमसाध्वी धर्मपरायणा चासीत्। इयं खलु अभिनवगुप्तस्य वाल्यावस्थायां दिवंगता। अभिनवगुप्तपादानामासीत् महती गुरुपरम्परा। पृथक्-पृथक् शास्त्रेषु ये खलु तदानीमुपकश्मीरं कश्मीरे वा विशिष्टाः पारंगता आचार्याः त एव गुरवोऽभिवनवगुप्तपादस्य। यथा भगवान् दत्तात्रेयः स्वजीवने बहून् गरून् अङ्गीकृतवान् तथैव अभिनवगुप्तपादानामपि जीवने विविधशास्त्राणां पृथक्-पृथक् प्रायः विंशतिसंख्याकाः गुरवः सुविख्याताः। एभिः शब्दशास्त्रस्य व्याकरणास्याध्ययनं पूज्यपादानां पितृचरणानां श्रीनृसिंहगुप्तमहाभागानां सकाशं कृतम्। गुरोः आचार्यवामनाथाद् द्वैताद्वैतन्त्रम्, आचार्यभूतिराजतनयाद् द्वैतवादीशैववादः, आचार्यशम्भुमहाशयात् कौलसम्प्रदायोचितसाधनायाः ज्ञानम्, आचार्यलक्ष्मणगुप्तमहाशयात् प्रत्यभिज्ञादर्शनं त्रिकदर्शनं, आचार्यमहेन्द्रराजाद्ध्वनिः, आचार्यभट्टतौतान्नाट्यशास्त्रमधीतम्। गुरुणा दृष्टं यदभिनवः असाधारणप्रतिभासम्पन्नः कुशाग्रबुद्धिविशिष्टः, अस्य धारणक्षमता अतीव तीव्रा, शास्त्र- प्रतिपादनेऽप्ययमत्यन्तं दक्षः अतः **सर्वाचार्यः** इत्युपाधिनाऽयं विभूषितः। अनन्तरमुत्कृष्ट शैवतत्त्वचिन्तनत्वाद् **महामहेश्वराचार्यः** इति रूपेण एतेषां प्रसिद्धिः सञ्जाता।

भारतीयज्ञानपरम्परायामाचार्याभिनवगुप्तस्य विद्यतेऽनन्तं महत्त्वम्। यथा समग्रे भारते सर्वज्ञपीठरूपेण शारदादेशस्य कश्मीरस्य वैशिष्ट्यं सुप्रसिद्धं तथैव सम्पूर्णस्य भारतवर्षस्य प्रसिद्धासु ज्ञानविधासु अभिनवगुप्तपादस्य मूर्ध्नि स्थानं विराजते। कश्मीरस्तावन्न केवलं शैवदर्शनस्य जन्मप्रान्तमपितु अत्र बौद्धदर्शनस्य, मीमांसादर्शनस्य, न्यायदर्शनस्य, तन्त्रसाधनायाः सूफीपरम्परायाश्चापि महान् प्रभावो द्रष्टुं शक्यते।

आचार्याभिनवगुप्तपादः उत्कृष्टसाधकः श्रेष्ठदार्शनिकः, कश्मीरशैवदर्शनास्याचार्यः आसीत्। अस्य दार्शनिकसिद्धान्तेषु शैवदर्शनस्य शाक्तदर्शनस्य च चारुसमन्वयो द्रष्टुं शक्यते। एतस्य दार्शनिकं चिन्तनं लोकस्य वेदस्य तन्त्रस्य चैतेषां त्रयाणां संस्पर्शं करोति। असौ यथा दार्शनिकस्तथैव साहित्यिकोऽप्यासीत्।

व्याकरणभाष्यकारः भगवान् पतञ्जलिः यथा शेषावतारस्तथैव आचार्याभिनवगुप्तपादोऽपि शेषावतार इति प्रसिद्धिः, एतन्मण्डनाय परमार्थसारस्य द्वितीये श्लोके **''आधारम्''** इति विशेषणं प्रदत्तम्–

गर्भाधिवासपूर्वकमरणान्त दुःखचक्रविभ्रान्तः।
आधारं भगवन्तं शिष्यः पप्रच्छ परमार्थम्।।[1] इति।

आचार्याभिनवः भारतीयज्ञानपरम्परायाः दार्शनिकवाङ्मयस्य च समीक्षक इति मन्यते। तेन ज्ञानस्य विविधाः शाखाः संस्पर्श्य आगमाद्वैतं प्रत्यभिज्ञानदर्शनञ्च व्याख्यातम्। असौ खलु समन्वयवादी दार्शनिक इति स्वीक्रियते, यतः ज्ञानस्य साधनायाश्च विविधाः शाखाः समेकीकृताः। एतेषां चिन्तने निगमागमयोः, शैवशक्त्योः, योगसौन्दर्ययोः जीवजगतोश्च समन्वयः सम्प्राप्यते। अतएव प्रत्यभिज्ञादर्शनं सर्वसमावेशिदर्शनमिति रूपेण प्रसिद्धम्। दर्शनेऽस्मिन् ब्रह्मजगतोर्मध्ये विभाजनं न क्रियतेऽपितु सर्वमपि दृश्यमानं ब्रह्मणो विस्तारभूतम् सर्वत्र चराचरयोः जडचेतनयोः समस्ते च जगति शिव एव व्याप्तः। या माया जीवं धर्मपथाद् पृथक्करोति तस्यां मायायामपि तस्यैव शिवस्य प्रकाशः। शैवदर्शनस्य प्रसिद्धमायामचतुष्टयम् 1. क्रमपरम्परा 2. कुलपरम्परा 3. स्पंदपरम्परा 4. प्रत्यभिज्ञापरम्परा चेति।

प्रत्यभिज्ञादर्शनमते विश्वमिदं षट्त्रिंशत्तत्त्वैर्विनिर्मितम्। महेश्वरः अर्थात् परमसत्ता स्वस्वतन्त्रेच्छया कदाचित् एतानि तत्त्वानि समवेतरूपेण प्रकटयति कदाचिच्च स्वस्मिन्नेव स्वेच्छया निमीलयति। अर्थात् शिवः तत्त्वसमूहमुन्मीलयति निमीलयति च। एतदुन्मीलनं निमीलनं यत्कार्यकलापं तत्पञ्चकृत्यसंज्ञकमिति नाम्ना सुप्रसिद्धम्। तच्च पञ्चकृत्यं सृष्टि-स्थिति-संहति-विलय-अनुग्रहसंज्ञकं भवति। शिवः एतत्सर्वं स्वेच्छया सम्पादयति अतः इयं शिवस्य स्वातन्त्र्यशक्तिरिति कथ्यते। इयमेव माहेश्वर्यशक्तिः विमर्श इति च कथ्यते। अद्वैतवेदान्तसम्मतस्य ब्रह्मण इव दर्शनेऽस्मिन् शिवः (परमसत्ता) न केवलं प्रकाशमय अपितु प्रकाशविमर्शमयोभयमपि भवति। अयं शिवः ज्ञानक्रिययोः अधिष्ठानं स्रोतश्च विद्यते। इदं विश्वं तस्य नास्ति नूतना रचना अपितु पूर्वतः विद्यमानस्य प्राकट्यमात्रम्। अभिप्रायस्तावदयं दर्शनेऽस्मिन् न किमपि वस्तु मिथ्या भवति न वा किमपि वस्तु क्षणिकं भवति अपितु सर्वस्य वस्तुनः सत्ता भवति, सत्ता एव वस्तुनः नियामिका अर्थात् यदि वस्त्वस्ति तर्हि तस्य सत्ताऽप्यस्ति, यदि सत्ता न भविष्यति तर्हि वस्त्वपि न भविष्यति। एवंप्रकारेण आचार्येणाभिनवगुप्तपादेन शङ्करस्य मिथ्यात्ववादः अपि च बौद्धस्य क्षणिकवादः एतद्द्वयमपि निरस्तम्। अथ च आत्मतत्त्वबोधनाय प्रत्यभिज्ञादर्शनमाविष्कृतम् अर्थात् आत्मतत्त्वबोधनस्य साधनं ज्ञानं नास्त्यपितु प्रत्यभिज्ञानं भवति यतः ज्ञानं तु अज्ञातवस्तुनो भवति प्रत्यभिज्ञानन्तु पूर्वतः विद्यमानस्य वस्तुनो भवति, अयमेव उभयोः दर्शनयोरात्मतत्त्वविषये मौलिको भेदः।

अभिनवगुप्तपादः शैवपद्धतौ दीक्षित आचार्यः। अनेन अशीतिवर्षात्मकं दिव्यं जीवनं सम्प्राप्तम्। एतेषां समग्रमपि जीवनं लक्ष्यत्रयाय समर्पितमासीत् तत्र प्रथमं लक्ष्यं शिवभक्तिः, द्वितीयं ग्रन्थनिर्मितिः, तृतीयमध्यापनमतिः। एतेषां जीवने तन्त्रचिन्तनस्य यद्यपि महान्प्रभावस्तथापि प्रत्यभिज्ञादर्शनेन एतेषां ख्यातिः। एभिः विरचिताः प्रायः पञ्चाशतसंख्यापरिमिताः ग्रन्था सुप्रसिद्धास्तथापि साम्प्रतं यावत् प्रायः द्वाविंशति ग्रन्थाः एव सम्प्राप्ताः तेष्वेते केचन सुलभाः–

---

1. परमार्थसारम् – 02

1. तन्त्रालोकः
2. तन्त्रसारः
3. तन्त्रोच्चयः
4. तन्त्रोवटधानिका
5. परमार्थसारः
6. परमार्थद्वादशिका
7. परमार्थचर्चा
8. परमार्थसंग्रहः
9. तत्त्वार्थप्रकाशिका
10. ईश्वरप्रत्यभिज्ञाविमर्शिणी
11. ईश्वरप्रत्यभिज्ञाविवृतिविमर्शिणी
12. बोधपंचदशिका
13. पञ्चत्रिंशिकाविवरणम्
14. काव्यकौतुकविवरणम्
15. क्रमस्तोत्रम्
16. भैरवस्तोत्रम्
17. अभिनवभारती
18. ध्वन्यालोकलोचनम्
19. भगवद्गीतार्थसंग्रहः
20. मालिनीविजयवार्तिकम्

अभिनवगुप्तपादैः उप्पलविरचितायाः ईश्वरप्रत्यभिज्ञायाः विस्तृतं व्याख्याद्वयं विरच्य अथ च तन्त्रालोकसदृशं महत्तमं वृहद्ग्रन्थं विलिख्य दर्शनसिद्धान्तस्य महानुपकारः कृतः, एवमेव ध्वन्यालोकलोचनं अभिनवभारतीञ्च प्रतिपाद्य साहित्यिकानां कृते प्रदत्तमेकमभिनवं ज्ञानलोचनम्।

प्रसिद्धेषु ग्रन्थरत्नेषु अभिनवगुप्तविरचितः 'परमार्थसारः' सुप्रसिद्धो ग्रन्थः। अत्र शताधिक पञ्चश्लोकाः (105) विद्यन्ते। ग्रन्थस्यास्य नाम्नैव एवं प्रतिभाति यदत्र केवलं परमार्थतत्त्वस्यैव विवेचनं भविष्यति तथापि परमार्थतत्त्वं सहैव परमार्थतत्त्वेन सम्बद्धाः अनेके विषयाः अत्र निगुम्फिताः। अत्रास्मिन् ग्रन्थे के-के विषयाः अनुस्यूता इति संक्षेपतः प्रदर्श्यन्ते- तद्यथा-

1. परमतत्त्वनिरूपणम्
2. जगत्सृष्टिप्रकारः
3. षट्त्रिंशत्तत्त्वनिरूपणम्
4. बन्धमोक्षस्वरूपवर्णनम्
5. बद्धमुक्तसमीक्षणम्
6. जीवन्मुक्तिनिरूपणम्
7. क्रममोक्षप्रतिपादनम्
8. मोक्षोपायसङ्केतश्च

परमार्थसारग्रन्थस्यारम्भे आचार्याभिनवगुप्तः स्वेष्टदेवतां भगवन्तं शम्भुं शरणप्राप्तिभावनया प्रार्थयति-

परं परस्थं गहनादनादिमेकं निविष्टं बहुधा गुहासु।
सर्वालयं सर्वचराचरस्थं त्वामेव शम्भुं शरणं प्रपद्ये॥[1]

अस्यायमाशयः शैवशिरोमणिरभिनवगुप्तपण्डितल्लजः स्वेष्टदेवतां भगवन्तं नटराजं करुणावरुणालयं श्रीशम्भुशरणागतं प्रपद्यते परं परस्थमित्यादिना। शम्भुं शं निखिलदेहप्रत्यनीकं दिव्यकल्याणानन्तगुणणैकमहोदधिं भावयति समाहरति इति शम्भुः, निखिलकल्याणगुणगणालयं भगवन्तं शम्भुं परमात्मानं शरणं प्रपद्ये,

1. परमार्थसारम् - 01

शरणागतं गच्छामीत्यर्थः। कीदृशं? परम्, परं सूक्ष्मम्, परं दुर्ज्ञेयम्, परं गोपनीयम्, परं सत्तारूपम्। परस्थम् पराणां ब्रह्मादिसृष्टिकारकब्रह्मेन्द्रकुमारप्रभञ्जन-प्रभाकर-क्षपाकरप्रभृति देवानाम्, स्थम् विद्यमानम्, पराणां परेष्वातिष्ठति विराजते इति परस्थस्तं परस्थम् परमोत्कृष्टस्थं परमेश्वरमित्यर्थः। गहनात्- गम्भीरत्वात् अतलस्पर्शात् हेतोः, अनादिम् आद्यन्तरहितम्, गुहायाम् निगमागमगुहायां सर्वभूतान्तर्गत सूक्ष्मान्तज्योतिषि अन्तर्देशे इत्यर्थः। बहुधा नानाविधा विद्यमानं देवदनुजमनुजपशुपक्षिप्रभृतिरूपेण विद्यमानम्, सर्वालयम् सर्वेषामालयः सर्वालयः सर्वाधारः तं सर्वालयम्। अथवा आ समन्तात् लयः आलयः प्रलयस्वरूपः, सर्वेषां प्राणिनामालयः सर्वालयस्तं सर्वालयम्। सर्वचराचरस्थम् - सर्वे चराश्च अचराश्च सर्वचराचराः जडचेतननिवहा इत्यर्थः, सर्वचराचरा यस्मिन् तिष्ठन्ति स चराचरस्थः तं सर्वचराचरस्थं सर्वजडचेतनाधारम् एतादृशं कल्याणगुणगणालयं भगवन्तं परं प्रभुं परमेश्वरं शम्भुं शरणं प्रपद्ये।

संक्षेपाशयोऽयं यः परमात्मा शम्भुः परं सूक्ष्मः सन् परमाखिलजीवानामाधारः विद्यते, यः शम्भुः आद्यन्तरहितो विद्यते, यः सजातीय - विजातीय - स्वगतभेदशून्यः सन् एको विद्यते, निगमागमगुहासु शास्त्रप्रपञ्चेषु बहुधा वर्णितो विद्यते, यः शम्भुः सर्वालयः सन् सर्वाधारो विद्यते तादृशं भगवन्तं परमात्मानं त्वां शम्भुं प्रपद्ये इति।

अनेन श्लोकेन अभिनवगुप्तपादः भगवतः शिवस्य महत्त्वं प्रतिपाद्य तेषां शरणप्राप्तिपूर्वकं ग्रन्थस्य मङ्गलमुखत्वं प्रकाशयति सहैव परमार्थसारग्रन्थस्यावतरणमपि निर्दिशति।

आचार्याभिनवः परमार्थसारे प्रतिपादयति यत् सर्वत्र दृश्यमाने जगति शिव एव विद्यते, भगवान् शिव एव नानापशुभावं गृह्णाति-

तत्रान्तर् विश्वमिदं विचित्रतनुकरणभुवनसन्तानम्।
भोक्ता च तत्र देही शिव एव गृहीतपशुभावः॥[1]

अर्थात् भगवान् शिवशङ्करः ईश्वर एव नानाविधकर्मफलपरिपाकवर्णानां रूपं धत्ते, यथा अमलस्फटिकोपरि यो यो वर्णप्रतिविम्बः पतति स अम्लस्फटिकोऽपि तत्तद्वर्णाकारो भवति, एवमेव एकस्मिन् परमात्मनि निर्मले शिवतत्त्वे सुर-मानुष-पशुपादपप्रभृतयो दृश्यन्ते, अर्थात् एकस्मिन्नेव निर्मले शिवतत्त्वे सात्विकराजस-तामसवर्णभेदेन नानाविधा देवदनुजमनुजादिनानादेहिनः प्रतिभान्ति। वस्तुतः शिवतत्त्वमेवसिद्धान्तः। यथा निर्मले मलरहिते दर्पणे प्रतिविम्बं भवति तद्वद एव प्रकाशरूपः अयम् विमले शुद्धधीतत्त्वे ज्ञानरूपः नानाविधः शिव एव भाति-

आदर्शे मलरहिते यद्वद् वदनं विभाति तद्वदयम्।
शिवशक्तिपातविमले धीतत्त्वे भाति भारूपः॥[2]

शिवतत्त्व एव समस्तं षट्त्रिंशात्मकं जगत् प्रतिभाति-

---

1. परमार्थसारम् - 05
2. वही - 09

सर्वविकल्पविहीनं शुद्धं शान्तं लयोदयविहीनम्।
यत् परतत्त्वं तस्मिन् विभाति षट्त्रिंशदात्मजगत्॥[1]

दर्पणविम्बे यद्वननगरग्रामादिचित्रम् अविभागि।
भाति विभागेनैव च परस्परं दर्पणाद् अपि च॥[2]

शुद्धं शान्तं शिवतत्त्वं यद् परतत्त्वं विद्यते तस्मिन् समस्तं षद्त्रिंशात्मकं जगत् सुस्फुटं भवति। अर्थात् द्वैताद्वैत-शुद्धाद्वैत-विशिष्टाद्वैतादिसर्वपक्षातीतं यद् परतत्त्वं परब्रह्मशिवतत्त्वं विद्यते तस्मिन् एव षट्त्रिंशात्मकं जगत् विभाति। दर्पणविम्बे यथा नगरग्रामादिचित्रं विभक्तमिव दृश्यते अपि च अविभक्तमपि दृश्यते तथैव शिवात्मतत्त्वदर्पणादपि इदं निखिलं जगत् पृथगिव अपृथक् च प्रतीयते।

सदसदुभयविलक्षणानिर्वचनीया त्रिगुणात्मिका मायावशादयं शुद्धबोधस्वरूपः चेतनामलिनः अज्ञानस्वरूपमलिनः जीवात्मकः पशुः भवति। पुनः साक्षात् शिवतत्त्वाभिन्नकालकलितादृष्टवशात् रागात्मिकाविद्याबलेन संवद्धः जगति बन्धनशीलः अयं पशुजीवः भवति-

मायापरिग्रहवशाद् बोधो मलिनः पुमान् पशुर्भवति।
कालकलानियतिबलाद् रागाविद्यावशेन संवद्धः॥[3]

अपि च-

कम्बुकमिव तण्डुलकणविनिविष्टं भिन्नमप्यभिदा।
भजते तत् तु विशुद्धिं शिवमार्गौन्मुख्ययोगेन॥[4]

अर्थात् यथा कम्बुग्रीवायां संस्थापिता तण्डुलकणा भिन्ना अपि अभिन्ना इव प्रतीयन्ते एवमेव परमार्थस्वरूपशिवोपायेन शुद्धात्मस्वरूपं विज्ञातं भवति। येन पशुतामज्ञानकलां विहाय आनन्दस्वरूपां ज्ञानानन्दकलां शैवावस्थां प्राप्नोत्ययं पशुचेतना इति।

एवमेवान्योऽपि प्रसङ्गोऽत्र ध्यातव्यः-

रसफणितशर्करिकागुडखण्डाद्या यथेक्षुरस एव।
तद्वदवस्थाभेदाः सर्वे परमात्मनः शम्भोः॥[5]

यथा मधुरेक्षुरसरस्य रसफणितशर्करिका गुडखण्डाद्या नानावस्था भवन्ति तथैव परमात्मनः शम्भोः इन्द्र-महेन्द्र-कुबेर-भाष्कर-रात्रिंचरदेवदनुजनमनुजपशुपक्षिप्रभृति विविधावस्थाभेदाः प्रभान्ति मूलन्तु साक्षाच्छम्भुरेवेति निष्कर्षः।

इदमपि चिन्त्यम्-

---

1. वही - 11
2. वही - 12
3. परमार्थसारम् - 16
4. वही - 18
5. वही - 26

रज्वां नास्ति भुजङ्गस् त्रासं कुरुते च मृत्युपर्यन्तम्।
भ्रान्तेर् महती शक्तिर् न विवेक्तुं शक्यते नाम।।[1]

जलधरधूमरजोभिर् मलिनीक्रियते यथा न गगनतलम्।
तद्वन् मायाविकृतिभिर् अपरामृष्टः परः पुरुषः।।[2]

जडरुपायां रज्वां भुजङ्गः कालत्रयेऽपि वासं न कुरुते किन्तु देहिनो बुद्धौ भुजङ्गभ्रमभावना भवति यतोहि भ्रान्तेर्महतीशक्तिः पृथक् रज्जुसर्पयोर्विवेकः कर्तुं न शक्यते। यथा अपरिमितजलधरैः भूतलगतानलनिर्गतधूमकदम्बेन पृथ्वीतलोत्पन्नरजःकणपुञ्जेन च गगनतलं मलिनं न भवति तथैव अज्ञानाविद्याप्रकृतिपदवाच्याऽपरपर्यायया मायया दुःखसुखसंयोगवियोगादिविकारगणसम्वलितया परः पुरुषः स्वपरमप्रकाशस्वरूपः विमलशिवतत्त्वम् विकृतं मलिनं वा न भवति। परमार्थसारग्रन्थस्य एकस्मिन् प्रसंगे एवमुपवर्णितमस्ति यत् सर्वत्र तत्त्वसमूहे शिवमयत्वं विज्ञाते अर्थात् सकलमपि तत्त्वं शिवमयमिति ज्ञाते सति कः शोकः? को वा मोहः?

इत्थं तत्त्वसमूहे भावनया शिवमयत्वमभिज्ञाते।
कः शोकः को मोहः सर्वं ब्रह्मावलोकयतः।।[3]

आत्मज्ञानवतः जनस्य कुत्रापि भयं न भवति, यदा जीवः स्वस्वरूपं विजानाति तदा तस्य न भवति कस्मादपि भीतिः। आत्मज्ञः नैव शोचति यतोहि आत्मा परमार्थरूपः सन् नित्यसत्यसनातनः विद्यते–

आत्मज्ञो न कुतश्चन विभेति सर्वं हि तस्य निजरूपम्।
नैव च शोचति यस्मात् परमार्थे नाशिता नास्ति।।[4]

अभिनवगुप्तपादाचार्येण स्वकीयपरमार्थसारग्रन्थे मोक्षस्यापि सूक्ष्मं विश्लेषणं विहितम्। यथा प्रायः सर्वेषु भारतीयदर्शनेषु मोक्षप्राप्तौ अज्ञाननाशद्वारा तत्त्वज्ञानस्य हेतुता सुप्रसिद्धा तथैवात्रापि अज्ञानग्रन्थिभेदनपूर्वकं स्वशक्त्या स्वाभिव्यक्तता एव मोक्षपदार्थः। निःश्रेयस-निर्वाण-अपवर्ग-मोक्षप्रभृतिवाच्यस्य मुक्तेः नास्ति कश्चन अन्यो धामालयः, तदर्थं अन्यत्र कुत्रापि गमनं न भवति अपितु स्वस्वरूपाभिव्यक्तत्वमेव मोक्षः विस्मृतस्य संस्मृतवत्–

मोक्षस्य नैव किञ्चित् धामास्ति न चापि गमनमन्यत्र।
अज्ञानग्रन्थिभिदा स्वशक्त्यभिव्यक्तता मोक्षः।।[5]

अग्निज्वालाविदग्धबीजं यथा प्रोहणसामर्थ्यहीनं भवति तद्वत् ज्ञानाग्निदग्धकर्म न पुनर्जन्मने सामर्थ्यमावहति तदुक्तं परमार्थसंग्रहे–

1. वही - 38
2. वही - 36
3. वही - 52
4. परमार्थसारम् - 58
5. वही - 60

अग्न्यभिदग्धं बीजं यथा प्ररोहासमर्थतामेति।
ज्ञानाग्निदग्धमेवं कर्म न जन्मप्रदं भवति।।

श्रीमदभिनवगुप्तः स्वकीये परमार्थसारे इदमपि प्रोक्तवान् यज्जीवः यत्र कुत्रापि स्थाने यस्यां कस्यामाप्यवस्थायां देहं परित्यजन् ज्ञानसमकालमेव शोकशून्यं कैवल्यं प्राप्नोति-

तीर्थे श्वपचगृहे वा नष्टस्मृतिरपि परित्यजन् देहम्।
ज्ञानसमकालमुक्तः कैवल्यं याति हतशोकः।।[1]

परमार्थसारे योगभ्रष्टानां विषये एवं भणितम्-

विषयेषु सार्वभौमः सर्वजनैः पूज्यते यथा राजा।
भुवनेषु सर्वदैवैः योगभ्रष्टस्तथा पूज्यः।।[2]

महता कालेन पुनर्मानुष्यं प्राप्ययोगमभ्यस्य।
प्राप्नोति दिव्यममृतं यस्माद् आवर्तते न पुनः।।[3]

अर्थात् देशेषु सार्वभौमो महाराजः यथा सर्वजनैः पूजितो भवति तथैव सर्वात्मकेषु योगभ्रष्टः मुक्तिपदात्भ्रष्टपुरुषः लोके जन्मना सिद्धः सन् पूजितो वन्दितश्च भवति। महता कालेन पुनरागत्य योगिपुरुषः पुनरपि योगसाधनामभ्यसति ततः परं अमृतपदं प्राप्नोति स न पुनरावर्तते, अत्र गीतायाः वचनप्रामाण्यम्-

अनेकजन्मसंसिद्धिस्ततो याति परां गतिम्।[4]

अतः अस्मिन् मार्गे निरत सन् यः कश्चित् यत्किञ्चित् सुकृतं विधत्ते स निष्पापो भवन् शिवत्वं प्राप्नोति इति विचार्य येन केन प्रकारेण सर्वथा परमार्थे प्रयतनीयमिति-

तस्मात् सन्मार्गेऽस्मिन् निरतो यः कश्चिद् एति स शिवत्वम्।
इति मत्वा परमार्थे यथा तथापि प्रयतनीयम्।।[5]

---

1. परमार्थसारम्-83
2. परमार्थसारम्-101
3. परमार्थसारम्-102
4. श्रीमद्भगवद्गीता
5. परमार्थसारम्-103

स्फोटविचारेऽभिनवगुप्तस्यवैयाकरणानाञ्च मतसमीक्षा

डॉ. रामनारायणद्विवेदी

पौरस्त्यवाङ्मये न केवलं शब्दप्रक्रियाप्रदानेनापितु स्वाभिमतदार्शनिकग्रन्थप्रदानेन च वैयाकरणाः अभिनवस्य समानाः दृश्यन्ते। तत्र च बहुत्र व्याकरणसम्मतस्फोटवादसमर्थनमेवञ्च परापश्यन्ती-मध्यमावैखरीभेदेन चतुर्धाऽवस्थावर्णनमपि भूयस्त्वेन अभिनवगुप्तरचितग्रन्थेषु उपलभ्यते। तद्यथा तन्त्रालोके-

प्राक् पश्यन्त्यथ मध्यमान्या वैखरी चेति ता इमाः।

परा परापरा देवी चरमा त्वपरात्मिका।।[1]

भट्टनागेशेन तु मध्यमानादव्यङ्ग्यस्फोटमादाय स्वमतमित्थं प्रतिपादितमस्ति तत्रैव "लोके व्यवहर्तृषु पदार्थबोधकत्वेन प्रसिद्धः श्रोत्रेन्द्रियग्राह्यत्वाद् वर्णरूपध्वनिसमूह एव शब्द इत्यर्थः। तस्यार्थबोधकता अपि अविचारितरमणीयस्यैव लोके सिद्धा, तादृशस्यैव शास्त्रेण अन्वाख्यानमिति तात्पर्यम्"। एवञ्च कैयटनागेशादीनां मते शब्दशब्देन स्फोटस्यैव ग्रहणं भवति। स च स्फोटात्मा शब्दः अष्टविधः। इत्थञ्च वैयाकरणनिकाये शब्दः शाब्दबोधे प्रमाणत्वेन प्रमात्वेन च गृह्यते। वृत्त्याश्रयः स्फोटात्मकश्च शब्दो नित्यः, अष्टविधस्वपि स्फोटेषु वाक्यस्फोटस्यैव प्राधान्यम्। उक्तञ्च न्यायदर्शने "पदसमूहो वाक्यमर्थसमाप्तौ"[2] इति। अत्र समर्थमित्यर्थः। भूषणसारेऽप्युक्तम् -

वाक्यस्फोटोऽतिनिष्कर्षे तिष्ठतीति मतस्थितिः[3]

एवञ्च प्रतीतपदार्थको ध्वन्यात्मकः शब्दः लोकव्यवहारे एव प्रसिद्धो न वस्तुत इति वैयाकरणसम्मतिः। तत्र नैयायिकाः आप्तोपदेशरूपं शब्दं प्रमाणत्वेन स्वीकृत्य गुणभूतस्य शब्दस्य स्वरूपमित्थं प्रतिपादयन्ति - "श्रोत्रेन्द्रियग्राह्यत्वे सति नभोवृत्तित्वे सति गुणत्वं शब्दस्य लक्षणम्" इति। तथा च "सर्वशब्दो नभोवृत्तिः श्रोत्रोत्पन्नस्तु गृह्यते"[4] इति। ध्वनिश्च मृदङ्गादिभवः, वर्णश्च कण्ठसंयोगादिजन्यः कादिरिति द्विविधः। एतेषां मते शब्दस्य अनित्यता अस्ति।

इत्थञ्च वैयाकरणनिकाये स्फोटात्मको वृत्त्याश्रयः शब्दो नित्यः, वृत्त्याश्रयत्वेन च स्फोटात्मकशब्दस्य प्रतिपादितत्वात् तत्र प्रथमं स्फोटनिरूपणमावश्यकमिति मत्वा स्फोटप्रतिपादनं विधीयते।

---

1. तन्त्रालोकः 2.270
2. न्या.सू.2.1.55
3. वै.भू.सा.का.61

ननु कोऽयं स्फोट इति चेत् मध्यमानादव्यङ्ग्यः। चतुर्विधा हि वाणी वैयाकरणग्रन्थे प्रतिपादिता - परा, पश्यन्ती, मध्यमा, वैखरी च। तदाह -

परा वाङ्मूलचक्रस्था पश्यन्ती नाभिसंस्थिता।
हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा॥

वैखर्या हि कृतो नादः परश्रवणगोचरः।
मध्यमया कृतो नादः स्फोटव्यञ्जक उच्यते॥[5]

अयं स्फोटक्रमः तन्त्रसारादिग्रन्थेषु अभिनवगुप्तेन विस्तरेण प्रतिपादितः। तत्र च पश्यन्तीनादस्य स्थूलस्वरूपं वायुनाभिव्यञ्जितमर्थबोधकं स्फोटस्वरूपञ्च विवेचितम्। तद्यथा -

सा स्थूला खलु पश्यन्ती वर्णाद्यप्रविभागतः।
अविभागैकरूपत्वं माधुर्यं शक्तिरुच्यते॥

स्थानवाय्वादिघर्षोत्था स्फुटतैव च पारुषी॥[6]

अयम्भावः स्थूलरूपा सत्यपि पश्यन्तीवाग् वर्णाद्यप्रविभक्ता नास्ति। तत्र मध्यमावैखरीभ्यां युगपदेव नाद उत्पद्यते। मध्यमानादः स्फोटात्मकशब्दव्यञ्जकोऽर्थवाचकः। वैखरीनादो ध्वनिस्तु सर्वजनश्रावणप्रत्यक्षविषयो मृदङ्गादिनादवन्निरर्थकः। मध्यमानादव्यङ्ग्यः स्फोटात्मकः शब्दः नित्यो ब्रह्मरूपश्च वैयाकरणनिकाये स्वीकृतः। तथा चोक्तं हरिणा -

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥[7]

तत्र च शब्दसृष्टिक्रमविषये तन्त्रसारग्रन्थे एवमुल्लिखितं वर्तते।

विन्दोर्नादः समुत्पन्नस्ततो वर्णसमुद्भ वः।
वर्णसंघातरूपेण पदत्वमधिगच्छति॥

पदसमुदाय एवासौ शाब्दकारणयुग् यदा।
वाक्यं शास्त्रविदः प्राहुः स्फोटोऽर्थस्फोटनात्॥

अयम्भावः विन्दुरूपा परावाग् मूलचक्रे विद्यमाना वर्तते ततः पश्यन्तीनाद उत्पद्यते। तदेव पश्यन्तीनादः वर्णसंघातरूपत्वे सति पदत्वरूपेण आगतः वर्णः शब्दकारणयुग् यदा भवति तदा सः अर्थबोधकस्फोटरूपत्वमभिधत्ते इति तस्य भावार्थः।

---

4. कारिकावली 165
5. परमलघुमञ्जूषा, स्फोटनिरूपणम्
6. तन्त्रालोकः 3.238
7. वा.प. 1.1

स च स्फोटरूपं ब्रह्म एको अखण्डश्च तथापि पदं वाक्यं जपाकुसुमादिलौहित्यपीतत्वादिव्यञ्जकोपरागवशाद् लोहितः पीतः स्फटिक इति ज्ञानवद् वर्णव्यङ्ग्यो वर्णरूपः, पदव्यङ्ग्यः पदरूपः, वाक्यव्यङ्ग्यो वाक्यरूपश्च। तदाह -

पदे न वर्णाः विद्यन्ते वर्णेष्ववयवा न च।

वाक्यात् पदानामत्यन्तं प्रविवेको न कश्चन॥[8]

यथा एकस्याप्याकाशस्य उपाधिभेदात् घटाकाशः मठाकाशः इत्यादयो भेदाः, एवं स्फोटो व्यञ्जकध्वनिगतकत्वादिभानाद् ककारो बुद्धः, गकारो बुद्ध इत्यौपाधिको भेदव्यवहारः। उपाधिः घटकत्वादिभिर्भिन्नः उपाधेयस्तु आकाशस्फोटादिरेक एवेति भावः। बिम्बगतधर्मे वैशिष्ट्येनैव प्रतिबिम्बस्य लोकेऽवधारणात् व्यञ्जकध्वनिगतकत्वगत्वादिकं स्फोटात्मके शब्दे भासते।

तत्र द्विविधो ध्वनिः प्राकृतो वैकृतश्च। प्राकृतं विना स्फोटस्य सामान्येन विशेषणेन वा बोधाभावः। अतः प्राकृतध्वनिं स्फोटस्वरूपमिव मन्यन्ते वैयाकरणाः। परन्तु ध्वनिविषये अभिनवगुप्तस्तु-

किलाव्यक्तध्वनौ तस्मिन्वादने परितुष्यति।
या तु स्फुटानां वर्णानामुत्पत्तौ कारणं भवेत्॥[9]

वैकृतध्वनिस्तु प्राकृतध्वनिप्रतीतं स्फोटमुत्तरकालं स एवायमित्युल्लेखेन चिरकालमुपलम्भयतीति स्फोटप्रतीत्युत्तरकालभावितया स्फोटवैलक्षण्येनावभासमानो द्रुतादीनां वृत्तीनां भेदे कारणमिति तद्गतकालभेदस्य तद्भिन्नत्वेन प्रतीते स्फोटे न प्रतीतिरिति वैकृतध्वनिभिः स्फोटो न भिद्यते। अत्र हरिः -

स्फोटस्य ग्रहणे हेतुः प्राकृतो ध्वनिरिष्यते।
शब्दस्योर्ध्वमभिव्यक्तेर्वृत्तिभेदे तु वैकृतः॥

ध्वनयः समुपोहन्ते स्फोटात्मा तैर्न भिद्यते।[10]

"स एवायमकारः" इति प्रत्यभिज्ञानात् स्फोटस्य नित्यत्वेऽपि सर्वदा तदुपालम्भाभावो व्यञ्जकाभावकृतः न तु स्वभावकृतः। इत्थञ्च वैयाकरणानां सिद्धान्तभूतं स्फोटात्मकं शब्दस्य मुख्यं स्वरूपं तन्त्रालोकदृष्ट्या प्रदर्शितम्। तत्र "स्फुट्यते ध्वनिना अभिव्यज्यते इति कर्मव्युत्पत्त्या", "स्फुटत्यर्थोऽनेनेति करणव्युत्पत्त्या" च घञन्तः स्फोटशब्दो निष्पद्यते। अतश्च "ध्वनिव्यङ्ग्यत्वे सति अर्थविषयकबोधजनकत्वम्" स्फोटस्य लक्षणं पर्यवसन्नम्। शब्दादर्थं प्रतिपद्यामहे इत्यनुभवसिद्धस्य अत्रार्थविषयबोधजनकत्वस्य वृत्त्याश्रयत्त्वस्य वान्यथानुपपत्त्या एको नित्यो घटादिरूपः स्फोटः कल्प्यते।

तत्र स्फोटस्यैकत्वेऽपि व्यञ्जकोपाधिभेदात् भेदः सम्भवति। स्फोटव्यञ्जकास्तु वर्णः, वर्णजातिः, पदम्, पदजातिः, वाक्यम्, वाक्यजातिः, अखण्डपदमखण्डवाक्यञ्चेति अष्टौ। एवञ्च व्यञ्जकभेदवशात्

8. वा.प. 1.73
9. तन्त्रालोकः 3.44
10. वा.प.77

स्फोटोऽपि अष्टधा भवति। तदुक्तं कौण्डभट्टेन – "यद्यपि वर्णस्फोट:, वाक्यस्फोट:, अखण्डपद-वाक्यस्फोटौ, वर्णपदवाक्यभेदेन त्रयो जातिस्फोटा इत्यष्टौ पक्षा: सिद्धान्तसिद्धा:"[11] तत्र नागेशेनापि मञ्जूषायां स्फोटस्याष्टविधत्वं प्रतिपादितम्। प्रकारस्तु भिन्न एव, तत्र स्फोटो द्विविध: आन्तरो बाह्यश्च। बाह्यस्फोटोऽष्टधा कल्प्यते इति। तत्र श्रीरामाज्ञापाण्डेयमहाभागस्तु स्फोटस्य षोडशविधत्वं प्रत्यपादयत् व्याकरणदर्शनभूमिकायाम्[12] इति।

कौण्डभट्टादयस्तु स्फोटव्यञ्जकभेदेन स्फोटभेदं स्वीकुर्वन्ति, श्रीपाण्डेयस्तु स्फोटबोध्यार्थभेदेन स्फोटभेदं वर्णयति। अतस्तदुक्तेषु षोडशस्फोटभेदेषु प्रकृतिस्फोटादिशब्दस्य प्रकृतिव्यङ्ग्यव्यक्तिस्फोट इत्यर्थ:, प्रकृतिजातिस्फोट इत्यादिशब्दस्य प्रकृतिव्यङ्ग्यजातिस्फोट इत्याद्यर्थ: बोद्धव्य:। इत्थञ्च तत्र कौण्डभट्टादिसम्मतमेव स्फोटस्याष्टविधत्वं वैयाकरणनये सर्वमान्यमस्ति। उक्तेषु प्रामाणिकेषु अष्टसु स्फोटेषु वाक्यस्फोटे एव शब्दतत्त्वविदां तात्पर्यम्, तत्रापि वाक्यजातिस्फोटे, पूर्वपूर्वपदेनैवोत्तरोत्तरोपन्यासात्। तथा च प्रथमव्युत्पत्तेर्व्यवहाराधीनतया सम्पूर्णस्य वाक्यस्य विशिष्टेऽर्थे प्राथमिक: शक्तिग्रह:। तत्रापि अष्टविधसु स्फोटेषु अखण्डवाक्यस्फोट एव मुख्य इति नव्यानां मतम्। यथा नागेश: – "तत्र वाक्यस्फोटो मुख्यो लोके तस्यैवार्थबोधकत्वात्तेनैव अर्थसमाप्तेश्च"[13] इति। अत्र वाक्यस्फोटपदेन अखण्डवाक्यस्फोट एव गृह्यते।

वाक्यजातिस्फोट एव मुख्य इति प्राञ्च:। उक्तञ्च यद्यपीहाष्टौ स्फोटा: उक्तास्तथापि वाक्यस्फोटपक्षे तात्पर्यं ग्रन्थकृताम्। तत्रापि जातिस्फोट इत्यवधेयम्।[14] वाक्यस्फोटोऽतिनिष्कर्षे तिष्ठतीति मतस्थितिरिति हरि:। एवमेव हरिस्तु पदार्थानामसत्यत्वं वाक्यार्थस्य च सत्यत्वमस्तीति भणीति –

पृथङ्निविष्टतत्त्वानां पृथगर्थानुपातिनाम्।
इन्द्रियाणां यथा कार्यमृते देहान्न कल्पते।।
तथा पदानां सर्वेषां पृथगर्थनिवेशिनाम्।
वाक्येभ्य: प्रविभक्तानामर्थवत्ता न विद्यते।।
संसर्गरूपं संसृष्टेष्वर्थवस्तुषु गृह्यते।
नात्रोपाख्यायते तत्त्वमपदार्थस्य दर्शनात्।।[15] इति।।

वाक्यस्फोटस्य अखण्डत्वे स्वीकृते पदपदार्थयोरभावात् क्रियापदस्य कारकपदस्य चासत्वात् "क्रियाकारकभावरूपसम्बन्ध एव वाक्यार्थ:" व्यवहारोऽयं व्याहन्येत इति वैयाकरणै: प्रतिभाया:

11. वै.भू.स्फोटनिर्णय:
12. व्याकरणदर्शनभूमिका पृ.48–50
13. वै.सि.ल.म. पृ.सं. 1 चौखम्बा प्रकाशन।
14. शब्दकौस्तुभ: पृ.सं. 11 चौखम्भा प्रकाशन
15. वा.प. 2.427–429

वाक्यार्थत्वं स्वीक्रियते। तदुक्तं भर्तृहरिणा –

विच्छेदग्रहणेऽर्थानां प्रतिभान्यैव जायते।

वाक्यार्थ इति तामाहुः पदार्थैरूपपादिताम्॥[1] इति

यज्ञदत्तो ग्रामं गच्छति इति वाक्ये देवदत्तादिपदानां पृथक् पृथगर्थे ज्ञायमाने पदार्थविषयकज्ञानातिरिक्ता असत्यैरेव उपाधिभूतैः पदार्थैरभिव्यक्ता विलक्षणा काचन प्रतिभा उपजायते ताञ्च प्रतिभां वैयाकरणाः वाक्यार्थं वदन्ति। एवञ्च पदार्थस्यासत्यत्वम्, वाक्यार्थस्य च सत्यत्वं सूचितम्। एवञ्च स्फोटात्मा वाक्यभूतः शब्दो वृत्त्याश्रयः इति।

आगमशास्त्रे वर्णितस्फोटप्रकरणस्य तु अयं भावः – जगन्मूलभूता परिणामिनी मया शक्तिः। तस्या आधारभूश्चिदात्मा मूलाधारः। तस्मात् चैतन्याभासविशिष्टतया प्रकाशिका माया निष्पन्दा परा वागुच्यते। सस्पन्दावस्थाः पश्यन्त्यादयः तथा च सामान्यस्पन्दप्रकाशरूपिणी नादतत्त्वात्मिका आध्यात्ममूलाधारादिनाभ्यन्तरमभिव्यज्यमाना पश्यन्ती। सामान्यज्ञानात्मकत्वात् सा पश्यन्तीत्युच्यते। एवं हि बाह्यान्तः करणाद्यात्मिका हिरण्यगर्भरूपिणी विन्दुतत्त्वमयी नाभ्यादिहृदयान्ताभिव्यक्तिस्था विशेषस्पन्दसङ्कल्पादिसत्ता मध्यमा वागिति। अहोस्वित् मध्ये मा बुद्धिर्यस्याः सा मध्यमा। भाव एव विशेष्यः। तथा च विराडरूपिणी बीजात्मिका हृदयादारस्यान्तमभिव्यज्यमाना शब्दसामान्यात्मिका वैखरीवागिति। उक्तञ्च –

मूलाधारात् प्रथममुदितो यस्तु भावः पराख्यः।

पश्चात् पश्यन्त्यथ हृदयगो बुद्धियुङ्मध्यमाख्यः॥

वक्त्रे वैरवर्यथ रुरुदिषोरस्य जन्तोः सुषुम्ना।

बद्धस्तस्माद्ध वति पवनप्रेरितो वर्णसङ्घः॥[2]

अनेन च श्लोकेन ज्ञायते यत् यद्यपि अभिनवगुप्तादिभिः प्रतिपादितः स्फोटः वैयाकरणाभिमतस्फोटेन सह वैषम्ये सत्यपि कुत्रचिदंशे तु वैयाकरणाभिमतस्फोटेन सह साम्यमिव वर्तते। यतो हि तत्र इमाश्च वैखरीमध्यमापश्यन्तीपरारूपेण जाग्रत्स्वप्नसुषुप्तितुरीयाद्यवस्थाः शब्दब्रह्मणः प्रतिपादिताः। परन्तु वैयाकरणनिकाये तु चतुर्धा वागेव इति शम्।

---

1. वा.प.2.145
2. प्रपञ्चसारतन्त्रे द्वितीयपटले श्लोक.सं.43

अभिनवगुप्तपादाचार्यस्य साहित्यिकं चिन्तनम्

डॉ.सुमनकुमारझाः

संस्कृतवाङ्मयेऽभिनवगुप्तपादाचार्यस्याद्वितीयं स्थानमिति सुविदितमेव विदुषाम्। भारतीयविद्या-साहित्य-कला-दर्शन-संस्कृति-चिन्तनाध्यात्म-समालोचनाञ्च संवर्धने सम्पोषणे चैतेषामवदानमप्रतिमं महनीयञ्च वर्तते। काश्मीरशैवदर्शनं यत्प्रत्यभिज्ञादर्शननाम्ना त्रिक्दर्शननाम्नाऽपि विज्ञायते, तस्य प्रतिष्ठापकाचार्यत्वेनास्ति प्रसिद्धिर्भारतीयदर्शनशास्त्रेऽभिनवगुप्तपादाचार्यस्य। अनेन हेतुनैव महामहेश्वरा-चार्याभिनवगुप्तपादाचार्ययोगिनीभूप्रभृतिभिरुपाधिभिर्विभूष्यते श्रीमानभिवनगुप्तः।

वस्तुतः प्रत्यभिज्ञादर्शन-त्रिक्शास्त्र-नाट्यशास्त्र-काव्यशास्त्र-तन्त्रागमविद्या-गीताप्रभृतीनां शास्त्राणामाधिकारिकाचार्यत्वेन तेषां ख्यातिर्विद्यते भारतीयसाहित्ये। किं बहुना, ते कारयित्री-भावयित्रीत्युभयविधप्रतिभान्विताः तादृशाः प्रकृष्यभूताः महनीयाचार्याः सन्ति यैर्विना भारतीयसाहित्य-दर्शन-साहित्यशास्त्राणाञ्च विमर्शोऽपूर्णः प्रतीयते। साहित्यशास्त्रे तु तेषां महदवदानं वर्तते। अभिनवगुप्तस्यानन्तरं नाट्यशास्त्रे काव्यशास्त्रे च तस्यैव चिन्तनं मतञ्च प्रमाणत्वेन स्वीक्रियतेपरवर्तिभिराचार्यैः समीक्षकैश्चेत्यत्र न काऽप्यतिशयोक्तिः। आचार्योऽयं प्राधान्येन शैवदार्शनिक एव, अयमेव हेतुर्यदस्य साहित्यशास्त्रविषयक-कृतिष्वपि शैवसिद्धान्तानां समन्वयो नितरामनुभूयते। साहित्यशास्त्रस्य विकासयात्रायां विशेषतो नाट्यस्य दार्शनिकं विवेचनं, शैवदर्शनमनुसृत्य नाट्यशास्त्रीयपदार्थानां लक्षणनिरूपणं, रससिद्धान्तस्य दार्शनिकं विवेचनं, ध्वनिसिद्धान्तस्य प्रतिष्ठापनं, व्यञ्जनावृत्तेरनिवार्यत्वं, रससूत्रव्याख्यानक्रमे भट्टलोल्लटस्योत्पत्ति-वादं भट्टशङ्कुकस्यानुमितिवादं भट्टनायकस्य भुक्तिवादञ्च पूर्वपक्षत्वेनोपस्थाप्य तत्तन्मतं प्रमाणपूर्वकं निराकृत्य साहित्यशास्त्ररीत्या रसाभिव्यक्तिवादस्य स्थापनं, रसतत्त्वस्य दार्शनिकरीत्या स्वरूपनिरूपणं, रसानुभूतिप्रक्रियासन्दर्भे सामाजिकेन सह सम्बन्धस्थापनाय साधारणीकरणसिद्धान्तप्रतिपादनं, सर्वविधकाव्येषु शान्तरसस्य स्थापनञ्चेत्यादिनानासिद्धान्तानां स्थापने प्रतिष्ठापने चैतेषामवदानमुल्लेखनीयं वर्तते।

वस्तुतोऽभिनवगुप्तपादाचार्याणां महिमा अनेनापि ज्ञायते यदद्यावधि नाट्यशास्त्र-रसनिष्पत्तिप्रक्रिया-ध्वनिसिद्धान्तविषयेषु त एव प्रमाणभूताः सन्ति। परवर्तिषु नाट्यशास्त्रग्रन्थेषु काव्यशास्त्रग्रन्थेषु च तेषामेव विचाराः प्रभूतरूपेण निष्कर्षरूपेण परिलक्ष्यन्ते। प्रायशः सर्वैः परवर्तिभिराचार्यैः विविधेषु प्रसङ्गेषु साहित्यशास्त्रीयतत्त्वानां विवेचनक्रमे तेषामेव वचनं मतञ्च सादरं सप्रमाणञ्चोपस्थाप्येते। वस्तुतोऽभिनवगुप्तस्य वचनमेव चरममिति द्रढीयानो विश्वासः साहित्यशास्त्राचार्याणाम्, अद्यापि सैव

परम्परा सर्वथा नितराञ्च स्थापिताऽस्तीत्यहो तेषां वैलक्षण्यम्।

साहित्यशास्त्रे यद्यपि तैर्न कोऽपि मूलग्रन्थो विरचितः प्रत्युत भरतमुनिविरचितस्य नाट्यशास्त्रस्य नाट्यवेदविवृत्ति नाम्नी टीका या अभिनवभारतीनाम्ना भारतीयसाहित्ये विश्रुता प्रसिद्धा च सञ्जाता, अपि च कश्मीरप्रदेशस्यैव युगप्रवर्तकाचार्यस्यानन्दवर्धनस्य विश्वप्रसिद्धो ग्रन्थो ध्वन्यालोकः, येन ग्रन्थेन साहित्यदर्शनस्य दिक्परिवर्तनमेव जातं, तस्य ग्रन्थस्य ध्वन्यालोकलोचननाम्नी टीका च विरचिते। परमनयोष्टीकाग्रन्थयोर्माहात्म्यं वैशिष्ट्यञ्च तथा प्रकृष्टं वर्तते यत्तौ टीकाग्रन्थौ मूलग्रन्थापेक्षयाऽपि विशिष्टौ महनीयौ प्रौढौ च सञ्जातौ। टीकयोर्वैदुष्यपूर्णत्वात् प्रौढत्वाच्च ते साहित्यशास्त्रमौलिक-ग्रन्थेभ्योऽप्यतितरां महनीये प्रतिष्ठापूर्णे च गण्येते। किं बहुना, एतौ द्वौ टीकाग्रन्थौ विरच्य ते स्वयशःकायेन अमराः सञ्जाताः संस्कृतसाहित्यशास्त्रस्येतिहासे। एतदतिरिक्तं काव्यकौतुकविवरणनामकः टीकाग्रन्थोऽपि तेन प्रणीतः। अभिनवगुप्तस्योपाध्यायो भट्टतौतः काव्यकौतुकाभिधानं साहित्यशास्त्र-ग्रन्थमरचयत्। अभिनवगुप्तेन तस्य ग्रन्थस्य 'विवरण' नाम्नी टीका विरचिता। परं दौर्भाग्यादधुना नाऽप्ययं ग्रन्थः समुपलभ्यते, न च सा टीका। ग्रन्थस्याऽस्तित्वस्य प्रमाणानि ध्वन्यालोकलोचनेऽभिनव-भारत्याञ्च तत्तत् प्रसङ्गेषु प्राप्तौद्धरणैः सम्प्राप्यन्ते।

साहित्यशास्त्रं विहायापि विविधविद्यासु विशालं साहित्यं व्यरचयदभिनवगुप्तः। तेन शैवदर्शन-तन्त्रशास्त्र-स्तोत्रसाहित्येषु च विपुलं साहित्यं प्रणीतम्। तेन विशालो ग्रन्थः 'तन्त्रालोकः' विरचितः, यः त्रिक्शास्त्रस्य तन्त्रशास्त्रस्य वा विश्वकोशरूपेण प्रसिद्धो जातः। ग्रन्थोऽयं सप्तत्रिंशदाह्निकेषु विभक्तोऽस्ति, अभिनवगुप्तस्य नाट्यशास्त्रीयं चिन्तनं काव्यशास्त्रीयञ्च चिन्तनमवबोधाय ग्रन्थोऽयं नितरामुपयोगी वर्तते। वस्तुतोऽभिनवगुप्तेन शैवदर्शनरीत्या यत्साहित्यशास्त्रतत्त्वानां विवेचनमकार्षीत्, विशेषतो रसतत्त्वस्य रसाभिव्यक्तिवादस्य काव्यरचनाप्रक्रियायाश्च तस्य मूलं तन्त्रालोकग्रन्थे एव प्राप्यते। ईश्वरप्रत्यभिज्ञाविमर्शिनी ईश्वरप्रत्यभिज्ञाविवृतिविमर्शिनी तन्त्रसारः परात्रिंशिकाविवरणं, मालिनीविजयवार्तिकं परमार्थसारः भैरवस्तोत्रं क्रमस्तोत्रं परमार्थचर्चास्तोत्रं, रहस्यपञ्चदशिका-स्तोत्रमनुभवनिवेदनस्तोत्रमनुत्तराष्टिकास्तोत्रं गीतार्थसङ्ग्रहटीका चैतेषामन्याः कृतयः सन्ति।

अभिनवगुप्तेन संस्कृतेन साकं प्राकृतभाषायामपि बहूनि पद्यानि विरचितानि सन्ति। लोचनटीकायामभिनवभारतीटीकायाञ्च तद्विरचितानि नैकानि संस्कृत-प्राकृत पद्यानि समुपलभ्यन्ते। अनेन प्रतीयते यदसौ संस्कृतेन साकं प्राकृतभाषायामपि काव्यं विरचितवान् स्यात् यदधुना न प्राप्यते।

भारतीयसमीक्षाशास्त्र-सौन्दर्यमीमांसा-नाट्यकला-साहित्यदर्शनेषु अभिनवगुप्तस्य प्रभावः स्पष्टरूपेण परिलक्ष्यते। भारतीयज्ञानचिन्तनपरम्परायाः सम्पोषणे संवर्धने चास्यावदानमनुपमम्। अभिनवगुप्तस्य चिन्तनस्य प्रभावः पाश्चात्यविचारकेष्वपि दृश्यते। क्रोचेमहोदयस्याभिव्यञ्जनावादः, टी. एस. इलियटप्रवर्तितो निर्वैयक्तिकसिद्धान्तश्च दृष्टान्तरूपेण द्रष्टुं शक्यते। किं बहुना, आचार्योऽयं महान् दार्शनिकः काव्यमर्मज्ञः सङ्गीतशास्त्रनिष्णातो नाट्यरसिकः सहृदयकविः साहित्यशास्त्रवेत्ता शिवस्यानन्योपासकः शिवभक्तश्चाऽऽसीत्।

परमशैवत्वात् जगदिदं शिव-शक्त्यात्मकं मन्यते तेन। तन्मते सम्पूर्णं जगत् यथा शिवस्य परिस्पन्दनरूपं तथैव काव्यमपि रससिद्धकवेरन्तर्दर्शनं परिस्पन्दनरूपञ्च। अभिनवगुप्तस्य कृतिषु शिवतत्त्वस्य विविधरूपाणामद्भुतं निदर्शनं प्राप्यते।

ध्वन्यालोकलोचनटीकाया: मङ्गलपद्ये कविसहृदयाख्यातं काव्यतत्त्वं सर्वोत्कृष्टतममिति प्रदर्शितं तेन। यथा-

अपूर्वं यद्वस्तु प्रथयति विना कारणकलां
जगद्ग्रावप्रख्यं निजरसभरात्सारयति च।
क्रमात्प्रख्योपाख्याप्रसरसुभगं भासयति तत्
सरस्वत्यास्तत्त्वं कविसहृदयाख्यं विजयते॥

कवि: साहित्यस्त्रष्टा, कृतिश्च तस्य सृष्टि:। अस्या: सृष्टे: रहस्यवेत्ता आस्वादकश्च भवति सहृदय:। कविभि: स्व-प्रतिभया व्युत्पत्तिसामर्थ्येण कल्पनाशक्त्या च साहित्यसर्जनं क्रियते, परं काव्यस्य काव्यत्वं तु सहृदयैरेवावगम्यते। सहृदय एव काव्यस्य वास्तविक आस्वादक: काव्यमर्मवेत्ता च । स एव वस्तुत: साहित्यस्याधिकारी प्रमाता च। तेनोक्तम्- **अधिकारी चात्र विमलप्रतिभानशाली सहृदय:** इति। कविकर्म एव काव्यसर्जनं, तत्र यद्दर्शनं विद्यते, तस्यावबोधनं विमर्शनञ्च सहृदयस्य कर्म इति। वस्तुत: कविसहृदययोर्मध्येऽवस्थितं भवति काव्यम्। शब्दार्थमयेन काव्येनैव कविसहृदयोर्मिथो हृदयसंवादो जायते। हृदयसंवाद एव तादात्म्यमुच्यते। सहृदयस्य लक्षणमित्थं क्रियते तेन- **येषां काव्यानुशीलनाभ्यासवशाद्विशदीभूते मनोमुकुरे तन्मयीभवनयोग्यता ते स्वहृदयसंवादभाज: सहृदया:।**[1] काव्येषु वर्णितै: विषयवस्तुभि: साकं ऐक्यं संस्थाप्य, कविहृदयेन सह स्वहृदयसंवादस्थापक एव साहित्ये सहृदय: कथ्यते।

कविप्रतिभा- साहित्यशास्त्रे कविप्रतिभा सविशेषेण प्रतिपादिता आचार्यै:। वस्तुत: काव्यसर्जनं प्रतिभयैव जायते। '**काव्यं तु जायते जातु कस्यचित्प्रतिभावत:**' इति भामहाचार्यवचनम् । '**नैसर्गिकी च प्रतिभा**' इति दण्डिनो वचनम्। इयं प्रतिभा '**शक्ति:**' पदेनापि कथिताऽस्ति साहित्यशास्त्रे। मम्मटाचार्येण- '**शक्ति: कवित्वबीजरूप: संस्कार विशेष:**' इत्युक्तम्। रुद्रटाचार्येणापि-

मनसि सदा सुसमाधिनि विस्फुरणमनेकधाभिधेयस्य।
अक्लिष्टानि पदानि च विभान्ति यस्यामसौ शक्ति॥ इत्युक्तम्।[2]

अभिनवगुप्तेन प्रतिभातत्त्वमित्थं परिभाषितम्- '**प्रतिभा अपूर्ववस्तु निर्माणक्षमा प्रज्ञा:, तस्या 'विशेषो' रसावेशवैशद्यसौन्दर्यं काव्यनिर्माणक्षमत्वम्।**'[3] अर्थात् अपूर्ववस्तुनिर्माणसमर्था प्रज्ञा

1. ध्वन्यालोकलोचनम्-1 पृ.-40
2. काव्यालङ्कार-1/15
3. लोचनटीका-1 पृ.-94

एव प्रतिभा कथ्यते । **'प्रज्ञा-नवनवोन्मेषशालिनी प्रतिभा मता'** इति भट्टतौतस्य मतम्। अभिनवस्य तु मतं विद्यते यत्प्रतिभाविशेषेणैव महाकवित्वगणना सम्पद्यते। कविसहृदययोः प्रतिभा समाना भवति। कविषु कारयित्रीप्रतिभा सविशेषेण दृश्यते तु सहृदयेषु भवयित्रीप्रतिभा, अत एव साधारणीकरणसिद्धान्तो घटते। इयमेव प्रख्योपाख्यारूपेण कथिता अभिनवगुप्तेन। अभिनवगुप्तः प्रतिभां नमस्कुर्वता उवाच- यस्याः स्फुरणेन समग्रं विश्वं स्फुरितं भवति, तां प्रतिभां शिवां प्रणमामि। यथा-

यदुन्मीलनशक्त्यैव विश्वमुन्मीलति क्षणात्।
स्वात्मायतनविश्रान्तां तां वन्दे प्रतिभां शिवाम्॥[1]

अभिनवगुप्तमते प्रतिभा शिवस्य शक्तिर्विद्यते। प्रतिभोन्मेषेण कवित्वशक्तिः समुल्लसति। सा प्रतिभा सर्वकामदुधा कथिता। प्रतिभैव शिवस्य विमर्शकारिणी शक्तिः। तन्त्रालोकग्रन्थे तेन प्रतिभायाः माहात्म्यमित्थं प्रदर्शितम्-

चिन्वन्ति प्रतिभां देवीं सर्वज्ञत्वादिसिद्धये।[2]
आद्योद्रेकमहत्त्वेऽपि प्रतिभात्मनि निष्ठिताः॥
ध्रुवं कवित्व-वक्तृत्वशालितां यान्ति सर्वतः॥[3]
गुरुशास्त्रप्रमाणादेरप्युपायत्वमञ्जसा।
प्रतिभा परमेवैषा सर्वकामदुधा यतः॥[4]

अभिनवगुप्तपादाचार्येण शैवदर्शनमनुसृत्यात्रप्रतिभारूपा शिवाख्या पराशक्तिः वन्दिता। शैवदर्शनानुसारं परमशिवः कूटस्थतत्त्वमस्ति, किन्तु तं कूटस्थतत्त्वमायतनविश्रान्ता पराशक्ति एव स्वोन्मीलनशक्त्या झटित्यैव विश्वमुन्मीलयति। साहित्ये अस्या अयमर्थोऽभिव्यज्यते यत् कविप्रतिभैव नवनवोन्मेषशालिनी प्रज्ञाऽस्ति, सैव शिवास्वरूपा वर्तते, या महाकविषु रससिद्धकविषु वा निवसति अपि च स्वोन्मीलनशक्त्या साहित्यसंसारमुन्मीलयति, प्रकाशयति च।

निष्कर्षतः तन्मतमित्थं विद्यते- **चरमसत्ता तु परमशिव एव। सिसृक्षाकाले परमतत्त्वमिदं द्विधा विभज्यते-शिवतत्त्वं शक्तितत्त्वञ्च। प्रथमं प्रकाशरूपं तु द्वितीयं विमर्शस्वरूपमस्ति।** विमर्शदर्पण एव प्रकाशतत्त्वं स्वाहमभावं बोधयति। अस्मात् कारणादेव नाट्यशास्त्रस्याभिनवभारतीटीकायां प्रत्यध्यायं शिवतत्त्वं शिवातत्त्वञ्च प्रणम्येते तेन। यथा-

---

1. तत्रैव-1 पृ.-172
2. तन्त्रालोकः- 10/210
3. तत्रैव - 11/78,79
4. तत्रैव - 11/156

षट्त्रिंशकं भरतसूत्रमिदं विवृण्वन्वन्दे शिवं श्रुतितदर्थविवेकि धाम।
विश्वबीजप्ररोहार्थं मूलाधारतया स्थितम्। धर्तुशक्तिमयं वन्दे धरणीरूपमीश्वरम्।।[1]

लोचनटीकायामपि शैवी दृष्टिरियं सर्वत्र व्याप्ता दरीदृश्यते। तन्मते सारस्वततत्त्वं नाम कविसहृदयाख्यम्। तत्त्वमिदं प्रख्योपाख्याभ्याम् (दर्शनावर्णनाभ्यां) अपूर्वं पदार्थं सर्जयति, प्रस्तरसदृशनीरससृष्टिमपि सरसं करोति, तथैव भासयत्यपि।

वस्तुतोऽभिनवगुप्तेन कविप्रतिभां शिवाशक्तिञ्चैकरूपत्वमङ्गीकृत्य स्वचिन्तनमुपस्थापितम् । विश्वसृष्टि-शैवीसृष्ट्योः प्रक्रिया-परिणत्योरैक्यञ्च संकेतितम्। सा शिवा वन्दनीयाऽस्ति, या निरन्तरं स्वीये स्वरूपे एव विश्रान्ता तिष्ठति। विश्रान्तिरेव तु आनन्दः, अस्याः शक्त्या उच्छलनमेव विश्वमिदम्। काव्यसर्जनेऽपि इयमेव प्रक्रिया प्रवर्तते, तया शक्त्यैव कवयः काव्यसर्जनं कुर्वन्ति। काव्यसन्दर्भे, काव्यसर्जनसन्दर्भे सैव शक्तिः प्रतिभा नाम्ना सक्रिया भवति। सैव प्रतिभा कविहृदयेषु निरन्तरं वासनारूपत्वेन विद्यमाना भवति प्रतिभेयं शिवा, रसावेशवैवद्यसुभगा च वर्तते। प्रतिभेयं वर्णनीयवस्तुनिष्ठा प्रज्ञाविशेषा इति अपरनाम्ना ज्ञायते। अस्या उन्मीलने तदनुरूपं विश्वाभासोऽनुभूयते, परिलक्ष्यते च।

लोचनटीकायाः प्रत्युद्योतं प्रारम्भेऽन्ते चेयं प्रतिभादेवी या शिवा शक्तिस्वरूपाऽस्ति, तस्याः निरूपणं प्राप्यतेऽथ चानेनैव परा-पश्यन्ती-मध्यमा-वैखरीरूपां वाणी अपि प्रणम्यते।[2]

सन्दर्भेऽस्मिनभिनवगुप्तेन शक्ति-व्युत्पत्योरपि परिभाषा कृता। यथा-

शक्तिः प्रतिभानं वर्णनीयवस्तुविषयनूतनोल्लेखशालित्वम्।
व्युत्पत्तिस्तदुपयोगिसमस्तवस्तु पौर्वापर्यपरामर्शकौशलम्।।[3]

---

1. संसारनाटयजननधातृबीजलताजुषीम्।
जलमर्तिं शिवां पत्युः सरसां पर्युपास्महे।-द्वितीयोऽध्यायः।
स्वविलासैरिदं विश्वं यो दर्शयति सन्ततम्।
अभिनवभारती-प्रथमोऽध्यायः-2,3

2. या स्मर्यमाणा श्रेयांसि----स्तुवे शिवाम्।।
प्राज्यं प्रोल्लासमात्रं----पश्यन्तीं तामिदं जगत्।।
स्मरामि स्मरसंहार-----हरन्ती परमेश्वरीम्।।
आसूत्रितानां भेदानां-----वन्दे मध्यमां परमेश्वरीम्।।
कृत्यपञ्चक निवहि-----तां नौमि शाङ्करीम्।
समीरमूर्तिं तं वन्दे गिरिराजसुताप्रियम्।चतुर्थोऽध्यायः
संसारनाटयनिर्माणे याऽवकाशविधानतः।
पूर्वरङ्गायते व्योममूर्तिं तां शाङ्करीं नुमः।।-पञ्चमोऽध्यायः।
स्फुटीकृतार्थवैचित्र्य------वन्दे प्रत्यक्षार्थनिदर्शिनीम्।।

3. लोचनटीका-तृतीय उद्योतः-पृ.-346

अर्थात् वर्णनीयविषयवस्तुसंबन्धे किमपि नूतनं कथ्यनिरूपणं, नवीनञ्च तथ्यप्रदर्शनमेव शक्तिः, सैव प्रतिभा। तेषां वर्णनीयानां समस्तविषयवस्तुनां पौर्वापर्यपूर्वकं परामर्शकौशलमेव व्युत्पत्तिः। परवर्तिनि काले साहित्यशास्त्रेऽभिनवगुप्तप्रतिपादितं प्रतिभास्वरूपं सर्वथा स्वीकृतम्। लावण्यमित्थं निरूप्यते तेन- **लावण्यं हि नामावयवसंस्थानाभिव्यङ्ग्यमवयवव्यतिरिक्तं धर्मान्तरमेव।** अर्थात् लावण्यं तु धर्मविशेषो यदवयवानां संघटनेनाभिव्यज्यते, परमवयवेभ्यः पृथक्मेव भासते। एवमेव मुक्तकं लक्षयता तेनोक्तम्- **पूर्वापरनिरपेक्षेणापि हि येन रसचर्वणा क्रियते तदेव मुक्तम्' इति।**

प्रत्यभिज्ञा- अभिनवगुप्तपादाचार्यमते प्रत्यभिज्ञादर्शनस्य संबन्धो मनुष्यमात्रेण सह वर्तते। ध्वन्यालोकस्य-**यत्नतः प्रत्यभिज्ञेयौ तौ शब्दार्थौ महाकवेः** इत्यस्य व्याख्याप्रसङ्गे लोचनटीकायां प्रत्यभिज्ञानशब्दस्य विशिष्टा व्युत्पत्तिः प्राप्यते। महाकविभ्यः तादृशौ शब्दार्थौ प्रत्यभिज्ञेयौ, याभ्यां प्रतीयमानार्थोऽभिव्यज्यते । यद्यपि ज्ञातस्य वस्तुनः पुनर्ज्ञानमेव प्रत्यभिज्ञानं कथ्यते तथाप्यत्र ज्ञानस्य विशेषरूपेणानुसन्धानमेव प्रत्यभिज्ञानमित्यनेन बोधयेत्। लोकव्यवहारे शब्दार्थयोः सामान्यरूपं दृश्यते, किन्तु काव्ये प्रयुक्त एव तयोः सीमा-सामर्थ्यविस्तरेणापूर्वमेव स्वरूपं प्रकाश्यते परिलक्ष्यते च। अतः ज्ञातस्य ज्ञानमेव नापितु ज्ञातस्य पुनः पुनरनुसन्धानरूपविशेषनिरूपणं प्रत्यभिज्ञानं वा कुर्यादिति। कथ्यमिदं महाकवि-सहृदयाभ्यां समानरूपेणापेक्ष्यते। आध्यात्मिकक्षेत्रेऽपि एवमेव सञ्जायते- ईश्वर आत्मनोऽभिन्नत्वेऽपि स्ववैभवं न प्रकटयति, स्वस्य विशेषरूपेण प्रत्यभिज्ञानाभावात्। काव्यसर्जनेऽपि शब्दार्थयोः प्रयत्नपूर्वकं प्रत्यभिज्ञानमपेक्षितं भवति। अभिनवगुप्तपादाचार्याः प्रत्यभिज्ञादर्शनस्य प्रतिष्ठिता आचार्याः सन्ति अतः स्वाभाविकमेव यत्तेषां साहित्यिकचिन्तनेषु दार्शनिकसिद्धान्तस्य प्रभावो भवेत्- **तेनज्ञातस्यापि विशेषतो निरूपणमनुसन्धानात्मकमत्र प्रत्यभिज्ञानं, न तु तदेवेदमित्येतावन्मात्रम्।**

रससिद्धान्तोऽभिनवगुप्तश्च-

साहित्यशास्त्रस्य विवेच्यतत्त्वेषु रसतत्त्वं सर्वप्रधानमित्यत्र नास्ति काऽपि विप्रतिपत्तिः। रसो न केवलं नाट्यस्यापितु काव्यस्यापि आत्मतत्त्वरूपेण समादृतो वर्तते। रसस्वरूपनिरूपण-रसानुभूति-रसनिष्पत्तिप्रक्रियाप्वभिनवगुप्तस्याभिमतं यथा समादृतं तथैव तन्निरूपिता प्रक्रियाऽपि परवर्तिभिराचार्यैः साहित्यसमीक्षकैश्चाभिनन्दिता स्वीकृता समादृता च। रसनिष्पत्तिप्रक्रियासन्दर्भे तन्निरूपितो रसाभिव्यक्तिवादो न केवलं भारतीयसाहित्येऽपितु विश्वसाहित्येऽपि समानरूपेण समादृतः प्रतिष्ठितश्च। परवर्तिनि काले रसाभिव्यक्तिवादमाश्रित्यैव साहित्यसमालोचनायाः प्रक्रिया प्रवर्तिता प्रतिष्ठिता च। साम्प्रतमपि भारतीयसाहित्यसमीक्षायाः प्रमुख आधारोऽभिव्यक्तिवाद एव स्वीक्रियते। तदनुसृत्यैवाधुनाऽपि साहित्यसमीक्षा प्रवर्तते।

अभिनवगुप्तः शैवदर्शनस्यालोके काव्यरसं रसनिष्पत्तिप्रक्रियां च विवेच्य, तं रसतत्वं, रसानुभूतिप्रक्रियां च चरमां प्रतिष्ठां प्रदत्तवान्। आनन्दवादिना तेन मन्यते यत्काव्यं तु वस्तुतो रसमयमेव, रसस्यैव वस्तुतः काव्यात्मत्वात् । पूर्णताया अपरं नाम आनन्दः। पूर्णता एव विश्रान्तिः,

अतो यावदस्या परामर्शो न विधीयते, तावन्न भवति रसमयता। एतदर्थमपूर्णतायाश्चैतन्यस्य मुक्तिरनिवार्या। मुक्तिः विषयभूमिकायां भावभूमिकायाम् उत वा उभयातीतस्वरूपस्य भूमिकायां भवतु।

शैवदर्शनानुसारं संविद्विश्रान्तिरेव आनन्दस्य मूलम्। यदा चित्तं विगलितपरिमितप्रमातृभाव-वशोन्मिषितेवेद्यान्तरसम्पर्कशून्यं भूत्वा विश्रान्त्यवस्थां तिष्ठति तदैव आनन्दानुभूतिः संभाव्यते। अनया दृष्टया परमानन्द–काव्यानन्द–विषयानन्देषु स्वरूपतो न किमपि पार्थक्यं प्रतीयते परं प्रक्रियाविश्रान्त्योर्मात्रात्मकं पार्थक्यं नूनमेव तिष्ठति। विषयानन्दे विषयव्यवधानं दृश्यते, काव्यानन्दे तेषां साक्षात् व्यवधानं तु न भवति परं तेषां संस्काराणां प्रभावो तु भवत्यैव, किन्तु ब्रह्मानन्दे तु शुद्धसंवेदनरूपता एवानुभूयते, स्वतन्त्रचित्तस्य पूर्णपरामर्शो जायते, अतोऽयमेव परमानन्दः, वास्तविकी निर्वृत्तिश्च।

काव्यानन्दो विषयानन्दाद्विलक्षणो भवति विगलितवेद्यान्तरत्वात् । विषयानन्दे चेतना परविषयान्मुखी भवति, काव्यानन्दानुभूतौ न तादृशी स्थितिः संलक्ष्यते। तत्र न कस्यापि विषयस्यार्जनविसर्जनयोर्वार्त्ता। अत एव इयमनुभूतिः **'वीतविघ्ना'** कथ्यते, अत्र प्रकाशतत्वस्यापेक्षया हृदयतत्त्वं प्रधानं भवति। परमानन्दे विषयतायाः स्पर्शोऽपि न भवति शुद्धसंवेदनरूपत्वात्। पूर्णस्वात्मपरामर्श एव परमानन्दरूपता। अतोऽभिनवगुप्तमते इयं संविद्विश्रान्तिरेवानन्दस्य मूलम् । विश्रान्तेरस्याः प्रयोजिकाऽस्ति आत्मपरामर्शरूपता। आत्मपरामर्शेण संविद्विश्रान्तिरियं विभिन्नासु भूमिकासु भवितुं शक्नोति – विषयभूमिकायां, भावस्य भूमिकायां निज–चित्तस्वभावभूमिकायां च। एतासु भावभूमिकायां जायमाना संविद्विश्रान्तिरेव काव्यरसोऽस्ति।

इत्थमभिनवगुप्तमते भावभूमिकायाम् आत्मपरामर्शत्वेन या संविद्विश्रान्तिर्भवति सैव रसः। तन्मते आनन्दमयज्ञानरूपमात्मन एव रसरूपेणास्वादनं जायते। आत्मा आनन्दरूपं वर्तते रसश्चाप्यानन्दरूपमास्वाद्यत्वात्। ईश्वरप्रत्यभिज्ञाविवृतिविमर्शिनीग्रन्थे तेनोक्तम्– **स्वरूपस्य स्वात्मनः परिपूर्णनिजस्वभावप्रकाशनमेव परामर्शमयतादद्यदानन्द इत्युच्यते– यत्रापि अत्यन्तमन्यथाभावमति-क्रम्य सुखमास्वाद्यते अर्जनादिसंभाव्यमानविघ्नान्तरजिरासाद् वैषयिकानन्दविलक्षणशृंगारादौ नाट्यकाव्यादिविषये तत्र वीतविघ्नत्वादैव असौ रसनाचर्वणां निर्वृत्तिः प्रतीतिः प्रमातृता-विश्रान्तिरेव।**

तन्मते रस एव काव्यमस्ति– **'रस एव नाट्यं नाट्यमेव रसो वा।** काव्यरसं परोक्षप्रायं नाट्यरसञ्च प्रत्यक्षमिति द्वयोर्मध्ये पार्थक्यमपि परिलक्ष्यते। सन्दर्भेऽस्मिन् तन्त्रालोकग्रन्थे तेन सविस्तरेण विवेचितम्।

अभिव्यक्तिवादः– भरतरससूत्रस्य चतसृषु सुप्रसिद्धासु व्याख्याष्वभिनवगुप्तपादाचार्यस्य व्याख्याऽभिव्यक्तिवादनाम्ना ज्ञायते। तन्मते रसो व्यङ्ग्यः, विभावानुभावव्यभिचारिणश्च व्यञ्जकाः सन्ति। रससूत्रे समागता **'निष्पतिः'** इत्यस्य पदस्यार्थोऽस्ति–**अभिव्यक्तिः।** संयोगपदेन व्यङ्ग्यव्यञ्जक-भावसम्बन्धश्च ज्ञायते। अभिव्यक्तिवादानुसारं सामाजिकहृदये वासनारूपेणावस्थिताः रत्यादिस्थायिभावाः विभावादिभिर्व्यङ्ग्यव्यञ्जकभावेनाभिव्यज्यन्ते। वैयक्तिकरागद्वैषादीनां लोपात् साधारणीकरणेनैव

रसानुभूतिर्भवति। एकेनैव व्यञ्जनाव्यापारेण साधारणीकरणमपि सम्पद्यते, रसास्वादनप्रक्रियाऽपि निष्पद्यते।

वस्तुतोऽभिनवगुप्तपादाचार्येण स्वपूर्ववर्तिनामाचार्याणां मतानि संशोध्य परिशुद्धं मतं स्थापितम्। यथा-चोच्यते तेन-

ऊर्ध्वोर्ध्वमारूह्य यदर्थतत्त्वं धीः पश्यति श्रान्तिमवेदयन्ती।
फलं तदाद्यैः परिकल्पितानां विवेकसोपानपरम्पराणाम्॥
चित्रं निरालम्बनमेव मन्ये प्रमेयसिद्धौ प्रथमावतारम्।
सन्मार्गलाभे सति सेतुबन्धपुरप्रतिष्ठादि न विस्मयाय॥
तस्मात् सतामत्र न दूषितानि मतानि तान्येव तु शोधितानि।
पूर्वप्रतिष्ठापितयोजनासु मूलप्रतिष्ठाफलमामनन्ति॥[1]

अभिनवभारत्यामभिव्यक्तिवादेन सह भट्टलोल्लटस्योत्पत्तिवादस्य, भट्टशङ्कुकस्यानुमितिवादस्य भट्टनायकस्य भुक्तिवादस्यापि व्याख्यानं सविस्तरेण प्राप्यते। मम्मटादिभिचार्यैरभिनवभारतीमाधृत्यैव रससूत्रस्य चतुर्धा व्याख्याः काव्यप्रकाशादिग्रन्थेषु निरूपिताः, सिद्धान्तरूपेण स्वीकृतश्चाभिव्यक्तिवादः।

इत्थमिदं स्पष्टरूपेण प्रतीयते यत् रसानुभूतिप्रक्रियासन्दर्भेऽभिव्यक्तिवाद एव रसनिष्पत्तिमवबोधयितुं सर्वोत्तमा वैज्ञानिकी पद्धतिर्वर्तते, या समग्रभारतीयसाहित्ये साहित्यसमीक्षकानां चिन्तने चानुस्युताऽस्ति।

काव्यप्रकाशस्य सङ्केतटीकाकारेण माणिक्यचन्द्रेणाभिनवगुप्तपादाचार्यस्याभिनन्दनमित्थं क्रियते-

न वेत्ति यस्य गाम्भीर्यं गिरितुङ्गोऽपि लोल्लटः।
तत्तस्य रसपाथोधेः कथं जानातु शङ्कुकः।
भोगे रत्यादिभावानां भोगं स्वस्योचितं ब्रुवन्।
सर्वथा रससर्वस्वमभाङ्क्षीत् भट्टनायकः॥
स्वादयन्तु रसं सर्वे यथाकामं कथंचन।
सर्वस्वं तु रसस्यात्र गुप्तपादा हि जानते॥[2]

अभिनवगुप्तस्यैका अन्या च महत्वपूर्णा स्थापना विद्यते- साहित्यशास्त्रे शान्तरसस्य प्रतिष्ठापनम्। तैः सप्रमाणं शान्तरसः सर्वविधकाव्येषु मूलरसरूपेण स्थापितः। तन्मते शन्तरसः सर्वेषु रसेषु श्रेष्ठः, परमपुरुषार्थमोक्षनिष्ठत्वात्। यथा- **मोक्षफलत्वेन चाऽयं परमपुरुषार्थनिष्ठत्वात् सर्वरसेभ्यः प्रधानतमः।** तन्मते शान्त एव प्रकृतिरसोऽन्ये च तस्यैव विकृतयः। अत एव तेन शान्तो रसो मूलरसरूपेण प्रोक्तः।

1. अभिनवभारती-षष्ठोऽध्यायः-पृ. 650-651
2. सङ्केतटीका-चतुर्थ उल्लासः-पृ.-240

भारतीयसंस्कृतेः भारतीयजीवनदर्शनस्य च पर्यालोचनेन मतमिदं सर्वथा समुचितं प्रतीयते।[1] परवर्तिभिराचार्यैरभिनवगुप्तस्य शान्तरसविषयकावधारणा पूर्णरूपेणाङ्गीकृता। मम्मटविश्वनाथजगन्नाथ-प्रभृतिभिराचार्यैः काव्यनाट्ययोरुभयत्र शान्तरसस्य सत्ता स्वीकृता।

इत्थमनेन परिशीलनेन निर्णीयते यत् संस्कृतसाहित्यं साहित्यशास्त्रञ्चाभिनवगुप्तपादाचार्यस्य विचारेण पल्लवितं पुष्पितञ्च वर्तते। साहित्यशास्त्रे तेषामवदानस्य निरूपणमेकस्मिन् शोधपत्रे दुष्करमेव, तथापि संक्षेपेणात्र तन्निरूपितं साहित्यशास्त्रीयं चिन्तनमुपस्थापितम्। भारतीयसाहित्यस्य श्रीवृद्धौ अभिनवगुप्तपादाचार्याः सूर्यसदृशाः देदीप्यमानाः सन्ति, येषां विचाररूपिणः किरणाः भारतीयसाहित्यं साहित्यशास्त्रञ्च सदैव प्रकाशयिष्यन्ति।। इत्यलम्।।

---

1. द्रष्टव्यम्- मम समीक्षाग्रन्थः - संस्कृतसाहित्ये साहित्यशास्त्रे च शान्तरसविमर्शः - संजयप्रकाशनम्, प्र. संस्करणम्-2016

ध्वनिविचारेऽभिनवस्य वैयाकरणी दृष्टिः

श्रीबद्रीनारायणगौतमः

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥[1]

विषयप्रवेशः – को न परिचितोऽस्तीह भारते अभिनवतया साहित्यभारती भाति अनुसृत्यैव अभिनवभारतीं तत्र भवतो अभिनवगुप्तस्य। सुधीधीचर्वितमेव विषयं यत् लौकिकालङ्कारप्रदर्शने न हि क्षम आलोको लोचनं विना, तदेव सहसा वदति अभिनवस्य भारती न दम्भतामातनोति। यथा –

किं लोचनं विनाऽलोको भाति चन्द्रिकयाऽपि हि।
तेनाभिनवगुप्तोऽत्र लोचनोन्मीलनं व्यधात्॥[2]

कश्मीरस्य केशरी अस्ति वैक्रमैकसहस्राब्दौ लब्धजनिः अभिनवगुप्तः। त्रिकदर्शनस्य उत काश्मीरशैवदर्शनस्य प्रचारकोऽयं स्वलेखन्या साहित्यशास्त्रमलङ्कृतवान्। यथा न वाच्यार्थः सहृदयाहृदयाह्लादने क्षमो ध्वन्यर्थं विना तथैव भाति साहित्यमस्य लोचनं विना। महतां महनीयं कार्यन्तु महत्या एव वाण्या श्रावणाय भाव्यं भवति तथाऽपि यतेऽहं तत्र भवतो अभिनवगुप्तस्य ध्वन्यालोकलोचने वैयाकरणिं दृष्टिं प्रदर्शने।

विषयस्योत्थापनम् –

तत्र हि ध्वन्यालोकलोचनस्य चर्चार्थं प्रयतिते प्रथममिदमवश्यंतया ज्ञातव्यं भवति यत् ध्वन्यालोकलोचनं कस्मिन् ग्रन्थे टीकितम्, आधारभूतस्य च ग्रन्थस्य कः सिद्धान्तोऽस्तीति। तत्र हि यथाऽन्यस्मिन् दर्शनक्षेत्रे स्थूलरूपमेव जगतः तत्त्वत्वेन प्रथितः खण्डितश्च सः आचार्यशङ्करप्रभृतिभिः "ब्रह्म सत्यं जगन्मिथ्या" इत्यादिना, तथैव साहित्यदर्शनक्षेत्रेऽपि स्थूलवादस्य प्रतिष्ठाऽसीत् इत्यनुभूयते। "शब्दार्थौ सहितौ काव्यम्" इत्यादिभिः शब्दार्थयोः बाह्यं स्वरूपमेव काव्यतत्त्वत्वेन स्वीकृत्य अलङ्कारादीनि च उज्ज्वलकानि स्वीकृतानि आसन् तथैव पूर्वतः एव सूक्ष्मरूपेण स्थितं काव्यात्मवादिदर्शनमुद्भावयन् आनन्दं वर्धितमस्ति आनन्दवर्धनेन। अतः स्वयमेव वक्ति सः आदावेव –

---

1. वा.प.1.1
2. ध्वन्यालोकः, लोचनटीका पृ.सं. 171

काव्यस्यात्मा ध्वनिरिति बुधैर्यः समाम्नातपूर्वः
तस्याभावं जगदुरपरे भाक्तमाहुस्तमन्ये।
केचिद्वाचां स्थितमविषये तत्त्वमूचुस्तदीयं
तेन ब्रूमः सहृदयमनःप्रीतये तत्स्वरूपम्।।[1]

इत्थञ्च ध्वन्यालोके अभाववादिनम्, भाक्तवादिनम्, अलक्षणीयतावादिनं च खण्डयित्वा स्थापयति ध्वनिवादं यथा –

प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।
यत्तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु।।[2]

इत्थञ्च महाकवीनां वाणीषु यद्वस्तु प्रतीयमानमस्ति तदेव ध्वनिपदवाच्यम्। एवञ्च काव्यस्यात्मा अपि अस्ति इति –

काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा।
क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः[3]**।।**

इत्यादिना रसध्वनिः ध्वनिवादे सिद्धान्तत्वेन स्थापित आचार्येण तत्र ध्वनिः इति तु वैयाकरणनये द्विविधा स्वीक्रियते प्राकृतध्वनिः, वैकृतध्वनिश्चेति। कवेः कर्म काव्यमिति उक्त्या शब्दातिरिक्तं तु न भवति कवेः कर्म इति रीत्या शब्द एव काव्यम् इति रसध्वनेः आत्मतत्त्वत्वेन स्थापनमेव ध्येयमस्ति ध्वन्यालोकस्य इति ज्ञायते।

ध्वन्यालोकलोचनम् –

तत्र भवता गुप्ताभिधेन अभिनवेन निर्मिते ध्वन्यालोकलोचने ध्वन्यालोकस्य एव व्याख्यानं सुस्पष्टं विहितमस्तीत्यत्र चर्चैव भवति ज्ञातपूर्वत्वात् प्रलापविषया। तत्र ध्वनिवादस्य स्थापनार्थमानन्दवर्धनेन यदुदाहृतं तदेव सम्यक्तया नियमानुसरणेन च प्रकटयन् अभिनवमेवार्थमभिदधात्यभिनवः। तत्र हि रसरूपस्य शब्दब्रह्मणः त्रिविधा एव ध्वनिशक्तिरिति वदत्यभिनवोऽनुश्रुतिम् "एवं वस्त्वलङ्काररसभेदेन त्रिधा ध्वनिरत्र श्लोकेऽस्मद्गुरुभिर्व्याख्यातः[4]" श्रुतिश्चात्र "त्रिपादूर्ध्वमुदैत्पुरुषः" इति, तत्र च रसध्वनेरेव पुनः मुख्यतां प्रतिपादयति काव्यस्यात्मा स एवास्ति इत्यत्र यथा – "स एवेति प्रतीयमानमात्रेऽपि प्रक्रान्ते तृतीय एव रसध्वनिरिति मन्तव्यम्, इतिहासबलात् प्रक्रान्तवृत्तिग्रन्थार्थबलाच्च। तेन रस एव वस्तुत आत्मा, वस्त्वलङ्कारध्वनी तु सर्वथा रसं प्रति पर्यवस्येत इति वाच्यादुत्कृष्टौ तावित्यभिप्रायेण

1. ध्वन्यालोक: 1
2. ध्वन्यालोक: 4
3. ध्वन्यालोक: 5
4. ध्वन्यालोक: लोचनटीका पृ.सं. 7

ध्वनिः काव्यस्यात्मेति सामान्येनोक्तम्"[1] इति। "अथ ॐ इत्येतद्ब्रह्म", "रसो वै सः", "रसं ह्येवायं लब्ध्वानन्दी भवति" इत्यादिना श्रुतिना शब्दब्रह्मणो या रसात्मकता रसरूपता वा वर्णिता सा एव प्रतिपाद्यतेऽनया इति न केवला सहृदयहृदचाह्लादिका अपि तु परमपुरुषार्थरूपस्य मोक्षस्यापि निदर्शिका अभिनवनिःसृताऽभिनवा भारती इति सडिण्डिमं घोषयितुं शक्यते।

ध्वनिविचारः -

ध्वनिशब्दस्य व्युत्पत्तिस्तु इत्थं विहितस्तत्राभिनवगुप्तेन - **अर्थो वा शब्दो वा व्यापारो वा। अर्थोऽपि वाच्यो वा ध्वनतीति शब्दोऽप्येवम्। व्यङ्ग्यो वा ध्वन्यत इति, व्यापारो वा शब्दस्य ध्वननम् इति। कारिकया तु प्राधान्येन समुदाय एव काव्यरूपो मुख्यतया ध्वनिरिति प्रतिपादितम्**[2] इति। इत्थञ्च एषोक्तिः "सिद्धे शब्दार्थसम्बन्धे" इति वार्त्तिकं स्मारयति। तत्र हि शब्दो वा शब्दार्थो वा शब्दशब्दार्थयोः सम्बन्धो वा नित्यमिति चर्चा भवति। तत्र वाक्यपदीयेऽपि यथा -

नित्याः शब्दार्थसम्बन्धास्तत्राम्नाता महर्षिभिः।
सूत्राणां सानुतन्त्राणां भाष्याणाञ्च प्रणेतृभिः॥[3]

इत्थं त्रिविधात्मककथनं वैयाकरणानां ससम्मानमवतारयन्निव दृश्यते। तत्र महाभाष्ये अथ शब्दानुशासनमिति व्याख्यानप्रसङ्गे गौरित्यत्र कः शब्दः इत्याशङ्क्य शुक्लचलनादीनां सर्वेषां निषेधपुरःसरं "येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति सः शब्दः" इति। अत्र हि येन इति स्फोटेन इत्यर्थः, अस्य स्फोटार्थत्वं तु उत्तरत्रस्थितेन भाष्यवाक्येन "अथवा प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते" इत्यनेन अन्वयानुपपत्त्या ज्ञायते। स एव स्फोटाभिधो ध्वनिः शब्दब्रह्मस्वरूपः। उभयत्र संप्रत्ययः प्रतीत इति कथनेन "प्रतीयमानं पुनरन्यदेव" इत्यादिश्लोकानां बोधो भवति। तत्र यद्यपि वैयाकरणनये "तपरस्तत्कालस्य"[4] इति सूत्रे भाष्ये एवञ्च -

यः संयोगविभागाभ्यां करणैरुपजन्यते।
स स्फोटः शब्दजाः शब्दाः ध्वनयोऽन्यैरुदाहृताः॥[5]

इति वाक्यपदीये ध्वनिस्फोटयोः परस्परं भेदः संस्थापितस्तथापि स्फोटत्वेन रूपेण अत्र रसध्वनेर्वर्णनम्, ध्वनित्वेन च पुनः वस्त्वलंकारध्वनी गृह्येते इति न कश्चिद्विरोधः। वैयाकरणनये ध्वनिः व्यञ्जकत्वेन एव स्वीकृतः न तु व्यङ्ग्यत्वेन, एतदेव प्रतिपादयति -

---

1. ध्वन्यालोकः लोचनटीका पृ.सं. 86
2. ध्वन्यालोकः लोचनटीका पृ.सं. 104-105
3. वा.प.ब्र.का.23
4. पा.सू. 1.1.70
5. वा.प.ब्र.का.102

ग्रहणग्राह्ययोः सिद्धा योग्यता नियता यथा।
व्यङ्ग्यव्यञ्जकभावेन तथैव स्फोटनादयोः॥[1]

अत्र नादपदेन ध्वनिः गृह्यते, तत्र ध्वनिवादः वैयाकरणानां प्रभावेणैव आरब्ध आनन्दवर्धनेन इति वदन्ति काव्यविदः, यतो हि तत्र काव्यस्यात्मा ध्वनिरिति बुधैः इति प्रथमे श्लोके ध्वनिः समाम्नातपूर्व आसीदित्युक्तत्वात्। स्फोटायनपरम्परातः सम्प्राप्ता स्फोटपरम्परा वैयाकरणनिकाये ध्वनितः पृथगेव अवसीयमाना दृश्यते। प्राकृतो ध्वनिः, वैकृतो ध्वनिरिति ध्वनिद्वैविध्यं स्वीकृत्य प्राकृतो ध्वनिः केवलं स्फोटस्य हेतुर्भवति, वैकृतस्तु ध्वनिः वृत्तिभेदे हेतुर्भवतीति प्रतिपाद्यते यथा –

स्फोटस्य ग्रहणे हेतुः प्राकृतो ध्वनिरिष्यते।
वृत्तिभेदे निमित्तत्वं वैकृतः प्रतिपद्यते॥

तथा च ध्वनीनां भेदे सत्यपि स्फोटात्मारूपः शब्दस्तु एक एव इति वैयाकरणानां नये यथा **ध्वनयः समुपोहन्ते स्फोटात्मा तैर्न भिद्यते**[2] इत्यादिस्थले वृत्तिभेदे वैकृताः ध्वनयो भवन्ति इति कथितत्वात् लोचनकारेण अभिधालक्षणाभ्यां विचित्रा या व्यञ्जनात्वेन प्रसिद्धासीत् तामेव ध्वनित्वेन स्वीकारो विहितः। इत्थञ्च लोचनकारः वैयाकरणातिरिक्ताः ध्वनिशब्दस्य व्यङ्ग्यार्थः, व्यञ्जकः शब्दः, व्यञ्जकोऽर्थः, व्यञ्जनाव्यापारः एते च यत्र भवन्ति तदपि काव्यं ध्वनिपदवाच्यमिति ध्वनेः पञ्चविधत्वं प्रतिपादयति। यथा "तेन वाच्योऽपि ध्वनिः वाचकोऽपि शब्दो ध्वनिः द्वयोरपि व्यञ्जकत्वं ध्वनतीति कृत्वा। सम्मिश्रयते विभावानुभावसंवलनयेति व्यङ्ग्योऽपि ध्वनिः ध्वन्यत इति कृत्वा। शब्दनं शब्दः शब्दव्यापारः, न च साभिधादिरूपः अपि त्वात्मभूतः सोऽपि ध्वनिः। काव्यमिति व्यपदेश्यश्च योऽर्थः सोऽपि ध्वनिः उक्तप्रकारध्वनिचतुष्टयमयत्वात्।[3]" इति। इत्थञ्चात्र ध्वन्यालोके ध्वनिशब्देन न केवलं व्यङ्ग्यार्थमेव अपेक्षितमपितु व्यञ्जकमपि अपेक्षितमिति वैयाकरणैः सह स्फोटविषये असाम्यत्वेऽपि वैयाकरणानां स्फोटवादेन एव आकर्षितो ध्वनिसिद्धान्तकारः इति ज्ञातुं शक्यते। पुष्टिश्चात्र भवति तत्र अभिनवगुप्तेन विविधप्रसङ्गे भर्तृहरेः कारिकाणामुद्धरणं विधाय व्याख्यातत्वात्, तत्र हि ध्वन्यालोके ध्वनेरन्यत्राऽन्तर्भावो भवति न वा इति पक्षमुद्भाव्य तत्र कथं ध्वनिरङ्गी, अङ्गानि च अलङ्काराः गुणाः वृत्तयश्च इति प्रतिपाद्यते, किमस्ति तत्र प्रमाणमिति आशङ्क्यन्निव सूरिभिः कथितः इत्युक्तप्रायत्वात् तत्र "प्रथमे हि विद्वांसो वैयाकरणाः, व्याकरणमूलत्वात्सर्वविद्यानाम्। ते च श्रूयमाणेषु वर्णेषु ध्वनिरिति व्यवहरन्ति"[4] इति व्याख्यातम्। तत्र श्रूयमाणेषु वर्णेषु ध्वनिरिति व्यवहरन्ति इति वाक्यस्य व्याख्यानप्रसङ्गे "श्रोत्रशाष्कुलीं सन्तानेनागता अन्त्याः शब्दाः श्रूयन्त इति प्रक्रियायां शब्दजाः शब्दाः श्रूयमाणाः

1. वा.प.ब्र.का.96
2. वा.प.ब्र.का.78
3. ध्वन्यालोकः लोचनटीका पृ.सं. 141–142
4. ध्वन्यालोकः लोचनटीका पृ.सं. 132

इत्युक्तम्। तेषां घण्टानुरणनरूपत्वं तावदस्ति, ते च ध्वनिशब्देनोक्ताः। यथाह भगवान् भर्तृहरिः -

यः संयोगविभागाभ्यां करणैरुपजन्यते।
स स्फोटः शब्दजाः शब्दाः ध्वनयोऽन्यैरुदाहृताः॥[1]

अत्र हि लोचने तेषां घण्टानुरणनरूपत्वं तावदस्ति ते च ध्वनिशब्देनोक्ताः इत्यस्य त्वयमभिप्रायः - यथा प्रदीपः प्रभया सहैवोत्पद्यते, दूराच्च प्रदीपस्य अपरिच्छेदेऽपि प्रदीपप्रभा परिच्छिद्यते, तथा स्फोटोऽपि स्थानकरणसंयोगविभागाभ्यां सहैव जायते, किन्तु महाजनसमवाये दूरात् स्फोटो न लक्ष्यते न प्रतीयते, ध्वनिमात्रं तु लक्ष्यते। घण्टादीनां चाभिघातेन जायमानेषु शब्देषु सः भेदः स्फोटनादयोर्भेदो व्यक्तो भवति। यथा अभिघातजः प्रथमः तारतरः शब्दः तदन्यस्तु तज्जन्यो नाद इति स्पष्ट एव भेदः। एतदेव तत्र कथितं वाक्यपदीये यथा -

दूरात् प्रभेव दीपस्य ध्वनिमात्रं तु लक्ष्यते।
घण्टादीनां च शब्देषु व्यक्तो भेदः स दृश्यते[2]**॥**

अत्र पूर्वस्मिन् संयोगविभागाभ्यां स्फोटो जायते प्राक् तदुत्तरं तु तज्जन्या ध्वनयस्तत्प्रति-बिम्बोपग्राहिणस्तद्व्यञ्जका इति। अनया च कारिकया सहजेन ध्वनिनाविर्भावकाल एव सम्बद्धः स्फोटस्तेन तत्प्रतिबिम्बोपग्राहिणा व्यज्यते इति मतद्वैविध्यं यद्यपि दृश्यते तथापि घण्टारणनेन साधितः स्फोटोऽनित्यशब्दवादिनां मते इति पूर्वापरसंगतिः करणीयेति तत्र अम्बाकर्त्रीटीकायां प्रतिपादिता इत्यन्यदेतत्। अत्र च लोचनकारः तत्रोपस्थापितं पक्षद्वयमेव व्याख्याय ध्वनेरेव पञ्चविधत्वं संस्थाप्य भर्तृहर्युक्तिभिः सामञ्जस्यं स्थापयति। यथा - "अस्माभिरपि प्रसिद्धेभ्यः शब्दव्यापारेभ्योऽभिधा-तात्पर्यलक्षणारूपेभ्योऽतिरिक्तो व्यापारो ध्वनिरित्युक्तः। एवं चतुष्कमपि ध्वनिः, तद्योगाच्च समस्तमपि काव्यं ध्वनिः। तेन व्यतिरेकाव्यतिरेकव्यपदेशोऽपि न युक्तः[3]" इति। एवं प्रकारेण वैयाकरणनये वाचकत्वेन व्यापारत्वेन कुत्रचित् च वाच्यार्थत्वेनापि संवर्ण्य वाचकत्वमेव संपोषितस्य ध्वनेः पञ्चविधत्वं सरलतया प्रतिपाद्यापि वैयाकरणैः भृशं सामञ्जस्यप्रदर्शनेन वैयाकरणानां मानवर्धापनपुरःस्सरं स्वमतं प्रसारयति संस्कृतभारतीप्रसारचातुरी अभिनवस्य भारती। तत्र वैयाकरणानामेव भाषाविज्ञानमुत दर्शनशास्त्रं समनुसृत्य शब्दाख्यस्य परब्रह्मणः वैखरीरूपां तुर्यां शक्तिं प्रणम्य स्वव्याख्यानतो विरमति। यथा -

स्फुटीकृतार्थवैचित्र्यबहिःप्रसरदायिनीम्।
तुर्यां शक्तिमहं वन्दे प्रत्यक्षार्थनिदर्शिनीम्॥[4] इति शम्॥

---

1. वा.प.ब्र.का.102
2. वा.प.ब्र.का.104
3. ध्वन्यालोकः लोचनटीका पृ.सं. 141
4. ध्वन्यालोकः लोचनटीका पृ.सं. 603

दार्शनिकाचार्याभिनवगुप्तस्य संक्षिप्तपरिचयः

श्रीसंदीपपैन्यूली

अभिनवगुप्तस्य पितुः नाम नृसिंहगुप्तः, मातुः नाम विमला च। तयोः त्रीणि अपत्यानि आसन्। तेषु ज्येष्ठः अभिनवगुप्तः। अभिनवगुप्तस्य भ्रातुः नाम मनोरथः, भगिन्याश्च नाम अम्बा इति। अभिनवगुप्तस्य माता विमला 'विमलकला' इत्यपि प्रसिद्धा। यतो हि अभिनवगुप्तः स्वरचनासु विमलकला इति नामोल्लेखम् अकरोत्। विमलकला काचित् योगिनी आसीत्। अतः तस्याः पुत्रः अभिनवगुप्तः 'योगिनीभूः' इति प्रसिद्धः। नृसिंहगुप्तस्य अपरं नाम 'चुलुलकः' इति आसीत्। अभिनवगुप्तस्य पितृव्यस्य नाम वामनगुप्तः आसीत्। अभिनवभारत्याख्ये ग्रन्थे वामनगुप्तेन रचितैः श्लोकैः सह अभिनवगुप्तः स्वपितृव्यस्य नामोल्लेखम् अकोरत्। वामनगुप्तस्य पञ्च पुत्रा आसन्। तेषां नामानि क्रमेण क्षेमः, उत्पलः, अभिनवः, चक्रकः, पद्मगुप्तश्च।[1] अभिनवगुप्तः स्वयम् अविवाहित आसीत्। परिवार एव विदुषाम् उपस्थितित्वाद् अभिनवगुप्तः बाल्यकाले पाठशालां न गतवान्। सः स्वपरिवारसदस्येभ्यः एव ज्ञानार्जनम् अकरोत्। अभिनवगुप्तस्य पिता नृसिंहगुप्तः संस्कृतव्याकरणस्य, तर्कशास्त्रस्य च विद्वान् आसीत्।[2] पितृव्यः वामनगुप्तः काव्यशास्त्रस्य विद्वान्। अतः ताभ्यामेव अभिनवगुप्तः ज्ञानार्जनम् अकरोत्। परन्तु युवावस्थायां अभिनवगुप्तस्य ज्ञानापिपासा प्रचण्डा अभवत्। शैवधर्मस्य दृष्टिकोणं, परम्परां च ज्ञातुं, यः गुरूः स्वयं शैवशास्त्रीयपरम्परायां प्रशिक्षितः स्यात्, तादृशस्य गुरोः सः आवश्यकताम् अन्वभवत्। अभिनवगुप्तस्य गुरूषु प्रथमगुरूः लक्ष्मणगुप्तोभवत्। सः प्रत्यभिज्ञायाः, क्रमदर्शनस्य, त्रिकदर्शनस्य च ज्ञाता आसीत्। लक्ष्मणगुप्तस्य पिता उत्पलाचार्यः सोमानन्दस्य शिष्य आसीत्। उत्पलाचार्यादेव ज्ञानार्जनं कृत्वा लक्ष्मणगुप्तः पितरमेव गुरूत्वेन प्रास्थापयत्। अभिनवगुप्तः (ई. 950-1020) काश्मीरी[3] दार्शनिकः, रहस्यवादी, सौन्दर्यवेत्ता च। तस्य गणना सङ्गीतज्ञ-कवि-नाट्यकार-पाण्डुलिपिज्ञ-वेदान्तज्ञ-तर्कवित्त्वेनपि भवति। तस्य बहुज्ञव्यक्तित्वधननिनो प्रभावः भारतीयसंस्कृतौ प्रत्यक्षमस्ति।[4] काश्मीरस्य महाकवेः गृहे प्राप्तजन्मा अभिनवगुप्तः अनेकविद्यापीठेभ्यः दर्शनस्य, कलायाचच ज्ञानं प्राप्तवान्। दर्शनकलयोः ज्ञानप्राप्त्यै तेन पञ्चदशधिकानां शिक्षकाणां, गुरूणां च मार्गदर्शनं प्राप्तम्। तस्य रचनासु पञ्चत्रिंशद् मुख्यरचनाः प्रसिद्धाः सन्ति। तासु सर्वासु रचनासु प्रसिद्धतमा रचना तन्त्रालोकः इति। त्रिक्-कालौ-आचारयोः सर्वेषां दार्शनिक-व्यावहारिक-पक्षाणां

1. ध्वन्यालोकस्य लोचनटीका श्लो.-26
2. नायकस्य कवेः कर्तुः समानोऽनुभस्ततः, ध्वन्यालोकः आचार्यजगन्नाथपाठकः, पृष्ठ 92
3. अभिनवगुप्तदार्शनिक
4. प्रत्याभिज्नादर्शन पृष्ठ 12

तस्मिन् ग्रन्थे सङ्कलनम् अस्ति। तन्त्रालोक-ग्रन्थ एव काश्मीरिशैवदर्शनम् इति प्रसिद्धः। तन्त्रालोकग्रन्थवदेव प्रसिद्धतमा तस्य अपरा कृतिः सौन्दर्यशास्त्रसम्बद्धा। तस्याः कृतेः नाम 'अभिनवभारती' इति। अभिनवभारती इति भरतमुनेः नाट्यशास्त्रस्य व्याख्याग्रन्थः। अभिनवगुप्तस्य विचाराः बौद्धमतप्रभाविता आसन्।

माध्वाचार्यप्रणीते 'शङ्रदिग्विजयः' इत्याख्ये ग्रन्थे उल्लिखितं यत्, शाक्तभाष्यकारेण अभिनवगुप्ताख्येन विदुषा सह शङ्कराचार्यस्य शास्त्रार्थः जातः, तस्मिन् शास्त्रार्थे आदिशङ्कराचार्याद् अभिनवगुप्तः पराजित इति। सः शाक्तमतानुयायी अभिनवगुप्तः आचार्यभिनवगुप्ताद् भिन्नः मन्यते।[1] यतो हि सः अभिनवगुप्तः कामरूपस्य (असमराज्यस्य) निवासी आसीत्। तन्त्रालोकस्य रचयिता आचार्याभिनवगुप्तः तु काश्मीरनिवासी शैव आसीत्।

आचार्यः अभिनवगुप्तः स्वग्रन्थेषु विभिन्नगुरूणां स्मरणं श्रद्धया करोति। तस्य गुरुषु प्रसिद्धानां नामानि सन्ति, यथा -

1. नृसिंहगुप्तः (व्याकरणशास्त्रज्ञः), 2. वामनाथः (द्वैताद्वैततन्त्रज्ञः), 3. भूतिराजतनयः (द्वैतवादी शैवसम्प्रदायज्ञः), 4. लक्ष्मणगुप्तः (प्रत्यभिज्ञा-क्रम-त्रिक-दर्शनज्ञः), 5. भट्टेन्दुराजः (ध्वनिसिद्धान्तज्ञः, काव्यशास्त्रज्ञः), 6. भूतिराजः (ब्रह्मविद्याज्ञः), 7. भट्टतौतः (नाट्यशास्त्रज्ञः)

अभिनवगुप्तस्य नाट्यशास्त्रस्य गुरूः भट्टतौतः ''काव्यकौतुकम्'' इत्याख्यं ग्रन्थम् अरचयद् इति लोचनटीकायाम् अभिनवगुप्तः समुल्लिखति। तस्मिन् काव्यकौतुके अभिनवगुप्तः 'विवरणम्' अपि अलिखत्।[2] अभिनवभारत्याः अन्तिमे अभिनवगुप्तः कथयति यद्

द्विजवरतोतनिरूपितसन्ध्यध्यायार्थतत्त्वघटनेयम्।
अभिनवगुप्तेन कृता शिवचरणाम्भोजमधुपेन।।[3]

भट्टेन्दुराजः अभिनवगुप्तस्य काव्यशास्त्रस्य गुरु आसीत्। सम्भवतः आचार्यम् अभिनवगुप्तं भट्टेन्दुरेव ध्वन्यालोकम् अपाठयत्। स्वस्य पुस्तकेषु अभिनवगुप्तः भट्टेन्दोः उद्धरणम् नैकवारम् कृतवान्। ध्वन्यालोकस्य ''लोचनम्'' इत्याख्यायाः टीकायाः आरम्भे अभिनवगुप्तः भट्टेन्दुं नमस्करोति।[4] 'लोचनम्' इत्याख्यायां टीकायाम् अभिनवगुप्तः बहुत्र 'ध्वनिरत्र श्लोकोऽस्मद्गुरुभिर्व्याख्यातः', 'इत्याशयोऽत्र ग्रन्थेऽस्मद्गुरूभिर्निरुपितः', 'अस्मद्गुरवस्त्वाहुः' इत्यादीनां वाक्यानाम् प्रपयोगम् अकरोत्। एतादृशैः वाक्यैः विद्वांसः मन्यन्ते यद्, अभिनवगुप्तस्य गुरुणा भट्टेन्दुनाऽपि ध्वन्यालोकस्योपरि काचित् टीका

1. तदनन्तरेष कामरूपानधिगत्वभिनवोपशब्दगुप्तम्।
अजयत् किल शाक्तभाष्यकारं स च भग्नो मनसेदमाललोचे।। शङ्करदिग्विजयः 15.158
2. ध्वन्यालोकः आचार्यजगन्नाथपाठकः पृष्ठ 434
3. ध्वन्यालोकः लोचनम्।
4. भट्टेन्दुराजचरणाब्जकृताधिवासहृदयश्रुतोऽभिनवगुप्तपदाभिधोऽहम्।
यत्किञ्चिदप्यनुरणन्स्फुटयामि काव्यालोकं स्वलोचननियोजनया जनस्य।।

लिखिता स्यादिति। बूह्लर् (Georg Buhler) इत्याख्यस्य काश्मीराभिलेखे उल्लेखोऽस्ति यद्, भट्टेन्दोः विषये अभिनवगुप्तेन स्वग्रन्थे (श्रीमद्भगवद्गीतायाः टीकायां) उल्लेखः कृतोस्ति इति।

श्रीमद्भगवद्गीतायाः टीकायाम् उल्लेखोस्ति यद्, भट्टेन्दुः कात्यायनगोत्रोत्पन्न आसीत्। सः सौचुकस्य प्रपौत्रः, भूतिराजस्य च पुत्रः असीदिति।[1]

अभिनवगुप्तः न केवलं वसुगुप्तस्य विषये जानाति अपितु तेन लिखितानां ग्रन्थानां गूढाध्ययनम् अपि करोति स्म। वास्तव्येन अभिनवगुप्तः वसुगुप्तस्य एव शिष्यपरम्परायाम् आसीत्। वसुगुप्तस्य शिष्येषु द्वे प्रमुखे परम्परे स्तः। प्रथमा तु प्रद्युम्नाद् प्रारभते। अपरा च सोमानन्दाद् प्रारभते। प्रद्युम्नस्य पुत्रः प्रज्ञाराजः स्वपितरं गुरुत्वेन स्वीचकार। तस्यां शिष्य-परम्परायां प्रमुखेषु शिष्येषु भास्करस्य, अभिनवगुप्तस्य च गणना भवति। सोमानन्दाद् आरब्धायां शिष्यपरम्परायां सोमानन्दस्य प्रसिद्धः शिष्यः उत्पलाचार्यः मन्यते। तस्य उत्पलाचार्यस्य पुत्रः लक्ष्मणगुप्तः एव अभिनवगुप्तस्य प्रथमो गुरुः समभवत्। एवं वसुगुप्तस्योभयोः परम्परयोः सङ्गमोऽभिनवगुप्ते भवति स्म।

ध्वन्यालोकग्रन्थमधिकृत्य अभिनवगुप्तस्य टीका 'लोचनम्' इति प्रसिद्धा। परन्तु विभिन्नासु पाण्डुलिपिसु 'सहृदयालोकलोचनम्', काव्यालोकलोचनम्' इत्यपि प्राप्यते। परवर्तिनः ग्रन्थकाराः आचार्यस्य अभिनवगुप्तस्य स्मरणकाले 'लोचनकारः' इति सम्बोधयन्ति। ध्वन्यालोकग्रन्थे कृता 'लोचनम्' इत्याख्यायाः स्वटीकायाः नामसार्थक्यविषये अभिनवगुप्तो वदति यद्,

किं लोचनं विनाऽऽलोको भाति चन्द्रिकयाऽपि हि।
तेनाभिनवगुप्तोऽत्र लोचनोन्मीलनं व्यधात्।।[2]

ध्वन्यालोकग्रन्थस्योपरि लोचनटीकायाः प्राक् 'चन्द्रिका' इत्याख्या टीका चाप्यस्ति। चन्द्रिकाकारः लोचनटीकायां बहुत्र सन्दर्भितः अभिनवगुप्तेन।[3] उक्ते श्लोकेऽपि सन्दर्भः दरीदृश्यते। अभिनगुप्तस्य जन्म उत मृत्योः विषये सन्दर्भानां न्यूनता अस्ति। किंवदन्त्यनुसारम् उत ग्रन्थान्तरोल्लेखेन एव तस्य मृत्योः विषये अनुमानं भवति। अभिनवगुप्तस्य मृत्योः विषये कथा प्रचलिता अस्ति यद्, अभिनवगुप्तः सशिष्यः भैरवस्तोत्रस्य पाठं कुर्वन् काञ्चन कन्दरां प्रविष्टः। यदा सः कन्दरां प्रविष्टः, तदा या तिथिः आसीत्, सा उपलभ्यते। 'वसु' रसपौषे कृष्णदशम्याम्' अर्थात् अष्टषष्टितमस्य संवत्सरस्य (विक्रमसंवत्सरः न अपि सप्तर्षिसंवत्सरः मन्यते), पौष-मासस्य, कृष्णपक्षस्य, दशमी तिथिः इति। 1016 वर्षः भवति। भैरवस्तोत्रस्य रचनायाः काले अभिनवगुप्तः गुहां प्रविष्टः ततः तस्य निर्वाणं मन्यते। अतः ई. 1016 एव तस्य निर्वाणवर्षः मन्यते।[4]

---

1. ध्वन्यालोकः आचार्यजगन्नाथपाठकः, चौखम्बा विद्याभवन
2 ध्वन्यालोकस्य लोचनटीका उद्योतः-1, श्लो. 19
3. ध्वन्यालोकः आचार्यजगन्नाथपाठकः, पृष्ठ 434, 451
4. ध्वन्यालोकः आचार्यजगन्नाथपाठकः, प्रस्तावना, पृष्ठ 24

त्रिकशास्त्राभिमतं गीतादर्शनम्
(अभिनवगुप्तकृतभाष्यस्य सन्दर्भे)

श्रीहरीशकुमारः

गीतायाः प्रामाण्यं प्रमाणान्तरानपेक्षमिति मतं भारतीयश्रुतिविदामभिमतम्। तस्मादेव गीतायाः सर्वशास्त्रोपकारकत्वं प्रतिपादयन्तो मनीषिणः ''गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः'' इति जगदुः। विभिन्नमार्गावलम्बिन आचार्याः शंकरादयः गीतामादाय व्याख्यानं चक्रुः। अस्यामेव गीताव्याख्यान-परम्परायामभिनवगुप्तप्रणीतं त्रिकशास्त्रसम्मतं[1] भाष्यमन्यतममस्ति। आचार्यप्रदत्ता गीतार्थसंग्रह इतीयं संज्ञा विशिष्टप्रयोजनं व्यनक्ति। अन्वर्थेन तु विचारिते सति गीतायाः यदर्थं प्रयोजनं वा तस्य संग्रहत्वाद्गीतार्थसंग्रह इति संज्ञा। यथोक्तमाचार्येणापि–

तास्वन्यैः प्राक्तनैर्व्याख्याः कृता यद्यपि भूयसा।
न्यायस्तथाप्युद्यमो मे तद्गूढार्थप्रकाशकः।।[2]

इतोऽपि अष्टादशाध्यायेषु विद्यमानं विषयमध्यायकृतान्तरूपैः अष्टादशश्लोकैः संग्रहकरणादपि गीतार्थसंग्रह इति नाम निर्धारितम्। भाष्यमेतद्वेदान्तादपि सूक्ष्मविषयप्रतिपादकम्।

परमाद्वयप्रकाशनादिति अभिनवगुप्ताभिमतम्। एतद्भाष्यानुसारं भगवत्सम्मतं गीतादर्शनं परिशीलनायैव शोधपत्रस्यास्य प्रवृत्तिः।

आचार्याभिमतं गीतायाः प्रतिपाद्यम्- मोक्ष एव गीतायाः प्रतिपाद्यो विषय इत्यभिवगुप्तपादानां निर्णयः[3]। मोक्षश्च तत्त्वज्ञानानन्तरमेव प्राप्तुं शक्यम्। बन्धस्य तत्त्वस्वरूपावरणरूपत्वात्। तस्मादेव भगवान् मोहपाशावृतधियोऽर्जुनस्य अज्ञानावरणमपाकर्तुं तत्त्वस्वरूपं तत्प्राप्त्युपायांश्च वर्णयामास। एतत्सर्वं भाष्यानुरूपं यथामति विचार्यते।

मोक्षस्वरूपम्- भारतीयदर्शनाध्वनीनां मोक्ष एव ध्येयः। आचार्येण मांगलिकश्लोके मोक्षस्वरूपं निर्णीतम्। सकलाप्रविभागरूपे शुद्धस्वभाववति परमात्मनि भेदधियो लय एव मोक्षः[4]। अतः मलात्मिकया

1. शिवाद्वयवादस्यैव त्रिकशास्त्रमिति नामान्तरम्, नरशक्तिशिवात्मकत्वात्। उक्तमपि परात्रिंशिकायां - नर-शक्ति शिवात्मकं हि इदं सर्वं त्रिकरूपमेव, प.त्रिं.पृ.117
2. गी.सं., मांगलिकश्लोकेषु परिगणितम्
3. तत्रैव
4. मोक्षश्च नाम सकलाप्रविभागरूपे सर्वज्ञसर्वकरणादिशुभस्वभावे।
   आकांक्षया विरहिते भगवत्यधीशे, नित्योदिते लय इयान्प्रथितं समासात्।। गी.सं., मांगलिकश्लोकः।

अविद्यया शुभस्वभावरूपाणां विद्यात्मकसंकल्पानां अभिभावकत्वमेव बन्धः[1]। एतद्ज्ञापयितुमेव प्रथमाध्यायारम्भः। एषामेव विद्याविद्यात्मकानां भावानां देवासुरसृष्टिरिति नामान्तरम्। अध्यायारम्भे यदुक्तं धर्मक्षेत्रे इति, तत्र क्षेत्रं शरीरस्यैव नामान्तरम्, सकलधर्माणां विद्याविद्यात्मकानामधिकरणत्वाद्। शरीरमेतत् त्राणभूतं न तु जुगुप्साविषयः अपवर्गप्राप्तौ साधनभूतत्वादिति आचार्यमतवैशिष्ट्यम्[2]। अतः विद्याविद्यात्मकानां धर्माणां यत्क्षेत्रं तस्मिन् धर्मक्षेत्रे स्थिताः ये मामकीनाः क्लेशमूलाः अविद्यामयाः संकल्पाः, ये च शुद्धविद्यात्मनः पाण्डवाः संकल्पाः ते किमकुर्वन् इत्यभिप्रायः। अतः अर्जुनसंज्ञाविशिष्टे क्षेत्रे अशुद्धकुरुभावैरावृतान् पाण्डुभावान् उद्घाटयितुमेव भगवदुपदेशस्य विनियोगः।

तत्त्वस्वरूपम्-तत्त्वं मूलतया द्विविधं शुद्धमशुद्धञ्च। यदशुद्धं तत्प्राप्तजीवभावः परिमितस्वभाववान् मलावृतः संसारी आत्मा पुरुषो वोच्यते तदितरं शुद्धस्वातन्त्र्यशक्तिसम्पन्नोऽपरिमितस्वभाववान् सर्वज्ञसर्वकर्तृत्वादिशक्तियुतः परमेश्वरः शिवो वा प्रोच्यते[3]। अतः पूर्णः परमेश्वरोऽपूर्णश्च आत्मा तस्यैव अंश। परमात्मा च ज्ञानक्रियादियुक्तः तर्हि कथं आत्मनो अकर्तृत्वं प्रकृतेश्च कर्तृत्वं भगवादभिमतं आत्मनो तदंशत्वदिति? यथोक्तं भगवतैव–

प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः।
अहंकारविमूढात्मा कर्ताहमिति मन्यते॥

आत्मनोऽकर्तृत्वं विचारयत्याचार्यः, कर्मफलावाप्तिर्बन्धः कर्मफलानवाप्तिश्च मोक्षः। मोक्षावस्था परमात्मभावः, बन्धश्च आत्मभावः। अतः आप्तकर्मफलः आत्मा अनाप्तकर्मफलश्च स एव परमात्मा शिवो वेति। तस्मात् कर्म आत्मनः स्वभाव एव इति सिद्धम्। परञ्च परमात्मना क्रियमाणं कर्म सृष्टिस्थितिसंहारात्मकं सत्वरजस्तमोभिरननुषक्तं तस्माच्छुद्धं, श्वासप्रश्वासयोर्निमेषोयोरिव स्वाभाविकमिति विशेषः[4]। स एव च आत्मा प्राप्तजीवभावः प्राकृतैः गुणैरावृतः प्राप्तविशिष्टधीः विशेषफलेप्सयैव कर्माणि आचरति। तस्माच्च आत्मानं बध्नाति। अतः एतान्येव कर्माणि प्राकृतानि विशिष्टबुद्ध्यात्मकानि अनात्मकर्माण्युच्यन्ते, न तु षाड्गुण्यादीनि स्वभाविकानि[5]। यदा च परामात्मभावेन विशिष्टबुद्धिरहितेन कर्माणि कुरुते तदा स्वभावे शिवमय एव तिष्ठति। अतः ऊर्णनाभोपमः चिदानन्दघनस्वभावः परमशिव

---

1. अयं बन्धः आत्मन एव न तु सांख्यानामिव प्रकृतेः। यथोक्तं भाष्येऽपि– न हि कर्माणि स्वयं बध्नन्ति– जडत्वात् अतः स्वयमात्मा कर्मभिर्वासनात्मकैरात्मानं बध्नाति - जडत्वात् ; अतः स्वयमात्मा कर्मभिर्वासनात्मकैरात्मानं बध्नाति। गी.सं. 2.40
2. सम्स्तधर्माणां क्षयादपवर्गप्राप्त्या त्राणभूतं तदधिकारी शरीरम्, गी.सं., 1.1
3. परिमितव्याप्तिकं रूपमालम्ब्य आत्मेति भण्यते, अपरिछिन्नसर्वक्षेत्रव्याप्त्या परमात्मा भगवान् वासुदेवः गी.सं., 13.3
4. एष आत्मा न किञ्चित्कस्यचित्करोति। प्रवृतिस्त्वस्य स्वभावमात्रं न फलेप्सया तथाहि संवेदनात्मनो भगवतः प्रकाशानन्दस्वातन्त्रपरमार्थस्वभावस्य स्वभावमात्राक्षिप्तसमस्तसृष्टिस्थितिसंहतिप्रबन्धस्य स्वभावान्न मनागप्यपायो जातुचित्। इति न कर्त्रवस्थातिरिक्तं कर्तृत्वं किञ्चित् गी.सं. 5.14
5. श्रीभगवान्किल पूर्णषाड्गुण्यत्वाच्छरीरसंपर्कमात्रोऽपि स्थितिकारित्वात्कारुणिकतया आत्मांशं सृजति। अंशः– उपकारकत्वेनाप्रधानभूतो यत्र तदात्मांशं शरीरं गृहणातीत्यर्थः, गी.सं. 4.7

एव निमेषोन्मेषात्मकेन अन्तर्मुखबहिर्मुखभावेन ज्ञानक्रियामूर्तिरूपेण तत्त्वान्तरेषु षट्त्रिंशत्सु विद्यते। अतः स तन्मयः तत्त्वानि च तन्मयानि यथोक्तं प्रत्यभिज्ञाहृदये तेन शब्दार्थचिन्तासु न सावस्था न यः शिवः[1]। अतः तत्त्वानां सर्वेषां तस्मिन्नेव लयोद्भवौ वर्तेते। एतदेव स्वरूपं ब्रह्मणोऽपि गीतायां वर्णितमित्याचार्याभिमतम्। श्रीकृष्णेन ब्रह्मणः स्वरूपं श्लोकेनानेन गीतम्–

अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते।
भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः[2]।।

तत्रैवाचार्यः ब्रह्मणो बहिर्भावत्वरूपां ऐश्वर्यलक्षणां शक्तिं प्रतिपादयन् तस्य जडाजडोद्भावकत्वं वर्णयति[3] अतः विश्वमयं विश्वोत्तीर्णञ्च तत्त्वं त्रिकशास्त्राभिमतं, भगवता च ब्रह्मपदवाच्यम्।[4]

जगतः स्वरूपम्- चेतनाचेतनात्मकं पुरुषप्रकृत्यात्मकं शक्तिसंकोचमयं जगत् सत्यमेव शिवमयत्वात्, न तु वेदान्त इव मिथ्या। वस्तुतया चेतनाचेतनयोरभेद एव वर्तते। चिच्छक्तेः अपोहनेतरं नाचेतनं नाम किञ्चित्। भगवता प्रकृतिपुरुषयोः स्वरूपं सविस्तरं प्रतिपादितं, तदेव भाष्यदृशा अत्र विमृश्यते।

1. प्रकृतिपुरुषयोः विचारः -

सांख्यानामिव प्रकृतिपुरुषयोः विवेकप्रतिपादनमात्रमेव न भगवतो ध्येयम्। वस्तुतः भगवतः परात्मिका मायैव अपरावस्थायां प्रकृतिरित्युच्यते।[5] अत्र भाष्यकारः सांख्यानां प्रकृतिकारणतावादेऽपि अद्वैतवादमेव प्रदर्शयति[6] एकत्वात् प्रकृतेः। अतः उभयरूपा सा भेदाभेदमयी सांख्यानां त्रिगुणात्मिका पुरुषेतरा अचेतना प्रकृतिरपि तत्रैव शुद्धचैतन्ये विमलमुकुरोपमे शक्तिमति आश्रयमाप्नोति। अयं सिद्धान्तः त्रिकशास्त्रे बिम्बप्रतिबिम्बवाद् इत्यभिधीयते[7], आत्मनो विमलमुकुरोपमत्वात्, प्रकृतेश्च तद्व्यभिचरणत्वात्। अतः शुद्धश्चिदात्मा शिव एव जगतः मूलं न तु अशुद्धस्वभावा जडात्मिका प्रकृतिरिति सांख्यादपि विशेषः। यथा चाह उत्पलाचार्यः-

---

1. प्रत्यभिज्ञाहृदयम् - सू.सं. 5
2. भ.गी., 8.3
3. तत्रैव, गी.सं.
4. बर्ह्मण्यर्पणं - तत एव प्रवृत्तस्य पुनः तत्रैवानुप्रवेशनं यस्य तत्। ब्रह्म-समग्रं विश्वात्मकं यदेतत्, हविस्तत् गी.सं. ,4.24
5. भ.गी. 7.5
6. इयमिति-प्रत्यक्षेण या संसारावस्थायां सर्वजनपरिदृश्यमाना। सा चैकैव सतीप्रकाराष्टकेन भिद्यते इति एकप्रकृत्यारब्धत्वादेकमेव विश्वमिति प्रकृतिवादेऽप्यद्वैतं प्रदर्शितम्। गी.सं. 7.5
7. तत एव स्वात्मविमलमुकुरतलकलितसकलभावभूमिः स्वस्वभावात्मिका सततमव्यभिचारिणी प्रकृतिः। इदं जगत् - भूम्यादि। गी.सं. 7.5

स्वाङ्गरूपेषु भावेषु पत्युर्ज्ञानक्रिया च ये।
मायातृतीयेऽपि ते पशोः सत्त्वरजस्तमः॥

एतन्मतं भगवन्मतानुकूल्येन प्रदर्शयति भाष्यकृत् – देवः क्रीडाकरः, तत्र भवा दैवी-क्रीडा ममेयमित्यर्थः। तेन सत्त्वादीनां वस्तुतः सचिन्मात्रपरब्रह्मानतिरिक्ततायामपि यत्तदतिरिक्ततावगमनं तदेव गुणत्वं भोक्तृतत्त्वपारतन्त्र्यं भोग्यत्वम्। तच्च भेदात्मकं रूपं संसारिभिरनिर्वाच्यतया, तान् प्रति मायारूपम्[1]।

अतः जगतः परमात्मनि विद्यामानत्वात् सत्कार्यवादस्य पुष्टिरेव भगवत उद्देश्यम् ''नासतो विद्यते भावो नाभावो विद्यते सतः'' इत्यादि वचनग्रहणात्। अत्रैवाचार्येण भाष्ये निगदितं यन्नित्यत्वं तत्तु अक्षरस्य आत्मन एव न तु क्षरस्य कार्यरूपस्य नित्यविनाशिनः शरीरस्य न भावः[2]। अत्र कार्यस्य यदनित्यत्वमुक्तं न तन्मिथ्यात्वादपितु कार्यस्य शरीरादेः नैरन्तर्येणावस्था परिणामित्वादेवेति। अनवरतमवस्थाभिः परिणामित्वात्[3]।

अतः यत्स्थूलं जगत् तत्परिणामात्मकं कार्यकारणभावनियतं सत्त्वरजस्तमोमयं ज्ञानक्रियास्थितिशीलं प्रकृतेर्विकारभूतमिति। परञ्च चित्तत्त्वस्य प्रतिबिम्बत्वात् मूर्तभूताः पदार्थाश्चपि चिन्मया एव यथोक्तं भाष्येऽपि - सर्वं मन्मयत्वेन विदन् सर्वेण भावेन - मूर्तिक्रियाज्ञानात्मकेन मामेव भजते[4]। एतदेव भाष्यकृता शिवशक्त्यविनाभावस्तोत्रेपि निगदितम्।

तव च काचन मे स्तुतिरम्बिके, सकलशब्दमयी किल ते तनुः।
निखिलमूर्तिषु मे भवदन्वयो, मनसिजासु बहिष्प्रसरासु च[5]॥

अतः प्रकृतिपुरुषयोः न भेदोवस्तुतया कश्चिद्विद्यते। एतदभिप्रायेण त्रयोदशाध्यायस्य संग्रहश्लोकमकारि आचार्येण-

पुमान्प्रकृतिरित्येष भेदः संमूढचेतसाम्।
परिपूर्णास्तु मन्यन्ते निर्मलात्ममयं जगत्॥

आचारदर्शनम् – यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः। इत्येतैर्वचोभिः आचारस्य महत्त्वं जगाद प्रभुः। आचारः ज्ञानकर्मात्मकः, अत आचारवान् ज्ञानकर्मणी समुच्चयेनैव गृह्णीयादिति भगवन्मतं भाष्यदृशा विमृश्यते।

1. ज्ञानकर्मसमुच्चयः - फलासक्तिरहितं कर्मैव भगवदभिमतं, फलाशक्तिश्च ज्ञानानलेनैव दग्धुमर्हा। दग्धकर्मफलासक्तेरपि योगिनः नैष्कर्मण्यमसम्भवम्, शरीरयात्राऽपि च ते न प्रसिद्ध्येदकर्मणः[6]

1. गी.सं. 7.14
2. गी.सं. 2.17
3. तत्रैव
4. गी.सं. 5.19
5. गी.सं. 5.19 उद्धृतः
6. भ.गी. 3.8

इति भगवद्वचनग्रहणात्। इतोऽपि कर्मेन्द्रियाणि नियम्य अकुर्वतोऽपि जनस्य मानसव्यापारस्य अवश्यंभावित्वादपि नैष्कर्मण्यमसम्भवमेव। यथा चाह भाष्यकारः - कर्मेन्द्रियैश्चेन्न करोति, अवश्यं तर्हि मनसा करोति[1]।

अतः ज्ञानकर्मणोः विषये संशयात्मनोऽर्जुनस्य शंकामपाकर्तुं ज्ञानकर्मणोः उभयोरेव महत्त्वं वर्णयति–

लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयानघ।
ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम्[2]॥

अत्र लोक इति पदं व्यवहारमात्रसूचकमतः एतद्भगवदभिमतं परमार्थेन विचारयति भाष्यकारः - लोके एषा द्वयी गतिः प्रसिद्धा सांख्यानां ज्ञानं प्रधानं योगिनां च कर्मेति। मया तु सैकैव निष्ठा प्रोक्ता ज्ञानक्रियामयत्वात्संवित्तत्त्वस्येति भावः[3]। एतदेव चाग्रिमेण श्लोकद्वयेन स्पष्टयति।

न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते।
न च सन्न्यसनादेव सिद्धिं समधिगच्छति॥

न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्।
कार्यते ह्यवशः कर्म सर्वैः प्रकृतिजैर्गुणैः॥

तत्रैव च भाष्यकारः भगवदभिमतां ज्ञानकर्मणोरपरिहार्यतामेकरूपताञ्च वर्णयति[4]। पञ्चदश अध्यायस्य संग्रहतो केऽपि एतदेव वर्णयामास–

हत्वा द्वैतमहामोहं कृत्वा ब्रह्ममयीं चितिम्।
लौकिके व्यवहारेऽपि मुनिर्नित्यं समाविशेत्॥

आचारे सत्यतपः दानश्रद्धादेः वैशिष्ट्यमपि भगवता प्रतिपादितं, तच्च भाष्यकारेण यथास्थानं दर्शितम्। यत्प्रियं हितकरञ्च वचः तदेव सत्यं, न तु यथावृत्तकथनमात्रम्। श्रेष्ठजनपूजनं शुचिब्रह्मचर्यहिंसादीनि शारीरं तपः, स्वाध्यायाभ्यासादीनि वाङ्मयं तप इत्युच्यते। तपसि सत्त्वादिभावभिन्ना त्रिविधा श्रद्धा वर्तते। तपस्वी च श्रद्धानुगतमेव फलं प्राप्नोति। दातव्यबुद्ध्या क्रियमाणं कर्म एव दानं तच्च सत्पात्राद्यनुकूलमेव कार्यम् - दानस्य चासत्करणं तत्संप्रदानाद्यसत्करणात्।

तपसानेन क्रियात्मकेन निरन्तरसेव्यमानने विगतान्तःकरणोपरागः परिपक्वधीः जन एव सन्न्यासी, ज्ञानी, स्थितप्रज्ञो वाभिधीयते। केवलं कर्मेन्द्रियाणां नियन्ता तु तपस्वी न तु सन्न्यासी इति भावः।

1. गी.सं. 3.6
2. भ.गी. 3.3
3. गी.सं. 3.3, अनेन आत्मनो ज्ञानकर्तृमयत्वमपि साधितम् ज्ञानक्रियादिशक्तिमयस्यात्मनो त्रिकशास्त्रभिमतत्वात्।
4. ज्ञानं कर्मणा रहितं न भवति, कर्म च कौशलोपेतं ज्ञानरहितं न भवति, इत्येकमेव वस्तु ज्ञानकर्मणि। तस्माज्ज्ञानान्तर्वर्ति कर्मापरिहार्यम्, गी.सं. 3.5

तदनुगतञ्च यदाचरति तदा स एव योगी इत्यभिप्रायः। अतः तपस्वियोगिनोरपि ज्ञानदृष्ट्या सूक्ष्मो भेदो भवतीति।

यद्यपि आहार्यैः रूपादिभिर्विषयैः सम्बन्धोऽस्य नास्ति। तथापि तस्य विषया अन्तःकरणगतमुपरागलक्षणं रसं वर्जयित्वा निवर्तन्ते। अतो नासौ स्थिरप्रज्ञः। योगिनस्तु परमेश्वरदर्शनादुपरागो न भवति, अन्यस्य तु तपस्विनो नासौ निवर्तते[1]।

अतः कः योग स कथं साध्य इत्यायातक्रममत्र प्रदर्श्यते भाष्यदृशा।

2. सहजयोगः भक्तेरपरिहार्यता च–

योगस्थः कुरु कर्माणि संगं त्यक्त्वा धनंजय।
सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते॥

अतः योगी लोकोत्तरो मनसः नियामकत्वत्। यथोक्तं पूर्वमपि यः केवलमिन्द्रियाणां नियन्ता स न योगी अपितु तपस्वीत्युच्यते। तस्मात् सर्वकामसन्न्यासत्वाद्योगी एव मुक्तः, न तु तपस्वीति।

संगात्संसारं मुक्तसंगत्वान्मोक्षमिति च
तदर्थञ्च विषयाः क्लिष्टचित्तवृत्तिमभिभूय यज्ञभावेन सेव्या,
न तु त्याज्याः तेषां यज्ञमयत्वात्।
सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः।
अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक्॥

तत्रैव च भाष्यकृता भगवतोऽभिप्रायं स्पष्टीकृतम् – प्रजापतिः प्रजाः सहैव कर्मभिः ससर्ज। एतान्येव चेष्टं संसारं मोक्षं वा दास्यन्ति। यत्र येषां मोक्षप्राधान्यं तैरेव विषयाः सेव्या इत्युच्यते।[2]

तस्मादिन्द्रियाणि देवक्रीडारूपाणीति मत्वा विषयेषु प्रवर्तयेत्। यदा पारस्परिक–आदानप्रदानरूपेण दैविकेन यज्ञेनन्द्रियाणि तर्पितानि तदा तानि नूनमेव स्थिरतां यान्तीति आचार्याभिमतः भगवदुक्तः सहजयोगः।

यज्ञतर्पितानि हीन्द्रियाणि स्थिर्तिबध्नन्ति यत्र क्वापि ध्येयादाविति[3]।

पतञ्जलिनाऽपि चित्तवृत्तिनिरोधाय ''यथाभिमतध्यानाद्वा''[4] इति सूत्रेण सहजयोगः प्रदर्शितो न तु निषिद्धः। अतः चित्तवृत्तयो न बलान्निरोधव्याः।

---

1. गी.सं. 2.61
2. गी.सं. 3.10
3. गी.सं. 3.12
4. योगसूत्र, 1.39

यतो यतो निश्चरति मनश्चञ्चलमस्थिरम्।
ततस्ततो नियम्यैतदात्मन्येव वशं नयेत्॥ इत्येतद्भगवद्वचयनं स्पष्टयति भाष्यकारः।

यतो यतो मनो निवर्तते, तन्निवर्तनसमनन्तरमेव आत्मनि वशीकुर्यात्। अन्यथा अप्रतिष्ठं चित्तं पुनरपि विषयानेवावलम्बते[1]।

यतो हि इन्द्रियरूपैः देवैः प्रदत्तान् विषयान् यदि तेभय एव न ददाति कश्चित्, स तु चोर एव इति भाष्यकारः अत एव तद्व्यापारे सति तेषां विषयाणां स्मृतिसंकल्पध्यानादिना भावाः विषयाः इन्द्रियैरेव दत्ताः यदि तेषामेव उपभोगाय न दीयन्ते तर्हि स्तेनत्वं चौर्यं स्यात्, छद्माचारित्वात्। उक्तं हि पूर्वमेव भगवता मूढाचारः स उच्यते इति[2]।

अतः यज्ञशिष्टाशिनः नूनमेव सर्वपापविमुक्तः प्राप्तसमभावः योगी। तस्य च प्राप्तयोगभावस्य जनस्य योगभूमावनन्यत्वं भक्त्यैव सम्भवम्। अतः सहजयोगमाप्तुकामेन जनेन भक्तिरेव भगवतः सेव्या, सा च श्रद्धया सेव्यमाना अनुपायरूपा तीव्रशक्तिपातेन नूनमेव योगामृतं प्रदत्ते।

अनन्ययोगेनेति – परामात्मनो महेश्वरादन्यदपरं न किञ्चिदस्ति इत्यनन्यरूपो यो निश्चयः स एव योगः तेन निश्चयेन मयि भक्तिः। अत एव स न कदाचिद्व्यभिचरति, व्यभिचारहेतुत्वाभिमतानां कामनानामभावात्[3]।

एतदेव पतञ्जलेरभिमतमीश्वरप्रणिधानमिति शिवम्।

परिशिष्टम् – एतावच्च भाष्यदृशा भगवदभिमतं दर्शनन्तु व्याख्यातम्। अधुना च पाठभेदः प्रस्तूयते। गीतायाः मूलपाठविषयकोऽयं भेदः, न तु भाष्यविषयकः। अत्र न केवलं पाठान्तरमपितु श्लोकान्तरमप्यभिलक्ष्यते। अत्र केषुचिद् अध्यायेषु श्लोकसंख्यामाधिक्येन प्राप्नुमः। ते च अधस्तनया सूच्या यथासंख्यमुपस्थाप्यन्ते–

अध्याय - संख्या	**श्लोक - संख्या**
प्रथमोऽध्यायः	8 (पूर्वार्द्ध)
द्वितीयोऽध्यायः	56, 62
तृतीयोऽध्यायः	38–42 (पञ्च श्लोकाः अधिकाः)
षष्ठोऽध्यायः	10, 38
नवमोऽध्यायः	7
एकादशोऽध्यायः	28, 29, 42, 47, 48, 49

1. गी.सं. 6.26
2. गी.सं. 3.12
3. गी.सं. 13.12

पाठभेदश्च अनया सूच्या प्रदर्श्यते–

प्रचलितपाठः	भिन्नपाठः
युयुत्सवः (1.1)	सर्वक्षत्रसमागमे
यततोह्यपि (2.62)	यत्तस्यापि
मिथ्याचारः (3.6)	मूढाचारः
सर्वशः (3.27)	भागशः
जाग्रतः (6.16)	जागरतः[1]
वशं नयेत (6.26)	शमं नयेत्

एतेषु श्लोकान्तरेषु पाठान्तरेषु च केचन सावधानं विचारणीयाः सन्ति। यथा श्लोकान्तरेषु नवमाध्यायस्य सप्तमो श्लोकः–

एवं हि सर्वभावेषु चराम्यनभिलक्षितः।
भूतप्रकृतिमास्थाय सहैव च विनैव च॥

श्लोकोऽयं त्रिकशास्त्रानुकूलः गीतार्थसंग्रहसंवलितायां गीतायां प्राप्यते, अन्यत्र न। श्लोकेऽस्मिन् यदुक्तमनभिलक्षितमिति तद्विचारणीयम्। त्रिकदर्शनमहेश्वरभावानभिलक्षणमेव बन्धः, तस्य प्रत्यभिज्ञानात्मकमभिलक्षणञ्च मोक्ष इति। उत्पलाचार्योऽपि एतादृशार्थवर्णनपरां कारिकामाह–

किन्तु मोहवशादस्मिन्दृष्टेऽप्यनुपलक्षिते।
शक्त्याविष्करणेनेयं प्रत्यभिजोपदर्श्यते[2]॥

तत्रैव ''अनुपलक्षिते'' इति पदं विचारयत्यभिनवगुप्तपादः तदनुसारं सर्वं प्रकाशात्मतयैव अवभासमानमपि न प्रकाशात्मतया हृदयंगमीभावमाप्नोति, मायावृते संसारे भागेन प्रकाशमानत्वादात्मन इति[3]। अतः तदुपलक्षणायैव प्रत्यभिज्ञाशास्त्रस्य प्रवृत्तिरिति। एवमेव प्रकृतेः क्रियमाणानि गुणैः कर्माणि ''सर्वशः'' अत्र ''भागशः'' इत्यनेन पाठेन गीतायाः दर्शनमेव परिवर्तते। यतोहि सर्वशः इत्ययं पाठः सांख्यमतं पुष्णाति तत्र प्रकृतेः सर्वकर्तृत्वाद्, सर्वकारणत्वाच्च[4]। अन्यत्र च भागशः इत्यनेन पाठेन त्रिकशास्त्राभिमतस्य सिद्धिर्भवति। परिमितविषयप्रकाशनत्वात्प्रकृतेः। इतोऽपि ''वशं'' नयेत् अत्र

---

1. जगरत इत्यशुद्धोऽयं पाठः यथोक्तमाचार्येणैव - जागरतः - इत्यादि मुनेः प्रमाणत्वाद्वेदवत्, गी.सं. 6.18
2. ई.प्र.का. 1.2.2
3. सैव भगवतो माया विमोहिनी नाम शक्तिः, तद्वशात्प्रकाशात्मतया सततम् अवभासमानेऽपि आत्मनि भागेन प्रकाशनवशाद् अनुपलक्षिते सर्वथाहृदयंगमीभावमप्राप्ते अत एव पूर्णतावभासनसाध्याम् अर्थक्रियाम् अकुर्वति, तत्रैव ईश्वरप्रत्यभिज्ञाविमर्शिन्याम्।
4. मूलप्रकृतिरविकृतिः, सां.का., 3 पूर्वार्द्ध

''शमं'' इति पाठेन सहजयोगः सिद्ध्यति। एतदपि शिवाद्वयवादसम्मतमेव। अनेन पाठभेदेन न तु केवलं गीतायाः अपितु महाभारतस्य मूलपाठविषयेऽपि सन्देह उपजायते। अतः नूनमेवानुसन्धेयमेतत् यत् ईदृशो कश्चित्पाठः प्राप्यते? अथवा निजमतानुकूल्यायैव आगमिकानामेषः प्रयास इति शिवम्–

1. Gitartha samgraha (with English translation), Boris Marjanovic, Indica Books, 2004.
2. ईश्वरप्रत्यभिज्ञा, (उत्पलदेव) सम्पादक-मुकुन्द्रराम शास्त्री, प्रकाशक-बम्बई निर्णयसागरप्रेस – 1918
3. तन्त्रालोकः (अभिनवगुप्त) सम्पादक-नवजीवनरस्तोगी, मोतीलाल, वाराणसी, (1987)
4. प्रत्यभिज्ञाहृदयम् क्षेमराजः, प्रकाशकः – मोतीलाल बनारसीदास,
5. पातञ्चलयोगदर्शनम् व्यासभाष्यसमेतम्, व्या. सुरेशचन्द्रश्रीवास्तव चौखम्भा सुरभारती प्रकाशन, 2006
6. सांख्यकारिका (गौडपादभाष्यसहिता) अनुवादक – विमला कर्नाटिका प्रकाशकः – चौखम्बा पब्लिशर्स, वाराणसी (2007)

आनन्दवर्धन की रसदृष्टि के व्याख्याकार-आचार्य अभिनवगुप्त

प्रो. अभिराजराजेन्द्र मिश्र

महामाहेश्वर आचार्य अभिनवगुप्तपाद प्रत्यभिज्ञादर्शन, काव्यशास्त्र एवं नाट्यशास्त्र की त्रिवेणी में परिस्नात एक युगनिर्माता सिद्धपुरुष थे। आज यदि उनका कर्तृत्व सुरक्षित न होता तो सहस्राब्दियों पुरानी जाने कितनी सारस्वत परम्पराएँ हमारी परिचयपरिधि में न आ पातीं क्योंकि उन परम्पराओं के प्रवर्तक ग्रन्थ आज उपलब्ध नहीं हैं। आचार्य भट्टतौत, मनोरथ, महनायक एवं उद्‌भट आदि के प्रस्थानों का प्रामाणिक ज्ञान हमें अभिनव की टीकाओं से ही हो पाता है। आचार्य अभिनव अपनी टीकाओं में अपने युग के वैदुषीप्रस्थान का अत्यन्त विश्वसनीय एवं जीवन्त विवरण प्रस्तुत करते हैं। उनके मन्तव्यों से सहमत होना, न होना एक पृथक् बात है। परन्तु कोई भी विज्ञ अध्येता इस तथ्य को नकार नहीं सकता कि आचार्य अभिनव ने व्याख्येय आचार्यों के गूढ़ मर्मो को पूरी निष्ठा एवं क्षमता के साथ समझाने का यत्न किया है।

ध्वनिकार आचार्य आनन्दवर्धन की रसविषयक अवधारणा को भी आमूलचूड विशद बनाने में आचार्य अभिनव का योगदान स्तुत्य ही प्रतीत होता है। जहाँ ध्वनिकार रस का प्रत्यक्षत: उल्लेख नहीं भी करते, आचार्य अभिनव उस निगूढ़ रस-सन्दर्भ को उजागर कर देते हैं अपनी युक्तियों से। इसका रोचक उदाहरण हम ध्वन्यालोक-वृत्ति के मंगलाचरण **'स्वेच्छाकेसरिण:'** आदि में ही पा जाते हैं। इस श्लोक में वीर रस को व्यङ्ग्य बताते हुए आचार्य अभिनव कहते हैं–'त्राणं चाभीष्टलाभं प्रति साहायकाचरणम्। तच्च तत्प्रतिद्वन्द्विविघ्नापसारणादिना भवतीति। इयदत्र त्राणं विवक्षितम्। नित्योद्योगिनश्च भगवत: सम्मोहाध्यवसायप्रतियोगित्वेनोत्साहप्रतीतेर्वीररसो ध्वन्यते।'

'सहृदयानामानन्दो मनसि लभतां प्रतिष्ठाम्' अंश का व्याख्यान करते हुए आचार्य अभिनव जिस प्रकार ध्वनिकार के प्रस्थान को प्रतिष्ठपित करते हैं, वह सचमुच प्रशंसनीय है। अभिनव की व्याख्या में आनन्द शब्द का अभिप्राय, रसध्वनि की काव्यात्मता तथा रसध्वनि के सन्दर्भ में हृदय दर्पणकार भट्टनायक का वदतोव्याघातत्व-सबकुछ एक ही साथ आ जाता है। निश्चय ही यह विपुल सूचना लोचन के अभाव में न मिल पाती।

अभिनव का कहना है कि आनन्द शब्द चर्वणात्मा रस का ही पर्याय है, वही रसध्वनि है और काव्य में मुख्यभूत आत्मत्व भी उसी का है।[1] वही ध्वन्यर्थ अथवा प्रतीयमानार्थ कहा जाता है। ऐसे काव्यार्थ का, जो कि सचमुच हृदयसंवादी होता है, का उद्भव रस से ही संभव है। यह

1. आनन्द इति। रसस्य चर्वणात्मन प्राधान्यं दर्शयन् रसध्वनेरेव सर्वत्र मुख्यभूतमात्यत्वमिति दर्शयति। लोचनटीका

विलक्षण काव्यार्थ पाठक अथवा सहृदय के अंग-प्रत्यंग को उसी प्रकार आप्यायित कर लेता है जैसे अग्नि शुष्क काष्ठ को।[1] परन्तु प्रतीयमानार्थ का हृदयसंवाद, यह प्रतीति मात्र सहृदय को ही होनी संभव है। इस प्रकार अभिनव की दृष्टि में 'सहृदयता' काव्यानार्थानुभव पात्रता की पहली और अन्तिम शर्त है।[2]

व्यञ्जनात्मक ध्वननव्यापार की इस स्थापना के बाद अभिनव ध्वनिविरोधी आचार्य भट्टनायक का खण्डन उनकी अपनी ही स्थापनाओं से करते हैं। भट्टनायक स्वयं काव्य में अभिधा, भावना तथा रस चर्वणात्मक (भोजकत्व) व्यापार के समर्थक हैं। भट्टनायक स्वयं मानते हैं कि 'काव्ये रसयिता सर्वो न बोद्धा न नियोगभाक्।'

भट्टनायक के इसी मन्तव्य का हवाला देते हुए अभिनव कहते हैं कि अभिधा-भावना एवं रसचर्वणात्मक काव्य में आप भी रसचर्वणा को ही काव्यजीवितभूत मानते हैं।[3] तो आप एवं ध्वनिकार की काव्यात्मक प्रतिष्ठा में अन्तर रहा कहाँ? दोनों ही रसचर्वणा को काव्यात्मा मान रहे हैं। बस शब्दमात्र का भेद है। एक उसे 'ध्वनि' कह रहा है तो दूसरा 'भोजकत्वव्यापार।' अब इस मान्यता के बाद भी यदि हृदयदर्पणकार ध्वनि को 'काव्यात्मा' न मान कर काव्य का अंगमात्र मानें तो क्या कहा जाय? यह तो 'आत्मस्थापनाविरोध' मात्र हुआ।[4]

आचार्य आनन्दवर्धन ने 'योऽर्थ: सहृदयश्लाघ्य:' आदि कारिका द्वारा यह तो संकेत किया कि सहृदयश्लाघ्य जो अर्थ काव्यात्मक के रूप में व्यवस्थित है, उसके वाच्य एवं प्रतीयमान- दो भेद होते हैं। परन्तु ध्वनिकार की इस कारिका का, वृत्ति के बावजूद, परवर्ती आचार्यों ने सही अर्थ नहीं समझा। फलत: आचार्य विश्वनाथ जैसे ध्वनिसमर्थक आचार्य ने भी इस कारिका को विवादास्पद मानते हुए, भ्रान्त व्याख्या की। सचमुच आत्मभूत प्रतीयमानार्थ का भेद शरीरस्थानीय वाच्यार्थ कैसे बन सकता है?[5]

---

1. योऽर्थो हृदयसंवादी तस्य भावो रसोद्भव:।
   शरीरं व्याप्यते तेन शुष्कं काव्य मिवाग्निन:।। लोचनटीका
2. येयां काव्यानुशीलनाभ्यासवशाद् विशदीभूते मनोमुकुरे वर्णनीयतन्मयीभवनयोग्यता त एव हृदरयसंवादभाज: सहृदया:। लोचन
3. तथा ह्यभिधाभावनारसचर्वणात्मकेऽपित्र्यंशे काव्ये रसचर्वणा तावज्जीविता भूतेति भवतोऽपायविवादोऽस्ति। यथोक्तं त्वयैव-काव्ये रसयिता सर्वो . . . लोचन,
4. तेन यदुक्तम् ध्वनिर्नापरो योऽसौ व्यापारो व्यञ्जनात्मक:।।
   तस्या! सिद्धेऽपि भेदे स्यात्काव्येऽङ्गत्वं न रूपिता। इति तदपहस्तितं भवति।
5. यच्च ध्वनिकारेणोक्तम्-
   अर्थ सहृदयश्लाघ्य: काव्यात्मा यो व्यवस्थित:।
   वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ।। इति।
   अत्र वाच्यस्यात्मत्वं काव्यस्यात्मा ध्वनिरिति स्व-
   वचनाविरोधादपास्तम्। -साहित्पदर्पण:, प्र परि.

परन्तु आश्चर्य है कि लोचन का पारायण करने के बाद भी साहित्यदर्पणकार को यह भ्रान्ति क्यों और कैसे हुई? आचार्य अभिनव तो स्पष्टत: कहते हैं कि काव्यार्थ चाहे वाच्य हो अथवा व्यङ्ग्य- होता तो समान ही है! फिर भी ऐसा क्यों है कि सहृदय किसी (एक) ही अर्थ की श्लाघा करते हैं? निश्चय ही उस श्लाघ्य अर्थ में कोई वैशिष्ट्य होना चाहिये। वस्तुत: सहृदयों द्वारा प्रशंसित उस अर्थ में जो विशेष है वही प्रतीयमानभाग है और उसी प्रतीयमानार्थ की वैशिष्ट्य हेतु होने के कारण विवेकशील लोग (काव्य की) आत्मा के रूप में व्यवस्थापित करते हैं। होता यह है कि उस काव्यात्मभूत प्रतीयमानार्थ के साथ वाच्यार्थ की संवलना इतनी प्रगाढ़ होती है कि विमोहित हृदय वाले लोग प्रतीयमानार्थ की (वाच्यार्थ से) पृथक्ता के विषय में विप्रतिपत्ति (सन्देह) कर बैठते हैं, ठीक उन चार्वाकों की तरह जिन्हें शरीर से आत्मा का पृथग्भाव समझ में नहीं आता।

स एक एवार्थो द्विशाखतया विवेकिभिर्विभागबुद्ध्याऽभियुज्यते। तथा हि- तुल्येऽर्थरूपत्वे किमिति कस्मैचित् सहृदय: श्लाघते। तद् भवितव्यं केनचिद् विशेषेण। यो विशेष: स प्रतीयमानभागो विवेकिभिर्विशेषहेतुत्वादात्मेति व्यवस्थाप्यते। वाच्यसंवलनाविमोहितहृदयैस्तु तत्पृथग्भावो विप्रतिपद्यते चार्वाकैरिवात्मपृथग्भाव:। लोचनटीका, ध्वन्या० 1.2

इस प्रकार आचार्य अभिनव 'काष्ठदहनन्याय' द्वारा वाच्यार्थ एवं प्रतीयमानार्थ का भेद स्पष्ट करते हैं। ज्वलनशीलता अग्नि का धर्म है, काष्ठ का नहीं। तथापि काष्ठ और अग्नि का सम्पर्क होते ही दोनों का पार्थक्य समाप्त सा दीखता है और अविवेकी व्यक्ति कह बैठता है– 'काष्ठ जल रहा है।' वस्तुत: जलती तो है आग, परन्तु आग के सम्पर्कवश काष्ठ ही जलता प्रतीत होता है। वाच्यार्थ एवं प्रतीयमानार्थ के ऐक्य की भ्रान्ति भी कुछ ऐसी ही है।

ध्वनिकार काव्य को 'ललितोचितसन्निवेशचारु' की संज्ञा देते हैं। इसकी व्याख्या करते हुए लोचनकार एक बार पुन: आनन्दवर्धन की रसदृष्टि को स्पष्ट करते हैं– ललितशब्देन गुणालङ्कारग्रहणमाह। उचितशब्देन रसविषयमेवौचित्यं भवतीति दर्शयन् रसध्वनेर्जीवितत्वं सूचयति।

यह रसध्वनि ही काव्यात्मा है। जो ध्वनिविरोधी ध्वनि को काव्यचारुत्वहेतु गुणालंकार से व्यतिरिक्त नहीं मानते उन्हें करारा उत्तर देते हुए लोचनकार कहते हैं कि (रस) ध्वनि तो काव्य की आत्मा है, न कि काव्य का चारुत्वहेतु। अतएव ध्वनिविरोधियों का हेतु ही असिद्ध है। भला आत्मा शरीर का चारुत्व-हेतु होता है। जो अलंकार्य है वह अलंकार कैसे होगा? जो गुणी है वह गुण कैसे होगा? ठीक उसी प्रकार उपमादि प्रकारों से व्याकृत प्रसिद्ध वाच्यार्थ से काव्यात्मभूत प्रतीयमानार्थ सर्वथा भिन्न ही होता है। वाच्यार्थ के प्रसिद्ध होने का तात्पर्य है वनितावदन, उद्यान एवं चन्द्रोदयादि के समान लौकिक होना। यह व्याख्या लोचनकार की है।

जैसे काणत्वादि दोषशून्य शरीरावयवों से संवलित तथा अलंकृत रमणी को भी 'यह लावण्यशून्य है' तथा वैसी न होने पर भी (आर्थात् अङ्गिक दोषयुक्त तथा अनलंकृत होने पर भी) यह तो लावण्यामृत चन्द्रिका ही है' – ऐसा व्यवहार सहृदय करते हैं। ठीक उसी प्रकार प्रतीयमानार्थ

भी काव्य के प्रसिद्ध अवयवों (गुण, वृत्ति, रीति, अलंकारादि) से सर्वथा व्यतिरिक्त है। आनन्दवर्धन के शब्दों में–

यथा ह्यङ्गनासु लावण्यं पृथङ्निर्वर्ण्यमानं निखिलावयवव्यतिरेकि किमप्यन्यदेव सहृदयलोचनामृतं तत्त्वान्तरं तदवदेव सोऽर्थ:। स ह्यर्थो वाच्यसामर्थ्याक्षिप्तं वस्तुमानमलङ्कारा रसादयश्चेत्यनेकप्रभेदप्रभिन्नो दर्शयिष्यते। ध्वन्या 2.7 की वृत्ति।

प्रतीयमानार्थ के ध्वनिकार-सम्मत त्रैविध्य को विशद करते हुए आचार्य अभिनव अत्यन्त युक्तियुक्त विवरण प्रस्तुत करते हैं। उसके विवरण में रसध्वनि की जैसी भव्यप्रतिष्ठा हुई है वैसी ध्वनिकार के शुष्क वाक्य में नहीं मिलती (तृतीयस्तु रसादिलक्षण: प्रभेदो वाच्यसामर्थ्याक्षिप्त: प्रकाशते) लोचनाकार कहते हैं कि प्रतीयमानार्थ के दो भेद हैं– लौकिक तथा काव्यव्यापारगोचर। लौकिक तो वह है जो शब्दवाच्य भी कदाचित् होता है वह विधि-निषेधादि अनेक प्रकार वाला 'वस्तुध्वनि' कहा जाता है। वह भी दो प्रकार का है। एक तो वह जो कभी पहले उपमादि संविधानक द्वारा वाक्यालंकारभाव का अनुभवकर चुका है अर्थात् वाच्यार्थ रूप में उपमादि अलंकार से अध्यासित रहा है परन्तु अब अलंकाररूप ही है। तथापि अपने अपूर्व प्रत्यभिज्ञान के बल से, प्रतीयमान होते हुए भी 'अलंकारध्वनि' कहा जाता है। दूसरा रूप वह है जो ब्राह्मणश्रमणन्याय से तद्रूपताभाव से उपलक्षित होने के कारण वस्तुमात्र कहा जाता है।

परन्तु प्रतीयमानार्थ का जो काव्यव्यापारगोचर भेद है उसे 'रसध्वनि' कहते हैं। वह तो स्वप्न में भी स्वशब्दवाच्य नहीं होता है, और न ही लौकिकव्यवहार का विषय होता है। तो फिर, वह होता कैसा है? वह होता है आत्मानुभूत आनन्दचर्वणाव्यापार द्वारा रसनीय (आस्वाद्य) रूप वाला रस! यह रस विभावाऽनुभावादि से संवलित प्राक् निविष्ट रत्यादि स्थायीभाव से संयोग से निष्पन्न होता है। वही काव्यव्यापार गोचर रसध्वनि है। सच पूछिये तो ध्वनि वही है और काव्य की आत्मा भी मुख्यत: वही है। क्योंकि वस्तुत: एवं अलंकार ध्वनियाँ भी अन्तत: रसध्वनि में ही पर्यवसित होती हैं। अतएव आचार्य भट्टनायक ने जो ध्वनि को काव्य का 'अङ्ग' मात्र कहा (आत्मा नहीं) तो उनका यह उपालम्भ शायद वस्तु एवं अलंकारध्वनि के लिये हो। परन्तु रसध्वनि को तो स्वयमेव उन्होंने काव्यात्मा के रूप में अंगीकार किया है।[1]

ध्वनिकार तो रस को साक्षात् शब्दव्यापार का विषय नहीं ही मानते, फलत: वह वाच्य से भिन्न तो होता ही है। यदि रस का वाच्यत्व स्वीकार किया जाय तो वह दो ही प्रकार से संभव है– स्वशब्दनिवेदितत्व द्वारा अथवा विभावादि के प्रतिपादक द्वारा। स्वशब्दनिवेदितत्व का अर्थ है

---

1. यस्तु स्वप्नेऽपि न स्वशब्दवाच्यो न लौकिकव्यवहारपक्षित:, किन्तु शब्दसमर्त्यमाणहृदयसंवादसुन्दरविभावानुभावसमुदित-प्राङ्निविष्टरत्यादिवासनानुरागसुकुमारस्वसंविदानन्दचर्वणव्यापाररसनीयरूपो रस:। स च काव्यव्यापारैकगौचरो रसध्वनिरिति। स च ध्वनिरेवेति। स एव मुख्यतयात्मेति। यदूचे भट्नायकेन अंशत्वं न रूपितेति तद्वस्त्वलङ्कारध्वन्योरेव यदि नामोपालम्भ:, रसध्वनिस्तु तेनैवात्मतयाऽङ्गिकृत:। लोचनटीका

'शृङ्गार' कहने से शृङ्गार की तथा 'करुण' कहने से करुण रस की प्रतीति होना। यदि इस पक्ष को मान भी लिया जाय तो यह भी मानना होगा कि जहाँ रसों का स्वशब्दनिवेदितत्व नहीं होगा, वहाँ उनकी प्रतीति भी नहीं होगी। परन्तु काव्य में सर्वत्र तो रसादि स्वशब्दों द्वारा निवेदित होते नहीं। यदि कहीं शृङ्गार, करुण, हास्यादि शब्द प्रसंगतः प्रयुक्त हो भी जाते हैं वहाँ भी उन उन रसों की प्रतीति उन उन शब्दों से नहीं, प्रत्युत विशिष्ट विभावादि के प्रतिपादन द्वारा ही होती है। आत्मवाचक शब्द से रसप्रतीति नहीं होती, बल्कि उनका अनुवदन (उल्लेख) मात्र होता है।[1]

रसविषयक मर्म को उद्घाटित करते हैं लोचनकार, अपने साहित्यगुरु भट्टेन्दुराज के इस पद्य द्वारा–

यद्विश्रम्य विलोकितेषु बहुशो निःस्थेपनी लोचने
यद्गात्राणि दरिद्रति प्रतिदिनं लूनाब्जिनीनालवत्।
दूर्वाकाण्डविडम्बकश्च निबिडो यत्पाण्डिमा गण्डयो-
र्दृष्टे यूनि सयौनवासु वनितास्वेषैव वेषस्थितिः॥

इस पद्य का वैशिष्ट्य बताते हुए आचार्य अभिनव कहते हैं– इत्यत्रानुभावविभावावबोधनोत्तरमेव तन्मयीभवनयुक्त्यां तद्विभवानुभावोचितचित्तवृत्तिवासनाऽनुरञ्जितस्वसंविदानन्दचर्वणगोचरोऽर्थो रसात्मा स्फुरत्येव अभिलाषचिन्तौत्सुक्यनिद्राधृतिग्लान्यालस्यश्रमस्मृतिवितर्कादिशब्दाऽभावेऽपि।

उपर्युक्त पद्य में रसवाचक एक भी शब्द नहीं, तथापि रस की स्फुट प्रतीति से किसी को सन्देह नहीं हो सकता है। आनन्दवर्धन के 'स्वशब्देन सा केवलमनूद्यते' सूत्रवाक्य का भी मनोरम विस्तार लोचनाकार ही करते हैं इस पद्य द्वारा–

याते द्वारवतीं तदा मधुरिपौ तद्दत्तकम्पानतां
कालिन्दीतटरूढवञ्जुललतामालिङ्ग्य सोत्कण्ठया।
तद्गीतं गुरुवाष्पगद्गदगलत्तारस्वरं राधया
येनान्तर्जलचारिभिर्जलचरैरप्युत्कमुत्कूजितम् ॥

इस पद्य में यद्यपि 'सोत्कण्ठ एवं उत्क' सरीखे रसवाची शब्द प्रयुक्त हुए हैं। परन्तु रसप्रतीति में उनकी कोई विशेष भूमिका नहीं है, जैसा कि लोचनकार मानते हैं– अत्र विभावानुभावौ म्लानयता प्रतीयेते। प्रतिपन्नं कुर्वतोत्कण्ठाचर्वणागोचरं प्रतिपाद्यते एव। सोत्कण्ठशब्दः केवलं सिद्धं साधयति। उत्कमित्यनेन तु उक्तानुभावानुकर्षणं कर्तुं सोत्कण्ठशब्दः प्रयुक्त इत्यनुवादोऽपि नाऽनर्थकः। पुनरनुभावप्रतिपादने हि पुनरुक्तमतन्मयीभावो वा। ध्वन्या 2.4 की लोचनटीका।

रसविषयक अपनी स्थापना के अगले चरण में आनन्दवर्धन पुनः कहते हैं कि केवल शृङ्गारादि रसवाचक शब्दों से युक्त परन्तु विभावादि के प्रतिपादन से रहित काव्य में रसवत्ता की

1. सविस्तर द्रष्टव्य ध्वन्या. 1.4 की वृत्ति।

प्रतीति नहीं होती है। जबकि काव्य में रसवाची शब्द न भी रहे, परन्तु विशिष्ट विभावादि मात्र विद्यमान हों, तो रसादि की निर्बाध प्रतीति होती है। केवल स्वाभिधान से प्रतीति नहीं होती है। इस प्रकार अन्वयव्यतिरेक दोनों ही दृष्टियों से रसादि का वाच्यार्थ के सामर्थ्य से प्रक्षिप्त होना ही सिद्ध होता है, न कि उसकी अभिधेयता।

इस प्रकार, वस्तु एवं अलंकार स्वरूप-प्रतीयमानार्थ के अनन्तर ध्वनिकार रसध्वनि को सर्वोपरि प्रतिष्ठित करते हुए घोषित करते हैं, कि-'काव्यस्यात्मा स एवार्थः'। लोचनकार इस सूत्र की व्याख्या करते हुए कहते हैं– स एवेति प्रतीयमानमात्रेऽपि प्रक्रान्ते तृतीय एव रसध्वनिरिति मन्तव्यम्। इतिहासबलात् प्रक्रान्तवृत्तिग्रन्थबलाच्च। तेन रस एव वस्तुत आत्मा वस्त्वलंकारध्वनी तु सर्वथा रसं प्रतिपपर्यवस्येते इति वाच्यादुत्कृष्टौ तावित्यभिप्रायेण ध्वनिः काव्यस्यात्मेति सामान्येनोक्तम्। -लोचनम्,

रसध्वनि की काव्यात्मता के सन्दर्भ में आचार्य आनन्दवर्धन आदिकवि प्राचेतस वाल्मीकि की चर्चा करते हुए बताते हैं कि क्रौञ्चमिथुन के वियोग से उद्भूत (उनका) शोक ही श्लोकत्व को प्राप्त हो उठा था। परन्तु ध्वनिकार के इस सूत्रभूत प्रतिपादन से ही शोक का रसोचित वैभव स्पष्ट नहीं हो जाता। उसे सांगोपांग समझने के लिये आचार्य अभिनव का आश्रय लेना अनिवार्य हो जाता है। लोचनकार इस सन्दर्भ की विस्तृत व्याख्या करते हुए बताते हैं कि जो शोक 'श्लोक' बन गया था उसे महामुनि वाल्मीकि का (व्यक्तिगत) शोक नहीं समझना चाहिये। यदि ऐसा होता (अर्थात् यदि वह वाल्मीकि का अपना दुःख होता) तो उस क्रौञ्ची के दुःख से वह स्वयं भी दुखी हो जाती और तब रस की काव्यात्मता के लिये अवकाश ही नहीं रह जाता। जो दुख में सन्तप्त हो वह भला श्लोक क्या लिखेगा?[1]

वस्तुतः चर्वणोचित, शोकस्थायिभावात्मक जो करुण इस काव्यात्मा के रूप में प्रतिष्ठित होता है वह लौकिक शोक नहीं होता है, प्रत्युत उससे विलक्षण होता है।

लोक एवं काव्य के स्थायी भावों मे यही अन्तर होता है कि क्रान्तदर्शी कवि आत्माराम-स्वभाव होता है। वह रति, शोक, हासादि से निसर्गतः आकण्ठतृप्त होता है। फलतः इन संवेदनाओं के साथ उनका आत्मीय संस्पर्श नहीं होता है। अपनी इसी साधारणीकृत संवेदना को वह आनन्दमय रस की भूमिका पर प्रतिष्ठित कर पाता है। इसके विपरीत, लौकिक जन रत्यादिभावनाओं के भूखे होते हैं।

---

1. क्रौञ्चद्वन्द्ववियोगेन सहचरीहननोद्भूतेन साहचर्यध्वंसनेनोत्थितो यः शोकः स्थायिभावो निरपेक्ष्यभावत्वाद् विप्रलम्भशृङ्गारोचितस्थायिभावत्वादन्य एव। स एव तथाभूतविभावतदुत्थाक्रन्दाद्यनुभावचर्वणया हृदयसंवाद-तन्मीभीभवनक्रमादास्वाद्यमानतां प्रतिपन्नः करुणरसरूपतां लौकिकशोकव्यतिरिक्तां स्वचित्तवृत्तिसमास्वाद्यसारां प्रतिपन्नो रसः परिपूर्णकुम्भोच्छलनवच्चित्तवृत्तिनिःस्पन्दस्वभाववाग्विलापादिसमयानपोक्षित्वेऽपि चित्त-वृत्तिव्यञ्जकवादिनयेनाकृतकतयैवावेशवशात्समुचितच्छन्दोवृत्तादिनियंत्रितः श्लोकरूपतां प्राप्तः मा निषादेत्यादि। न तु मुनेः शोक इति मन्तव्यम्। एवं हि सति तद्दुःखेन सोऽपि दुःखित इति कृत्वा रसस्यात्मतेति निरवकाशं भवेत्। न तु दुःखसन्तप्तस्यैषा दशेति। एवं हि चर्वणोचितशोकस्थायिभावात्मककरुणरससमुच्छलनस्वभावत्वात्स एव काव्यस्यात्मा सारभूतस्वभावोऽपरशब्द वैलक्षव्यकारकः। लोचनम्,

अतएव रति हास शोक, उत्साहादि के सन्दर्भों में वे तन्मय हो जाते हैं, उन संवेदनाओं को पूर्णत: पचा लेते हैं और फिर उस आत्मसंस्पर्श के कारण शोक में फूट फूट कर रोते हैं, हास मे अमर्यादित भाव से हँसते हैं तथा रति सन्दर्भ में सम्भोग एवं विप्रलम्भ की घमछाँही का अनुभव करते हैं।

भूखा व्यक्ति वमन क्या करेगा? वह तो खाली पेट वाला है। परन्तु आत्मारामतया स्थित, आकण्ठ परितुष्ट कवि ही रत्यादि भावों को पचा नहीं पाता, वमित कर देता है। वही है काव्य! हृदयदर्पणकार आचार्य भट्टनायक का मन्तव्य इसी तथ्य को पुष्ट करता है–'यावत्पूर्णो न चैतेन तावन्नैव वमत्यमुम्।'

अवसर मिलते ही लोचनकार आनन्दवर्धन की रसदृष्टि को प्रकाशित करते हैं। यह दृष्टि ध्वन्यालोक की कारिका अथवा वृत्ति से स्पष्ट नहीं हो पाती। ध्वनिकार कहते हैं कि महाकवियों की वाणी अलोकसामान्य उस **'प्रतिभाविशेष'** को अभिव्यक्त करती है।[1] यहाँ प्रतिभाविशेष का अर्थ क्या हो सकता है? लोचनकार स्पष्ट करते हैं– प्रतिपत्तॄन् प्रति सा प्रतिमा नाऽनुमीयमाना अपितु तदा वेशेन भासमानेत्यर्थ:। यदुक्तमस्मदुपाध्यायभट्टतौतेन नायकस्य कवे: श्रोतु: समानोऽनुभवस्तत: इति। प्रतिभा अपूर्ववस्तुनिर्माणक्षमा प्रज्ञा। तस्य विशेषो रसावेशवैशद्यसौन्दर्यकाव्यनिर्माणक्षमत्वम्। -लोचनम्,

रस की अलौकिक तथा अनुमान-स्मरणादि से उसकी व्यतिरिक्तता को लेकर लोचनकार ने सारग्राही विवेचन प्रस्तुत किया है। रस वाच्यार्थ एवं लक्ष्यार्थ से सर्वथा पृथक् है। वस्तुत: रस, भाव रसाभास, भावाभास, भावोदय, भारसन्धि एवं भावशबलतादि में लक्षणा की उपपत्ति (संभावना) ही नहीं है। क्योंकि विभावानुभाव-प्रतिपादक काव्य में मुख्यार्थबाधक तत्त्व के अनुप्रवेश की कोई संभावना ही नहीं। तो फिर रसाद्यर्थ में लक्षणा के लिये अवकाश ही कहाँ?[2]

यदि यह कहें कि मुख्यार्थबाधा का क्या प्रश्न? लक्षणा का तो स्वरूप ही बस इतना है– 'अभिधेयाविनाभूतप्रतीतिलक्षणोच्यते' अर्थात् वाच्यार्थ से अपृथग्भूत प्रतीति ही लक्षणा है। और इस दृष्टि से विभावानुभाव आदि से अविनाभूत (अपृथक्) होने के कारण रसादि भी लक्षित ही होते हैं। क्योंकि विभावानुभाव कार्य रूप रस के कारण हैं तथा व्यभिचारीभाव उनके सहकारी!

आचार्य अभिनव कहते हैं– मैवम् अर्थात् यह नहीं हो सकता। क्योंकि अभिधेय की अविनाभूत प्रतीति को ही लक्षणा मान लेंगे तो 'धूम' शब्द से धुएँ का ज्ञान होने पर (उससे अविनाभूत) अग्निस्मृति भी लक्ष्यार्थ ही मानी जायेगी। उसके बाद भी, अग्नि से अपृथग्भूत

---

1. सरस्वती स्वादुतदर्थवस्तु नि:ष्यन्दमाना महातां कवीनाम्।
अलोकसामान्यमभिव्यनक्ति परिस्फुरन्तं प्रतिभाविशेषम्।। ध्वन्या. 1.6

2. तद्ग्रेदशब्देन च रसभावतदाभासतत्प्रशमभेदास्तदवान्तरभेदाश्च। न च तेषु लक्षणाया उपपत्ति:। तथाहि विभावानुभावप्रतिपादके शब्दे तत्रार्थे मुख्ये तावद् बाधकाऽनुप्रवेशोऽप्यसम्भाव्य इति को लक्षणावकाश:? लोचनम्,

शीतापनोदनस्मृति अग्नि का लक्ष्यार्थ बनेगी। फिर तो लक्ष्यार्थों की परम्परा का पर्यवसान ही नहीं होगा।[1]

यदि यह कहें कि 'धूम' शब्द के स्वार्थ मात्र में विश्रान्त होने के कारण वहाँ लक्षणा व्यापार संगत ही नहीं होगा तो फिर, आचार्य अभिनव कहते हैं, बात वही आ गई कि 'मुख्यार्थबाध ही लक्षणा का प्राणतत्त्व है। और इस स्थापना के बाद रसाद्यर्थ की लक्षणामूलकता सर्वथा प्रसंभव है। क्योंकि विभावादि के प्रतिपादन में बाधक तो कोई है नहीं। और इस प्रकार, धूमज्ञान के अनन्तर अग्निस्मरण की तरह विभावादि की प्रतिपत्ति के अनन्तर रत्यादिचित्तवृत्ति की प्रतिपत्ति जैसा कोई शब्दव्यापार तो रसप्रतीति में होता नहीं।[2]

आचार्य अभिनव कहते हैं कि इस प्रसंग में प्रतीति के विशेषज्ञ मीमांसको से मैं पूछना चाहूँगा कि कैसी रसप्रतिपत्ति आपको अभिमत है? क्या वह प्रतिपत्ति जो परकीय चित्तवृत्ति मात्र में होती है? यदि ऐसा ही है तो निश्चय ही आप भ्रान्त हैं। क्योंकि लोकगत चित्तवृत्ति के अनुमान मात्र में भला क्या रसता है? अरे, अलौकिक चमत्कार रूपी आत्मा वाला तथा काव्यगत विभावादि की चर्वणा से प्राणवान् रसास्वाद' स्मरण एवं अनुमानादि द्वारा व्यंग्भूत करने योग्य नहीं है। क्योंकि यह रसप्रतीति तो, अनुमान एवं स्मरणादि की सरणि से सर्वथा अतिरिक्त तन्मयीभनवोचित चर्वणारूपी प्राण वाली होती है। अब यह चर्वणा किसी अन्य प्रमाण से तो उत्पन्न नहीं हुई कि हम इस समय उसकी स्मृति आ रही हो। वर्तमान में भी वह किसी प्रमाण से निर्यंत्रित नहीं है। जो वस्तु ही अलौकिक हो उसमें प्रत्यक्षादि भी प्रमाणभूत कैसे हो सकते हैं? अतएव विभावादि का व्यवहार ही अलौकिक है लोचनकार के शब्दों में–

अतएव रस्यमानताया एषैव निष्पत्तिर्या प्रबन्धप्रवृत्तबन्धुसमागमादिकारणोदितहर्षादिलौकिक-चित्तवृत्तिव्यंग्भावेन चर्वणारूपत्वम्। अतश्चर्वणात्राभिव्यञ्जनमेव। न तु ज्ञापनम्। प्रमाणव्यापारवत्। नाप्युत्पादनम्। हेतुव्यापारवत्। ननु यदि नेयं ज्ञाप्तिर्न वा निष्पत्तिः, तर्हि किमेतत्? न त्वयमसा-वलोकिको रसः। अपितु चर्वणौपयोगी। ननु क्वैतद् दृष्टमन्यत्र? यत एव न दृष्टं तत एवालौकिकमित्युक्तम्। नन्वेवं रसो ऽप्रमेयः स्यात्। अस्तु किं ततः? तच्चर्वणात् एव प्रतीतिव्युत्पत्ति सिद्धेः किमन्यदर्थनीयम्? नन्वप्रमाणकमेतत्। न। स्वसंवेदनसिद्धत्वात्। ज्ञानविशेषस्यैव चर्वणात्मत्वात्। इत्यलं बहुना अतश्च

1. सविस्तर द्रष्टव्य द्रष्टव्य-ध्वन्या. 1.21 (लोचन)
2. सविस्तर द्रष्टव्य-वही।
It is to be taken into account that though Stotra is chanted by Sāmavedin Priests, yet the ṛcs are taken from the Ṛgveda. The Stotra is defined as प्रगीतमन्त्रसाध्या स्तुतिः स्तोत्रम्, whereas Śastra is defined as अप्रगीतमन्त्रसाध्या स्तुतिः शस्त्रम्। The Śastra is purely related to the Ṛgveda. The order of the words Stotra and Śastra placed by Abhinava Gupta is also laudably important since Stotra always precedes Śastra in sacrificial performances[1].

Now let us give a glance to the following verse:-

वेदोपवेदैः सम्बद्धो नाट्यवेदो महात्मना।
एवं भगवता सृष्टो ब्रह्मणा सर्ववेदिना।।

(Nā.Śā.1-18)

Contributing his commentary on the word Upaveda Abhinava Gupta states- वेदाः व्याख्याताः वेदार्थानामुपकारकोऽर्थो वेद्यते येन स उपवेदात्मा। तद्यथा ऋग्वेदस्य मन्त्रार्थवादादिव्याख्यानोपनयन-प्रजारक्षणप्रदर्शक आयुर्वेदः।

The Purport of above is that the Vedas are explained in the domain of 17th verse. By Virtue of which the subject matter conducive to the purport of the Vedas is known as Upaveda. For example: Āyurveda, which leads to protect the people from diseases and which has emerged by means of interpretation of Mantra (formulas) and Arthavāda (eulogistic or censoring statement) of the Ṛgveda.

Nāndī ought to be performed in the beginning of a play. Why? The question arises. Abhinava Gupta resorts to the Veda. Since, the Nāndī consist of the words of

---

1. स्तोत्रमग्रे शस्त्रात्, आश्व.श्रौ.सू.5.10.1

blessing (नान्दी ह्याशीर्वचनसंयुता, ना.शा.1.56), hence it should be performed[1]. Here, he states a Vedic sentence तत्राशिषमासास्ते In realm of the explanation of the word Vedanirmitā occurring in the Nāṭyaśāstra 1.57–तस्मादिह नान्दीमात्रस्य प्रयोगः। किमर्थाऽसावित्याह–वेदनिर्मिता 'तत्राशिषमासास्ते' इति हि श्रुतिः सर्वकर्मस्वाशीःपूर्वकत्वमाह। यत्ततो नान्दीप्रयोगः।

The word आशीः in classical Sanskrit denotes 'blessing'. But, the Nirukta uses this word in the sense of desire. The Mantras in which desire is expressed, are found abundantly in the Yajurveda. The Mantras applied in the sacrifices also consist of expression of desire.- अथापि आशीरेव.....तदेतद् बहुलम् आध्वर्यवे याज्ञेषु च मन्त्रेषु (Nir. 7.2). The Bṛahaddevatā is also of the same view – आशीः स्वर्गादिभिस्तथा (1.47). In real sense blessing is also associated with fulfillment of desire. So, there is no paradox in both of the meanings.

Any deed is claimed to be right or wrong only on the testimony of Vedic authority. He explains the compound word कर्मभावान्वयापेक्षी in a lucid manner-धर्मो दानं स्नानमित्यादि। अधर्मो हिंसा स्तेयमित्यादि। Though Abhinava directly does not quote any Vedic sentence, yet what he told is easily traceable in Vedic Literature[2].

Let us behold another context. When the erection of theater is being performed, some requisite rituals are to be performed simultaneously. It is elaborately described in the second chapter of the Nāṭyaśāstra. The Abhinavabhāratī in this context on the following fragment of this text is worthy to be beheld-

यादृशं दिशि यस्यां तु दैवतं परिकल्पितम्॥
तादृशस्तत्र दातव्यो बलिर्मन्त्रपुरस्कृतः।
स्थापने ब्राह्मणेभ्यश्च दातव्यं घृतपायसम्॥

ना.श.2.40-41

मन्त्रा वरणपूजाविधौ वक्ष्यमाणाः। ते च कर्मशंसोपयोगिनोहेन[3] युक्ता विधेयाः। 'मन्त्रेण स्मृतं कर्म करोति' इति हि स्मृतिः। अन्ये तु तददेवताकैः श्रुतिमन्त्रैरेव बलिकर्मेत्याहुः।

1. This is just the gist regarding performance of Nāndī. The Contexts wherefrom this gist is taken is entirely different in its nature. Here, Nāndī is stated in an anecdote style to have been performed.

2. a. धर्मं चर (तै.उ.1.11)
b. श्रद्धया देयमश्रद्धयादेयं श्रिया देयं ह्रिया देयं भिया देयम् (ibid 1.11)
c.अधीत्य स्नायात्
d. मा.हिसीः (तै.सं.1.2.2.2)
e. न मे स्तेनो जनपदे (छा. उ. 5.11.5)

3. Comp.ऊहः (मी.सू.1.2.52), प्रकृतावाम्नातस्य मन्त्रस्य विकृतौ समवेतार्थत्वात् तदुचितपदान्तरस्य प्रक्षेपेण पाठ ऊहः (ऋग्वेदभाष्यभूमिका of सायणाचार्य). ऊहः खल्वपि, न सर्वैर्लिङ्गैः न सर्वाभिर्विभक्तिभिः वेदे मन्त्रा निगदिताः, ते चावश्यं यज्ञाङ्गत्वेन यथायथं विपरिणयितव्याः (महाभाष्यपस्पशाह्निक)

तल्लिङ्गैरित्यन्ये। चकारो भिन्नक्रमः। न केवलं मानोपक्रमे ब्राह्मणतर्पणं यावत्स्थापनेऽपीत्यर्थः।
(Abhinavabhāratī)

The Mantras are those, which are to be uttered at the time of worship related to choosing of the priests. Those are to be prescribed when these are associated with the logic useful in eulogizing the action. The Smṛiti says "one should perform an action, which is enlightened by a Mantra. The worship ought to be performed with the Vedic Mantras of respective deities. The Brāhmaṇas are to be satiated not only at the time of measurement of the proposed theater, but at the time of its erection also. This act of Brāhmaṇatarpana (appeasing the Brāhmaṇas by means of feeding them) can be compared to Brāhmaṇabhojan (Feeding the Brāhmaṇas), prescribed in the Pāraskaragṛhyasūtra-ततो ब्राह्मणभोजनम् (3.4.19). The observation of Abhinava Gupta in respect of concept of Mantra is superbly outstanding. The Mīmāūsakas also propagate the same doctrine- प्रयोगसमवेतार्थस्मारका मन्त्राः (अर्थसङ्ग्रह 46)

Thus, it can be concluded in realm of above detail that Abhinava Gupta had great reverence to the Veda and its authenticity in spite of his being an ' Āgamic Ācārya'. Actually, inwardly at transcendental level Āgama is not opposed to the Vedas and ultimate source and goal of the both is inseparably singular.

प्रो. अभिराजराजेन्द्रमिश्रविरचितम् (नाटकम्)

अभिनवसूर्योदयम्

(नेपथ्ये गतिध्वनिः श्रूयते)

प्रकृतिनटीकम्पनीयमुखच्छविमुकुरभूतकाश्मीरम्
सिन्धुवितस्ताप्तिक्तधरातलमुत्तुङ्गप्राचीरम्।
अमरनाथहिमलिङ्गतशैलदरीरमणीयम्
हंसवाहिनीकीर्त्तिविनोदितमतिशयकलकमनीयम्।।

शिवप्रत्यभिज्ञासंज्ञापितं सुरभारतीप्रकाशम्
ऋषिमुनिमहितं भूपसुचरितं शतशतकलाविलासम्।
उव्वटकल्लटमुकुलमम्मटाऽलकरुय्यकपरिपूतम्
भट्टनायकाऽनन्दवर्धनाऽभिनवमहिमसंस्यूतम्।।

जयति जयति काश्मीरम्!!

सूत्रधारः

(ततः प्रविशति सपरिवारस्सूत्रधारः)

(सर्वान् प्रणम्य पुष्पाञ्जलिञ्च विकीर्य)

अभिनन्दनम् अभिनन्दनम् अभिनन्दनं भवतां समेषां नाट्यप्रस्तुतिदर्शकानाम्। सर्वतोऽप्यभिनन्दनम्।

भो भो सहृदयाः विविधविषयकोविदाः सुकुमारमतयश्छात्राः बन्धवो भगिन्यश्च! श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठ-मानितविश्वविद्यालये, कुलपतिचरणैर्गुणरत्नमहोदधिभिः श्रीरमेशकुमारपाण्डेयवर्यैः महामाहेश्वराभिनवगुप्तसहस्राब्दीसमारोहे आमन्त्रिता भवन्तो नूनमेव भाग्यशालिनः, यतो हि कतिपयक्षणानन्तरमेवाऽस्माभिर्नूतनमेकाङ्किरूपकम् अभिनवसूर्योदयं नाम प्रस्तूयते त्रिवेणीकविनाऽभिराजराजेन्द्रेण विरचितम्।

(सहचरीं प्रति)

देवि! किमिदम्? सर्वमहमेव कथयिष्यामि? मौनमुपगताऽसि त्वम्! तत् नाट्यकारस्य परिचयं देहि। नटी (विहस्य, सविलासम्)

आर्य! सद्यः समवाप्तोत्तरप्रदेशीयसर्वोच्चविश्वभारतीसम्मानं शतद्वयग्रन्थकर्तारं पद्मभूषणभूषितं अभिराजराजेन्द्रमिश्रमहाभागम्।

ननु सङ्गमो जातः

कियच्चित्रं यदागास्त्वं प्रतीच्यामहमपि प्राच्यताम्।
ततो मध्येपथं क्वचिदावयोर्ननु सङ्गमो जातः॥

भारते भारताद्बहिर्वा को न जानाति? एषा कथयामि–

मूलं श्रीकविकालिदासकविताश्रीहर्षवाणी तनुः
पत्रं श्रीजयदेवदेववचनं श्रीबिल्हणोक्तं सुमम्।
श्रीमत्पण्डितराजकाव्यगरिमा यस्य प्रपूतं फलं
जीव्याद्धन्त निसर्गजोऽयमभिराड्राजेन्द्रं काव्यद्रुमः॥

सूत्रधारः (साह्लादम्)

साधु प्रिये! साधु। कथयामि किञ्चिदहमपि,

यं देवी सुषुवे निसर्गमधुरं दुर्गाप्रसादान्निजे
क्रोडे शुक्तिनिमे विमौक्तिकतनुं वन्द्याऽभिराजी सुतम्।
श्रीदेवेन्द्रसुरेन्द्रमध्यममणी राजेन्द्रमिश्रोन्वसौ
हृत्तुष्ट्यै तनुते गिरादिविषदां सत्साहितीमुज्ज्वलाम्॥

पुनश्च–

स्फीता यौवनकामकेलिकलनाः संस्मारयन्त्योजवा-
दास्वाद्यान्तरमैन्द्रियञ्च सकलं विस्मारयन्त्यस्तथा
सच्चेतांसि ध्रुवं समं प्रवयसां यूनां दधत्यो मुदा
भूलोके विहरन्ति सन्ततरसाः स्निग्धाभिराजोक्तयः॥

तत्सहृदयाः अत्र प्रमत्तास्तिष्ठत। सम्प्रति प्रस्तूयते महामहेश्वराभिनवगुप्तपादाचार्यपरिचयपरम् एकाङ्करूपकम् अभिनवसूर्योदयम्। नेपथ्ये श्रूयते प्रतिध्वनिः–

अभिनवसूर्योदयम्
अभिनवसूर्योदयम्
अभिनवं सूर्योदयम्

(शनैः क्षीयते ध्वनिः)

॥ प्रथमं दृश्यम् ॥

(शङ्खनादानन्तरं नेपथ्ये श्रूयते)

भो सहृदयाः कालप्रवाहोऽहमस्मि। अहमेव प्रभवामि। अहमेवोपसंहरामि। अहमेव भूतं वर्तमानं भविष्यञ्च। अहमेव स्मृतिः। अहमेव नवरसरुचिरं काव्यम्। कालप्रवाहोऽहम्!

भोः ममेयं **विक्रमाब्दानामष्टमी शती।** सम्प्रति काश्मीरान् प्रशास्ति ललितादित्यमुक्तापीडः। उत्तरापथञ्च शास्ति कान्यकुब्जेश्वरो यशोवर्मा। मालवान् शास्त्रि वाक्पतिर्मञ्जः।

दक्षिणापथे तपति त्रैलपः। परन्तु सर्वेऽपि मिथो बद्धवैराः। किं करवाणि? कथमिमान् मूढान् प्रबोधयानि? नेमे कथमपि प्रबोधनीयाः। किं साक्षान्नारायणावतारेण कृष्णेनाऽपि दुर्मदो दुर्योधनोऽवबोद्धुं शक्योऽभूत्? नैव,नैव,नैव!

पश्यन्तु तावत् प्रत्यक्षघटितं किञ्चित्। कान्यकुब्जाधिपतिर्यशोवर्मा काश्मीराधिपतिना विजित्य निगृहीतः। सम्प्रति किं भविता? स्वयं पश्यन्तु भवन्तः [इति शान्तः]

(ततः प्रविशति सिंहासनस्थो ललितादित्यः)

ललिता- (सेनापतिं प्रति)

भद्र सेनापते! आनीयतां कोविदाश्रयो यशोवर्मा।

सेनापतिः- यथाज्ञापयति देवः।

(निष्क्रम्य, यशोवर्मणा सह प्रविश्य)

देव! अयं शमितप्रतापः कान्यकुब्जेश्वरो भवत्समक्षं तिष्ठति। किमाज्ञापयति देवः?

कारागृहे निरोद्धव्यो नेतव्यो वाऽत्मना सह।
शिरसा वा पृथक्कार्यः सपत्नोऽयं भवद्वशे॥

ललिता- (सादरमुत्थाय)

भद्र! मा मैवम्। वयसा गुणेन ज्येष्ठोऽयं ममादरपात्रम्। प्रथमं मोचय बन्धनेभ्यो भूपवरम्। देह्यस्मै आसनम्।

(सेनापतिस्तथाऽऽचरति)

राजन् यशोवर्मन्! मम सन्धिप्रस्तावमवधूय भवता विहितस्तिरस्कारः। तत एव मयाऽऽक्रान्तो भवान् जितश्च। सम्प्रति किमिच्छति?

यशोवर्मा- (हस्तौ सम्मेल्य चरणयोर्निपत्य)

क्षन्तव्योऽयं जनः। राजन्! अहमपि योद्धुकामो नाऽसम्। परन्तु वञ्चितोऽहं स्वसामन्तैः। सम्प्रति (इत्यर्धोक्ते)

ललिता- अलम् अलम् वक्तव्येन! राजन् धर्मेण न्यायेन च शास्ति भवान्। तद् भवदीयं राज्यं भवदधीनमेव करोमि। तत्र वर्तते मे पणबन्धः कोऽपि।

यशोवर्मा- महाराजन्! आज्ञापयतु भवान् किन्ते प्रियमुपकरोमि?

ललिता- कान्यकुब्जेश्वर! काश्मीरेष्वपि पाण्डित्यं कवित्वञ्च विलसेत् गृहे गृहे इत्यहमिच्छामि। अतएव प्रयच्छ मे कमपि विद्याकल्पद्रुमं सारस्वतविग्रहम्।

यशोवर्मा- (सबहुमानम्)

राजन्! दाहको भवति भानुरिति श्रूयते! परन्तु मामदग्ध्वा सत्यमेव भवान् ललितादित्यः प्रतीयते। राजन्! विद्यावतां महत्कुले समुत्पन्नं सकलज्ञानविज्ञानपारगं वैदुष्यसौजन्यसिक्तं युवानमभिनवगुप्तमहं त्वया सह प्रेषयामि। अयन्ते मनोरथान् पूरयिष्यति। कथं वाऽभिनवगुप्तो मन्यते?

अभिनवगुप्तः- (समुत्थाय दक्षिणबाहुमुद्यम्य)

विजयतां कान्यकुब्जेश्वरः विजयतां काश्मीराधिपतिः। राजन्! किमतः परं मेऽभीष्टम्। काश्मीरान् गन्तुमुत्सहे।

सङ्गमं कल्पयन्नूनं भागीरथीवितस्तयोः।
धन्यमात्मकुलं मन्ये, को विदेशो मनस्विंनाम्॥

यशोवर्मा- (सप्रणयम्)

देशिकप्रवर! मत्प्रतिनिधिभूय मत्तोऽप्यधिकगुणवन्तं काश्मीरनरेशमनुरञ्जय स्वसारस्वतसमृद्ध्या।

॥ (पटाक्षेपः)॥

॥ द्वितीयं दृश्यम् ॥

एष कालप्रवाहोऽहं भूयोऽप्युपस्थितः। विजिगीषुर्ललितादित्यो पाण्डितमभिनवगुप्तं सबहुमानं काश्मीरे प्रतिष्ठापितवान्। तद्वंशेऽनेके पण्डिताः कवयः शास्त्रज्ञाः सञ्जाताः। ललितादित्यमनु जयापीडोऽभूत् शास्ता। भट्टोद्भटस्तस्य सभाध्यक्षो, वामनश्च महामात्योऽभूत् शास्ता। एवं हि कर्कोटवंशोऽस्तङ्गतः। विक्रमीयनवमशताब्दे समुदाय उत्पलवंशः। अस्य संस्थापक आसीदवन्तिवर्मा साम्राज्ये काकण-शिवस्वामी-रत्नाकरानन्दवर्धनादयो विद्वांसः प्रथन्ते स्म। हन्त वर्षाणां शतद्वयी व्यतीता। इदानीं प्रवर्तते विक्रमस्य दशमी एकादशी शताब्दी। यशस्करः सम्प्रति काश्मीरनरेशः। पाण्डितस्य अभिनवगुप्तस्यापि वंशे सम्प्रति तिष्ठति महावैय्याकरणो सिंहगुप्तो वराहगुप्तस्यात्मजः। तस्य कौटम्बिकं सम्बोधननामास्ति चुखलक इति। विमलानाम्नी तस्य साध्वी गृहीतमिति। या इदानीमेव दिवङ्गता।

(नेपथ्ये रोदनकोलाहलध्वनिः। विमलायाः शवो भुवि स्थापितः)

क्षेमेन्द्रः- (पुत्रौ मनोरथाभिनवौ संगूह्य)

वत्स! मा रोदीः। मा भैषीः। कोऽपि वैक्लव्यं न दर्शयतु। समेषां प्राणिनां गतिरियम्। यथा जायते तथैव म्रियते। जीवनमिदं नाट्यकल्पमेव। यस्य संवादोऽवक्षितः स एव मुञ्चति रङ्गपीठम्।

(सहसैव सचीकारम्)

किन्तु न मे संवादाः समाप्ताः। हा प्रिये विमले! दारकान् माञ्च विहाय क्त्वाऽपगताऽसि? हा चारुशीले! हा पतिव्रते! मम जीवनसूभधारिणि! यात्रार्धमार्गे स्वकुटुम्बं विहाय क्व याताऽसि? (दारकावपि सदैन्यं विलपतः। कुटुम्बिनः प्रतिवेशिनः परिदेवन्ते)

अनुजः पण्डितप्रवरचुखलक! अलं दैन्येन। मित्रवर! धैर्यपर्वतो भवान्। बोधकल्पद्रुमो भवान्। किमेवं प्राकृतजन इव विलपति? गृहदेवता गता। सम्प्रति श्मशानभूमिं प्रतिष्ठताम्। वयं सर्वेऽपि भवता सहैव चलिष्यामः।

(शवयात्रा प्रवर्तते। ध्वनिः श्रूयते- सत्यमेकं सत्यमेकम्। शिवोऽहं शिवोऽहम्! सत्यमेकं सत्यमेकम्। शिवोऽहं शिवोऽहम्)

(नेपथ्ये गीतध्वनिः)

नहि सम्प्रति वाचि मनो रमते
प्रभवन्नपि नैव विधिर्दयते!!

न च सा सरसी, नलिनी न च सा
कलहंस-विलासकथापि न सा
निखिलं स्मृतिभावगतं तनुते!!

न च सा वनिका, न च सा मदिरा
मधुगन्धपरा न च ते भ्रमराः
प्रसृतं विषमेव कथंन्वमृते??

बहुकाङ्क्षितलक्ष्यपरं यतनम्
इदमेव कटे मनुजस्य धनम्
क्व घटो ननु रज्जगुणे त्रुटिते??

यदपि प्रभुणा सहजं जनितम्
नहि किम्भुवि कालवशं गमितम्
विधिरेव यथामति निर्णयते॥

(नेपथ्ये आत्मशान्तियज्ञध्वनिः श्रूयते)

ओम् यथा द्यौश्च पृथिवी च न बिभीतो न रिष्यतः।
एवा मे प्राण! मा बिभेः।
यथाऽहश्च रात्री च न बिभीतो न रिष्यतः।
एवा मे प्राण! मा बिभेः।

नमस्ते प्राण क्रन्दाय नमस्ते स्तनयित्नवे।
नमस्ते प्राण विद्युते नमस्ते प्राण वर्धते॥
नमस्ते अस्त्वायते नमो अस्तु परायते॥

ओम् शान्तिश्शान्तिश्शान्तिः। ओम् द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयश्शान्तिर्वनस्पतयश्शान्तिर्विश्वेदेवाः शान्तिः ब्रह्म शान्तिः सर्वꣳ शान्तिः, शान्तिरेव शान्तिस्सामा शान्तिरेधिः। यतो यतस्समीहसे ततो नोऽभयं कुरु।

शं नः कुरु प्रजाभ्यः शं न पशुभ्यः।।

(ततः प्रविशति मुण्डितशिरस्को धवलवस्त्रो नृसिंहगुप्तः)

(कुटुम्बिनः सम्बोध्य)

भो ज्येष्ठत्वेन मयेदानीं यावत् कुलपरम्परा निर्व्यूढा। सम्प्रत्यहं सन्यस्तो भवितुमिच्छामि। मत्सङ्कल्पे न केनाऽप्युपरोधः कार्यः। अर्धाङ्गेन गार्हस्थ्यं न प्रवर्त्यते। तदहं महेश्वरं शिवमाराधयितुमितः प्रतिष्ठे।

दारकाः- (एकस्वरेण)

तात! मा मैवम्। अस्मान् मा त्यज। अलं गृहत्यागेन। गृहमेवारण्यं मत्वा निर्विघ्नं भक्तिं मुक्तिञ्च साधयतु।

तात! प्राणैश्शपामो वयं, न ते साधनामुपरोधं विधास्यामः।

अनुजः- आर्य! दारकाः सम्यग् ब्रुवन्ति। स्वभवने एव संन्यस्तस्तिष्ठतु भवान्।

(अभिनवगुप्तं प्रत्यपवार्य)

वत्स अभिनव! त्वयि तावद विशेषोऽनुरागो भ्रातृवर्यस्य। त्वम् अप्यनुनय तावत्।

अभिनवः- पितृव्यचरण! न तात् सङ्कल्पं खलीकर्तुमुत्सहे।

माहेश्वराग्नौ हृदये प्रज्वलिते सति निर्वापयितुं न शक्यते।

अभिनवगुप्तः- (अभिनव स्वाङ्के समुपलालयन्)

वत्स! द्वादशवर्षीयोऽपि त्वं ज्ञानोद्दीप्तः पूर्णवयस्कोऽसि।

भगवान् शेष एव त्वय्याविष्ट इति शम्भुकृपयाऽहमवैमि।

महामाहेश्वरतामुपयास्यसि, नाऽत्र कापि संशीतिः। स्वीयं प्रत्यभिज्ञानं मा विस्मर। लोकवन्द्यानुपाध्यायान् संसेव्य विविधशास्त्रण्यवगच्छ। श्रूयतां मन्निर्देशः।

श्रीमल्लक्ष्मणगुप्तः प्रत्यभिज्ञाचार्यः। श्रीमद्भूतिराजस्तत्तनयो भट्टेन्दुराजश्च साहित्यशास्त्रनदीष्णौ। काव्यकौतुककारो भट्टतौतो नाट्यशास्त्रप्रवीणः। तन्त्रशास्त्रे शिवाद्वैतदर्शने चापि महीयन्त्रे सुमतिनाथ सोमदेवशम्भुनाथादयः। वत्स! आत्माभ्युदयाय वृणीष्वैतान्। व्याकरणं तावन्ममैव पाठितोऽसि, तदभ्यासं विधेहि।

सम्प्रति गम्यते मया (साञ्जलिपुटप्रणामम्)

नमस्सर्वेभ्यः। नमो जन्मभूम्यै। नमो मे कुलदेवेभ्यः।

(इति निष्क्रान्तः)

।। पटाक्षेपः ।।

॥ तृतीयं दृश्यम् ॥

गुरुकुलम्। अभिनवोऽपि स्वानुजेन मनोरथेन, पितृव्यपुत्रैः क्षेमगुप्त-पद्मगुप्त-चक्रगुप्तोत्पल-गुप्तादिभिस्सहैवाध्ययने रतः । परन्तु न तन्मनोऽभिरमते पाठे। सहोदरैस्सह स कर्णोपजापं कुरुते (एवमिव) अन्ये माणवका ग्रन्थपाठमग्नाः।

(अभिनवगुप्तश्शनकैः कस्यचित् स्कन्धे कृष्णरज्जुमारोप्य क्रन्दति - अहो स्कन्धे ते कृष्णसर्पः इति। वटुरसौ क्रन्दन् परिस्खलन् गुर्वन्तिकमुपैति)

गुरुः- (ससभ्रमम्)

आयुष्मन्! किमभूत्? किमेवमुपद्रुतोऽसि?

वटुः- गुरुदेव! मत्स्कन्धे कृष्णसर्पो रुरोह।

गुरुः- भो दृष्टस्त्वयाऽसौ कृष्णसर्पः ?

वटुः- न खलु। परन्त्वयमभिनवगुप्तो वदति। अनेन दृष्टस्तावत्।

गुरुः- (सकैतवम्)

अभिनव! सत्यमेव कृष्णसर्पस्त्वयाऽवलोकितः ?

अभिनव! भगवन् मया त्वियं कृष्णरज्जुर्दृष्टा (दर्शयति)

(सर्वेऽट्टहासं कुर्वन्ति चर्चरीं नृत्यन्तः)

गुरुः- भो अवगतं ते नाट्यम्। अतीवोद्दण्डोऽसि जातः। अद्यैव ते पितृव्यचरणं सूचयिष्यामि। रज्जुं भुजङ्गीकृत्य सहचरान् भीषयसि? श्रूयतां सर्वैरन्तेवासिभिः। इतः प्रभृति अभिनवगुप्तोऽयम् अभिनवगुप्तपादनाम्ना सम्बोधयिष्यते।

(सर्वे सकरतलताडनं हसन्ति)

शान्तं शान्तम्। अनेन एतदुक्तं भवति यत् गुप्तपादशब्दस्यार्थ यूयं जानीथ।

(सर्पः सर्पः सर्प इति नेपथ्ये)

बटवः- (नृत्यन्तः)

अभिनवो गुप्तपादः, अभिनवो गुप्तपादः, अभिनवो गुप्तपादः !!

अभिनवः- (आत्मगतं, पितरं स्मरन्)

तात! पश्यति भवान्। परमार्थमजानताऽप्युपाध्यायेनाऽनेन मत्स्वरूपं प्रत्यभिज्ञातमेव। स्वरूपमवैमि। शेषोऽहमस्ति।

॥ पटाक्षेपः ॥

॥ चतुर्थं दृश्यम् ॥

सहृदया दर्शका:! कालप्रवाहं मां परिचिनुथ? विंशतिवर्षानन्तरं समागतोऽस्मि। महावैय्याकरणो नृसिंहगुप्तस्सम्प्रति शिवसायुज्यमुपगत:। तत्सुर्महामाहेश्वरोऽभिनवगुप्तपादाचार्योऽपि सम्प्रति पञ्चचत्वारिंशद्-वर्षदेशीयस्सञ्जात:। गार्हस्थ्यमनुप्रविष्टस्तदनुजो मनोरथगुप्त:। अन्येऽपि भ्रातर: क्षेमगुप्तादयस्तत्संरक्षणेऽ-भ्युदयशीला: लोके समाजे राजकुले च सम्पूजिता:।

महाराजोऽनन्तदेवस्सम्प्रति पुत्राय कलशाय दत्तसाम्राज्यभारो विश्राम्यति।

महामाहेश्वरोऽभिनवगुप्तपादाचार्योऽपि ऊर्ध्वरेता: सन् महत् सारस्वतं तपस्तप्यन् मध्याह्नविभावसुकल्पश्चकास्ति। तस्य गुरुकुले प्रायेण द्वादशशतमिता: शिष्या विविधशास्त्राण्यभ्यस्यन्ति। तत् किमन्यत्? भवतस्सर्वान् महामाहेश्वरगुरुकुलमेवासादयामि। इदं हि गुरुकुलप्रवेशद्वारम्। श्रूयन्ते मङ्गलपद्यानि! अवहिता: शृण्वन्त: तावद् भवन्तोऽपि।

अपूर्वं यद्वस्तु प्रथयति विना कारणकलां
जगद्ग्रावप्रख्यं निजरसभरात् सारयति च।
क्रमात्प्रख्योपाख्याप्रसरसुभगं भासयति यत्
सरस्वत्यास्तत्त्वं कविसहृदयाख्यं विजयते॥

भट्टेन्दुराजचरणाब्जकृताधिवासो
हृद्यश्रुतोऽभिनवगुप्तपाऽभिधोऽहम्।
यत्किञ्चिदप्यनुरणन् स्फुटयामि काव्या-
लोकं सुलोचननियोजनया जनस्य॥

आनन्दवर्धनविवेकविकासिकाव्या-
लोकार्थतत्त्वघटनादनुमेयसारम्।
यत् प्रोन्मिषत् सकलसद्विषयप्रकाशि-
व्यापार्यताभिनवगुप्तविलोचनं तत्॥

सद्वृत्ततौतवदनोदितनाट्यवेद-
तत्त्वार्थमर्थिजनवाञ्छितसिद्धिहेतो:।
माहेश्वराभिनवगुप्तपदप्रतिष्ठ:
संक्षिप्तवृत्तिविधिना विशदीकरोति॥

तद्दृष्टिसंशयच्छेदि प्रत्यभिज्ञोपदेशिन:।
श्रीमल्लक्ष्मणगुप्तस्य गुरोर्विजयते वच:॥

(तत: प्रविशति उपाध्यायासनस्थोऽभिनवगुप्तपादाचार्य:)

कर्ण:- भगवन्! ह्यस्तनपाठे कथितं भवता यत्प्रतीयमानोऽर्थो वाच्यात् सर्वथा विभिद्यते। यद्येवं तर्हि कथं न तं परिचिन्वन्ति विरोधिन:?

अभिनव- वत्स! वाच्यार्थ्येन सह व्यङ्ग्यार्थस्य संवलना इयती जटिला भवति यदुभयोः पार्थक्यं न लक्ष्यते विवेकाभाववशात्। यथा चार्वाकाः अङ्गप्रत्यङ्गव्यापिन आत्मतत्त्वस्य शरीरात् पार्थक्यं द्रष्टुमशक्ताः तथैव व्यङ्ग्यार्थविरोधिनोऽपि। एतत् सम्भवति काष्ठदहनन्यायेन।

कर्णः- कोऽयं न्यायः?

यथा दाहकता भवत्यग्नेर्धर्मः न तावत्काष्ठस्य। तथापि काष्ठाश्रितस्याग्नेः ज्वलनं निरीक्ष्य मूढाः काष्ठं ज्वलतीति क्रन्दन्ति तथैव वाच्याश्रययि व्यङ्ग्यमपरिचिन्वाना मूढास्तत्र स्वीकुर्वन्ति।

क्षेमराजः- गुरुदेव! तत्किं व्यङ्ग्यार्थोऽप्यभिधेयैव ग्रहीतुं शक्यते?

अभिनवगुप्तः- वत्स! न कदापि। शब्दबुद्धिकर्मणां विरम्य व्यापाराभाव इत्यस्माकं सूरय आह।

न भूयोऽपि कमप्यर्थं प्रकाशयितुं क्षमा।

तत्कथं मुकुलमहोदयः शतपत्रभेदनन्यायेन अभिधाया एव दीर्घदीर्घतरव्यापारेण प्रतीयमानार्थावगतिं मन्वते?

अभिनव- वत्स! निर्बन्धोऽयं तेषाम्। खड्गलक्षणन्यायेनैव ते प्रवदन्ति अधरोत्तरम्।

क्षेमराजः- कोऽयं न्यायो भगवन्?

अभिनवः- (विहस्य)

यथा कोऽपि भटः कमपि लौहकारं कथयेत् - भो मम कृते एकमीदृशं खड्गं घटय यो भवेत् आतानवितानात्मा, तूलभारकल्पो निशितश्च। तदा लौहाकारः सविस्मयं समुत्तरयेत् -श्रीमन्! एवं लक्षणं तु वस्त्रं भवति न खड्गः। खड्गो लौहनिर्मितः कथं भारहीनः स्यात् , कथं वाऽऽतानवितानात्मा वा भवेत्?

(सर्वे बटवो हसन्ति)

तथापि भटोऽसौ निर्बन्धपरो भवेत् - नहि नहि, तादृशमेव खड्गं घटय, यादृशो मयोच्यते।

वत्साः- अभिधाया विलक्षणं लक्षणं समुपदिशतां मुकुलभट्टादीनां आचार्याणां निर्बन्धोऽपि तादृश एव।

क्षेमराजः- रहस्यं स्फुटीकृतं भवता भगवन्! कृतार्था वयम्।

अभिनवः- एतत्सर्वमहं सविस्तरं स्वोपज्ञलोचनटीकायां विवृणोमि। वस्तुतः व्यङ्ग्यार्थोऽभिध-याऽऽक्षिप्तस्सन्नपि तद्व्यतिरिक्त एव शरीरावयवव्यतिरेकि लावण्यमिव। यथाह ध्वनिकारः-

यथा पदार्थद्वारेण वाक्यार्थः सम्प्रतीयते।
वाच्यार्थपूर्विका तद्वत् प्रतिपत्तस्य वस्तुनः॥

वत्साः- इदानीं गच्छत। एकान्तमाश्रित्याऽभ्यासं कुरुत। समागतः पर्यायः प्रत्यभिज्ञाबटुनात्र।

(सर्वे प्रणम्य क्रमेण गच्छन्ति)

॥ पटाक्षेपः ॥

॥ पञ्चमं दृश्यम्॥

गुरुकुले गुरुपूर्णिमामहोत्सवः। परितोऽप्युल्लासः। वटवः प्रसन्ना नृत्यन्ति, कूर्दन्ति, व्यायामं कुर्वन्ति।

महामाहेश्वर आचार्याभिनवगुप्तपादः स्वकुटीरे समाधिरतः। तत्र गन्तुं सर्वेऽपि निषिद्धाः क्षेमेन्द्रमेकं विहाय।

मुक्तिद्वारं ननु गुरुचरणम्
ननु गुरुचरणं भवभयहरणम्॥

आनन्दवर्धनं तज्जातम्
लोचनकृपयैव समवदातम्
निर्यातितमेव समस्तमृणम्॥ मुक्ति.

मालिनीविजयवार्तिकं कृतम्
अभिनवभारत्या यशोवृत्तम्
परमार्थद्वादशकं घटितम्॥ मुक्ति.

घटकर्परकुलकविवृतिरुक्ता
सा पदाभिशिका प्रकाशिता
भैरवस्तोत्रमपि संघटितम्॥ मुक्ति.

प्रकरणस्तोत्रमथ विमर्शिनी
वृहती लघ्वी संशयहरणी
भोः प्रत्यभिज्ञया किन्न कृतम्?? मुक्ति.

सा बोधपञ्चदशिकाऽऽम्नाता
भगवद्गीताटीका रचिता
तन्त्रालोकस्य समवतरणम्॥ मुक्ति.

जीवनं धन्यधन्यं जातम्
अभिनवं प्राप्य किं नोऽवाप्तम्
गुरुरेवाऽस्मत् चिन्ताहरणम्॥ मुक्ति.

(ततः प्रविशति नैवेद्यहस्तः क्षेमेन्द्रः)

क्षेमेन्द्रः- (आचार्यकुटीरमुपगम्य, परितोऽवलोक्य)

मन्ये, एकान्तं सेवन्ते गुरुपादाः। तद् दर्शनार्थं प्रविशामि न वा?

(विमृश्य)

भवतु, मत्कृते न कोऽपि निषेधः। मत्तातपादः प्रकाशेन्दुपादं प्रति सौहार्दवशात् मय्यप्यतितरां वात्सल्यमाचार्याणाम्। एष प्रविशामि।

(प्रविश्य, गुर्वासनस्थं भगवन्तं शेषं ध्यानस्थं दृष्ट्वा सश्रद्धं स्तोतुमुपक्रमते)

चतुर्दशविद्यास्थानभूभारं शिरसा वहन्।
जयत्यहो गुरुश्शेषो नृसिंहनन्दनो मम॥

(इति स्तुवन्नेव विमूर्च्छति)

अभिनवः- (समाधिमपहाय सहसा प्रबुद्धस्सन्)

अये क्षेमेन्द्रोऽयं मम दुर्ललितशिष्यः, मन्मित्रप्रकाशेन्द्रतनयः?

(समीपं गत्वा)

(मन्येऽनवसरं प्रविश्य मत्स्वरूपमवेक्ष्य मूर्च्छितोऽस्ति जातः। तदयं संज्ञामापादनीयः)

(कमण्डलुजलमभ्युक्ष्य)

उत्तिष्ठ वत्स! क्षेमेन्द्र जागृहि!

या स्मर्यमाणां श्रेयांसि सूते ध्वंसयते रुजः।
तामभीष्टफलोदारकल्पवल्लीं स्तुवे शिवाम्॥

(सञ्जिहानः क्षेमेन्द्रः सस्मितं सविस्मयमुत्थाय गुरुचरणयोर्निपतति)

गुरोश्चरणयोः कोटिप्रणामा बोधवारिधेः।
आचार्यशेरवरण्णेर्विद्याविवृतिकारिणः॥

कोटिजन्मकृतं ध्वस्तं मेऽद्य पापकदम्बकम्।
भवत् स्वरूपमालोक्य प्रविमुक्तोऽस्मि साम्प्रतम्॥

अभिनवः- (सप्रणयं शिरसि दक्षिणहस्तं संस्थाप्य)

वत्स चिरञ्जीव! स्वविद्ययाऽजरोऽमरो भव। रहस्यमिदं हृदय एव गोपय। नाऽख्येयं कस्मैचिदपि।

क्षेमेन्द्रः- भगवन्! प्रतिजाने। गुरोराज्ञा गरीयसी।

अभिनवः- वत्स क्षेमेन्द्र! यदर्थं प्रेषितोऽहं भगवता नारायणेन तदिदानीं सम्पन्नम्।

पश्य-

श्रीकण्ठोदितदर्शनं विशदितं यत्प्रत्यभिज्ञाभिधं
सोमानन्दवसूत्पलादिमहितं श्रीभैरवो राधितः।
साहित्ये विवृतो ध्वनिर्मुनिकृतौ क्लृप्ता नवा भारती
तन्त्रादीनि समृद्धतानि, न किमप्यद्याऽवशिष्टं मम॥

क्षेमेन्द्रः- भगवन्! किमत्र चित्रम्। सम्यगाह भवान्।

अभिनवः- वत्स! सम्प्रति जीर्णकलेवरस्सन् भैरवस्तोत्राणि गायन् श्रीमद्भैरवगुहायामेव प्रवेष्टुकामोऽस्मि। यदवशिष्टं कार्यं त्वं सम्पादयिष्यसि। आयुष्मन्! गच्छेदानीम्। किन्ते भूयः उपकरोमि?

क्षेमेन्द्रः- भगवन्! किमन्यत्?

यथा युगान्तरे जातेऽप्यक्षता जाह्नवी भुवि।
अक्षतैव तथा तिष्ठेद् भारते सुरभारती।।

।। इतिश्रीमत्त्रिवेणीकविनाऽभिराजराजेन्द्रविरचितमभिनवसूर्योदयरूपकं समाप्तम्।।

लेखकसूची

1. **प्रो.प्रभुनाथद्विवेदी**, पूर्वसंस्कृतविभागाध्यक्षः, महात्मागाँधीकाशीविद्यापीठम्, वाराणसी
2. **देवर्षिकलानाथशास्त्री**, सी-8, सी-स्कीम, पृथ्वीराजरोडजयपुरम्, राजस्थानम्
3. **प्रो.हरेरामत्रिपाठी**, शोधप्रकाशनविभागाध्यक्षः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्, नवदेहली-16

   श्रीविनयगोपालत्रिपाठी, शोधच्छात्रः, सर्वदर्शनविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रिय-संस्कृतविद्यापीठम्, नवदेहली-16
4. **डॉ.शिवशङ्करमिश्रः**, उपाचार्यः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्, नवदेहली-16
5. **डॉ.रामनारायणद्विवेदी**, सहाचार्यः, व्याकरणविभागे, श्रीलालबहादुरशास्त्रीराष्ट्रिय-संस्कृतविद्यापीठम्, नवदेहली-16
6. **डॉ.सुमनकुमारझाः**, सहायकाचार्यः साहित्यविभागस्य, श्रीलालबहादुरशास्त्रीराष्ट्रिय-संस्कृतविद्यापीठम्, नवदेहली-16
7. **श्रीबद्रीनारायणगौतमः**, शोधच्छात्रः व्याकरणविभागस्य, श्रीलालबहादुरशास्त्रीराष्ट्रिय-संस्कृतविद्यापीठम्, नवदेहली-16
8. **श्रीसंदीपपैन्यूली**, अनुसन्धाता, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्, नवदेहली
9. **श्रीहरीशकुमारः**, शोधच्छात्रः, संस्कृतविभागः, दिल्लीविश्वविद्यालयः, दिल्ली
10. **प्रो.राजेन्द्र मिश्र**, पूर्वकुलपतिः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी
11. **प्रो.एस. एन. रमामणि, श्री सर्वेश कुमार मिश्र**
    अद्वैववेदान्तविभाग श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्, नवदेहली-16
12. **प्रो.आर. पी. पाठक, डॉ. अमिता पाण्डेय भारद्वाज, डॉ. आरती शर्मा,**
    शिक्षाशास्त्र विभाग, श्री लाल बहादुर शास्त्री राष्ट्रिय संस्कृत विद्यापीठ, नई दिल्ली-16
13. **डॉ.उदय प्रताप सिंह**, बी.एफ.एस. 13, हरनारायण विहार सारनाथ, वाराणसी-221007

14. **श्री सुरेश कुमार शुक्ल**, साहित्य विभाग, श्री लाल बहादुर शास्त्री राष्ट्रिय संस्कृत विद्यापीठ, नई दिल्ली-16

15. **श्री कुलदीप पैन्यूली**, अनुसन्धाता, श्री लाल बहादुर शास्त्री राष्ट्रिय संस्कृत विद्यापीठ, नई दिल्ली-16

16. **Prof. Manoj Kumar Mishra,** Head - Dept. of Veda, Rashtriya Sanskrit Sansthan, New Delhi-110058